तत्र च दक्षिणपक्षे, समस्ति युक्तो गलिः सुरभिसूनुः । खञ्जश्च वामचरणे, वामे पार्श्वे वहति वृषभः ॥१४॥
खेटयति चरणचारी, वेल्लकगन्त्रीमसंस्पृशन् श्वत्रवः । कस्यापि वधू रुष्टा, पश्चादागात्तनयगर्भा ॥१५॥
कृतकुङ्कुमाङ्गरागा, बकुलश्रीदामविरचितवतंसा । सव्रणदेहा रक्तोत्तरीयका प्रसविनी शीघ्रम् ॥१६॥
वेल्लकगन्त्र्यारूढा, सा गच्छति तदनु कमलसुत ऊचे । ज्ञानीव किमिति जल्पसि, विकल्पसंकल्पनाविकलम् ॥१७॥

यतः—

मुखमस्तीति वक्तव्यं, यद्वा तद्वापि बालिशाः । जल्पन्ति न जितात्मानो विशेषेण भवादृशाः ॥१८॥
सागरः स्माह हे भ्रातरभ्रान्तमुदितं मया । शक्यते नान्यथा कर्तुं, कथश्चिच्छुद्धहेतुवत् ॥१९॥
हस्ते सत्कङ्कणे प्राप्ते, कार्यं किं दर्पणेन वा । प्रत्यासन्नैव सा गन्त्री, याति मित्र ! विनिश्चिनु ॥२०॥
विमलोऽवोचदेवं किं धृष्टतामवलंबसे ? । स प्रोचे धृष्ट एवास्मि, त्वया धृष्टेन वच्मि यः ॥२१॥
विमलस्तद्धने लुब्धः, प्रोचे सत्यमिदं यदि । तत्ते स्यान्मम सर्वस्वं, तावकं त्वन्यथा मम ॥२२॥
क्रुध्यंस्तद्वचसाऽऽहत्य हस्तं हस्तेन सागरः । बभाषे कमलं श्रेष्ठिन् ! साक्षिकोऽत्र त्वमावयोः ॥२३॥
श्रेष्ठ्याह यद्ययं मूर्खस्तत् किं त्वमपि सागर ! । विमलः प्राह किं तात ! लाघवं कुरुषे मम ॥२४॥

सागरो व्याकरोदेवं, श्रेष्ठिन् ! यद्येष ते सुतः। मत्पादयोर्लगत्युच्चैर्हुड्डातस्तु त्यजाम्यहं ॥२५॥
विमलोऽवक् लगिष्यन्ति, कुर्कुरास्तव पादयोः। नित्यं बम्भ्रमतो भिक्षां, गृहीते त्वद्धने मया ॥२६॥
एवं विवदमानौ तौ, यान्तौ गन्त्र्या अमीलताम्। अवीक्ष्य योषितं तत्र, हर्षुलो विमलोऽजनि ॥२७॥
पृष्टश्च सारथिस्तेन, सा योषित् किं न वीक्ष्यते। स ऊचे भद्र ! सा गुर्वी, प्रसवाय वने ययौ ॥२८॥
अत्रैव पत्तनेऽमुष्या विद्यते जननी ततः। तस्मै कथयितुं वार्तां, मातङ्गः प्रैषि तत्र हि ॥२९॥
विप्रोऽहमेषा वणिक्स्त्री रुष्टाऽगाद्धर्तृताडिता। प्रातिवेश्मिकसौहार्दान्नैवेतां त्यक्तुमुत्सहे ॥३०॥
इतश्च तत्र तन्माता, स मातङ्गोऽपि चाययौ। तस्याश्च पुत्रः संजज्ञे, विप्राय च निवेदितः ॥३१॥
इत्यवेत्य पितापुत्रौ, चेलतुः स्वगृहं प्रति। स्वपण्यं मद्गृहे प्रेष्यं, विमलं सागरोऽभ्यधात् ॥३२॥
स प्रोचे ते यथा भाति तथोपहस नः सखे !। दध्यकौ सागरः किं मे, कलहेनामुनाधुना ॥३३॥
ध्यात्वेति विमलपण्यं, सर्वं निजवाटकाश्रितं कृत्वा। निजसद्म सागरोऽगादितरावपि जग्मतुः स्वगृहम् ॥३४॥



नूतनघनमलिनमुखो, विमलः कमलस्य सम्मुखमथाख्यत्। निस्तरणीयः कथमापदापगापतिरयं तात ! ॥३५॥
तात ! विचिन्तय मध्यस्थभावमाधाय वास्तवमिहार्थम्। हसितभणितान्यपि कथं, पश्यत दूरं विलुठितानि ॥३६॥
तत् त्वं गत्वा बोधय, सागरमिव सागरं सुदुष्पूरम्। न हि कोऽपि निजं धनमर्पयिष्यते हसितभणितेन ॥३७॥
कमलः कमलसुकोमलवाचमुवाचेति सत्यकृतसन्धः। मा वत्स ! गच्छ कुपथे, स्मर निजभणितानि नयनिपुण ! ॥३८॥

यानि वचनानि नन्दन ! हसतापि सता सता प्रयुक्तानि। तन्निर्वहणे तस्योल्लसति सदा निरवधिः सन्धा ॥३९॥

यतः—

गच्छतु लक्ष्मीः परिभवतु परिजनः सज्जना विघटयन्तु। प्रतिपन्नपालने सत्पुसां यद् भवति तद् भवतु ॥४०॥

इत्युक्तः कुपितमना, विमलः समलं जगौ जरन्मूर्ख ! । जोषं पोषन्निजगृहपल्वलकमलः कमल ! भूयाः ॥४१॥

एवं प्रजल्प्य विमलः, प्राभृतभृद् भूभृदन्तिकं गत्वा। उचितस्थाने न्यषदत् विषण्णमूर्त्तिर्नृपं नत्वा ॥४२॥

राजाऽऽह किं विषण्णः, स प्रोचे सागरोऽऽग्रहीद् द्रव्यम्। किमिति क्षितिपतिनोक्ते, सोऽवोचत् पृच्छयतां सैव ॥४३॥

आकार्याथ नृपतिना, पृष्टः सागर उवाच तद्वृत्तम्। कौतुकयुक् नृप आख्यत् कथमिदमज्ञायि भो ! भवता ॥४४॥

सागर आह सविनयं, माकन्दफलानि देव ! बुबुधेऽहम्। तद्वासितभूनिपतितकोद्रवतृणनिकरगन्धेन ॥४५॥

उपविशति गलिर्बहुशो धूलिप्रतिबिम्बतः स तु ज्ञातः। वामे पार्श्वे खञ्जः, पदानुसारान्मयाऽज्ञायि ॥४६॥

गलितं करपत्र्यम्भो वालधिवालान् प्रतोदखण्डानि दृष्ट्वा शुचित्वकोपित्वतो मया निश्चितो विप्रः ॥४७॥

भग्ने तोत्रे शाखाखण्डं मुमुचे यतः क्षितौ तेन। अस्पृश्योऽज्ञायि मया गन्त्र्या उत्तीर्य विप्रोऽथ ॥४८॥

अभ्युक्ष्य तत्तु जगृहे, तत्पदरासिकां निरीक्ष्य भूलग्नाम्। बहुमक्षिकापरिगतां विप्रः कुष्ठी ततो जज्ञे ॥४९॥

वेल्लकगन्त्र्या उत्तीर्य भामिनी भामशालिनी सा तु। बदरीवणस्य मध्ये, निषसाद शरीरचिन्तायै ॥५०॥

दक्षिणहस्तोपष्टम्भतस्त्वसावुत्थितेति सुतगर्भा। संवीक्ष्य शौचसलिलं विरचितघुसृणाङ्गरागेति ॥५१॥

बदरीकण्टकलग्नांस्तदुत्तरीयस्य रक्तसूत्रलवान् । अवलोक्य रक्तचीवरपरिकलिता सा मया ज्ञाता ॥५२॥
पश्चान्मुखानि तस्याः, पदानि किल सिकतिले स्थले वीक्ष्य । अवलोकयते पश्चान्मुखमिति रुष्टा मया बुबुधे ॥५३॥
केशकलापात् पतितान् वीक्ष्यामलबकुलमालिकावयवान् । ज्ञाता सबकुलदामा व्रणयुक् पदपट्टदर्शनतः ॥५४॥
धुर्येव चूतगन्त्र्याः सारथिरुपविशति भुवि च वनितायाः । अनिरीक्ष्य पादपङ्क्तिं वेल्लकगत्री विनिश्चिक्ये ॥५५॥
राजाऽऽह कोऽत्र सागर ! साक्षी स प्राह देव ! कमल इति । नृप आख्यत् यद्येवं याति धनं तर्हि तस्यैव ॥५६॥
सागर आख्यदेवं देव ! तथापि च सुधार्मिकधुरीणः । नित्यं सत्यं वक्ता, मम प्रमाणं स एवास्तु ॥५७॥
आह्वाय्य भूमिपतिना, कमलो मधुमधुरया गिरा प्रोचे । व्यतिकरमिममखिलं, त्वं वेत्सि ततो वद यथावृत्तम् ॥५८॥
कमलः स्पष्टमभाषिष्ट, शिष्टजनगर्हितं कुगतिजनकम् । अन्योऽपि कोऽप्यलीकं न वदति किमु विदितजिनवचनः ॥५९॥
सज्जनकार्येप्ययथार्थभणनमङ्गति न सङ्गतिं देव ! । येनैष एव शुचिसत्यवचनकनकस्य कषपट्टः ॥६०॥
यदि च यथास्थितभणने, कुप्यति तनयो विरज्यते सुजनः । इत्यपि भवतु तथापि च, न युक्तमयथार्थभणनं तु ॥६१॥



यत उक्तम्—

"निन्दन्तु नीतिनिपुणा यदिवा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा, न्याय्यात् पथः प्रविचलन्ति पदं न धीराः" ॥६२॥

स्वयमेव वेत्ति देवो यो यादृक्षस्तथापि मामेवम् । पृच्छति यथास्थितं तत् सागरभणितं प्रमाणमिह ॥६३॥

श्रुत्वैवं पुलकिततनुरतनुमुदा मेदुरो विशामीशः । शुचिकमलकण्ठपीठाधारं हारं निजं चक्रे ॥६४॥
अभणच्च यथा सत्यं, नित्यं लोकं करोति कृतकृत्यम् । सत्यं सत्यङ्कारितघनसुकृतधना जनाः प्राहुः ॥६५॥
सत्येन रत्नगर्भा, सुरत्नगर्भा पदे पदे पुंसाम् । सत्याय स्पृहयालुर्हृदयालुरयं जनः सर्वः ॥६६॥
सत्यात् फलन्ति फलदा, जलदा जलदाननैपुणाः काले । सत्यस्येयं परमा, महिमा ज्वलनप्रशमनाद्या ॥६७॥
सत्ये सत्ये तस्मिन्, न दुर्गतिभवं भयं भवति पुंसाम् । दृढसत्यसत्यव्रादिषु, धुरि पट्टः कमल ! तत्तेस्तु ॥६८॥
इत्युक्त्वा मुदितमनाः सुमनायितसज्जनस्य कमलस्य । सुविशालभालपट्टे हाटकपट्टं बबन्ध नृपः ॥६९॥
विमलं निजगाद पुना रसनाच्छेदार्होऽसि रे दुष्ट ! । किन्तु कमलाङ्गभूरिति मुक्तोऽसि विमुक्तसत्यधनः ॥७०॥
अथ सागरोऽपि हृष्टो न्यगदज्जगतीश! सकलमपि पण्यम् । पुण्यात्मनोऽर्पयिष्ये गतलोभमलस्य कमलस्य ॥७१॥
क्षितिपतितिलकेन, समृद्धशुद्धिसद्बुद्धिरञ्जितेन भृशम् । सचिवशचीवरपदसलिलसागरः सागरश्चक्रे ॥७२॥
निरतो यथार्थभणने, कमलः कमलामनाविलामाप । प्रव्रज्य विमलकेवलकलितः शिवसौधमध्यास्त ॥७३॥

एवं मृषाविटपिपाटनदीप्तदन्तदन्तावलस्य कमलस्य निशम्य वृत्तम् ।
त्यक्त्वा जना ! जनितवाच्यमसत्यवाक्यं नित्यं यथार्थभणने कुरुत प्रयत्नम् ॥७४॥

॥ इति कमलश्रेष्ठिकथा ॥

इत्युक्त ऋजुव्यवहारे यथार्थभणनस्वरूपः प्रथमो भेदः, सम्प्रति द्वितीयं भेदमाह–'अवंचिगा किरिय'त्ति 'अवञ्चिका' पराव्य-

सनहेतुः क्रिया-मनोवाक्कायव्यापाररूपेति द्वितीयमृजुव्यवहारलक्षणम्-

उक्तं च—

तप्पडिरूवगविहिणा, तुलापलाईहि ऊणमब्भहियं । दिंतो लिंतो वि परं, न वंचए सुद्धधम्मत्थी ॥१॥
वंचणकिरियाइ इहंपि केवलं पावमेव पिच्छंतो । तत्तो हरिनंदी इव नियत्तए सव्वहा सुमई ॥२॥ इति ।

कः पुनरयं हरिनंदी ? तत्कथोच्यते—

उज्जेणी पुरवरीए बहिया वणवीहियाइ ववहरइ । हरिनंदिवणी दारिद्दरुद्ददंदोलिदुमविहगो ॥१॥
आसन्नसन्निवेसाउ अन्नया आगया वणे तस्स । आहीरी ववहरिउं, एगा घयमाइ घित्तूणं ॥२॥
तं विक्किणिउं किणिउं च लोणातिल्लाइ सा पयंपेइ । सिट्ठि ! बिसिट्ठं रूवगदुगस्स कप्पासमप्पेसु ॥३॥
सो य समग्घो समए, तंमि य तो तोलिउं दुवे वारे । इगरूवगस्स अप्पइ, सा मुद्धा बंधए गंठिं ॥४॥
तं तह दट्ठुं सिट्ठी, विचिंतए परपवंचणानिउणो । अज्ज मए अज्जिणिओ, अकिलेसं रूवगो एगो ॥५॥
इय चिंतिउं विसज्जइ, इमो अणुज्जु(ओ)तमुज्ज(ज्जु)यं सज्जो । इत्तो तवणिनिमित्तं, पत्ता से गेहिणी तत्थ ॥६॥
सा तवणिं उवणेउं, भणिया घयखंडसमियमाईणि । एयाइं गिण्ह सिग्घं, करेसु तं घेउरे पवरे ॥७॥
सा ताइं गहिय सगिहे, गंतुं तुट्ठा करेइ घयपुण्णे । सिट्ठी उट्ठिय हट्टाउ न्हाउं पत्तो नई इत्तो ॥८॥
कत्तो य आगओ तग्गिहंमि जामाउओ वयंसजुओ । अइऊसग त्ति भुत्तुं ते घयपुण्णे गओ तुरियं ॥९॥

४ ऋजुव्यवहारीति भावश्रावकलक्षणम् ।

तत्र अवञ्चिका क्रियायां हरिनन्दि कथा ।

अह न्हाउ गिहं पत्तो, सिट्ठी साहावियं चिय कुभत्तं । परिविट्ठं दट्ठुं सुट्ठु रुट्ठओ भणइ इय भज्जं ॥१०॥
किं अलसे ! घयपुण्णा, न कया सा भणइ ते कया किंतु । ते सव्वेवि समित्तो तुह जामाऊ गओ जिमिउं ॥११॥
इय सोउं स विसण्णो तंपि य जिमिउं पुरीबहिं गंतुं । अणुतावतावियमणो इय अप्पं निंदए सिट्ठी ॥१२॥
ही वंचिया मुहाए, धणलवलुद्धेण सा मए मुद्धा । अन्नेहि तयं भुत्तं, पावं मह चेव संजायं ॥१३॥
हद्धी इच्चिरकालं, परवंचणपवणमाणसेण मए । दूसहदुहनरयदावग्गिइंधणं कह कओ अप्पा ? ॥१४॥
इय झूरंतो जा जाइ, किंपि भूभागमग्गओ ताव । मग्गंमि मुणिं एगं, गच्छंतं दट्ठुमिय भणइ ॥१५॥
भयवं ! पडिक्खसु खणं, भणइ इमो गच्छिमो सकज्जेणं । सिट्ठीवि आह किं कोवि नाह ! परिभमइ परकज्जे ॥१६॥
अइसयनाणी साहू, भणेइ तं चिय भमेसि परकज्जे । सो मम्मे इय पुट्ठो बुद्धो तेणेव वयणेण ॥१७॥
हरिनंदी आणंदियहियओ वंदिय मुणिं भणइ कत्थ । चिट्ठह तुब्भे भयवं ?, भणइ मुणी इत्थ उज्जाणे ॥१८॥
तो मुणिकहियं धम्मं सोउं विण्णवइ पहु ! तुहसमीवे । गिण्हिस्समहं दिक्खं, नवरं पुच्छिय सयणवग्गं ॥१९॥
पणमित्तु मुणिं गेहे, पत्तो मेलित्तु जंपए सयणे । इह तारिसो न लाभो, ता दिसि जत्ताइ गच्छामि ॥२०॥
इत्थ दुवे सत्थाहा, एगो नियरयणपगगमप्पेइ । तह नेइ इच्छियपुरं पुव्वविढत्तं न मग्गेइ ॥२१॥
बीओ न देइ किंचिवि, इच्छियनयरं च नहु पराणेइ । पुव्वज्जियंपि गिण्हइ, वएमि तो भणह केण समं ? ॥२२॥
ते बिंति पढमएणं, सिट्ठी वज्जरइ नियह आगंतु । तो ते पमोयकलिया चलिया सह तेण मग्गंमि ॥२३॥

हयवसहाइ अदट्ठुं भणंति ते कत्थ सत्थवाहो सो ? । उ नियह निसन्नमसोगहिट्ठओ संसए सिट्ठी ॥२४॥
तो ते विम्हइयमणा, सयणा नमिउं मुणिं समासीणा । पणमिय पुच्छइ सिट्ठी, को इत्थ पसत्थसत्थाहो ? ॥२५॥
साहू साहइ इह दव्वभावभेया दुहा उ सत्थाहो । तत्थ य पढमो नियपोसगुज्जुओ सयणवग्गुत्ति ॥२६॥
सो दुहियस्सवि जीवस्स, देइ न य कहवि किंपि सुकयधणं । परभवपहे पयट्टस्स, तस्स न पयंपि सह चलइ ॥२७॥
कलहाइएहिं एसो, लुंपइ पुव्वज्जियंपि सुकयलवं । बीओ पुण सत्थाहो सुगुरुगुणरयणगणकलिओ ॥२८॥
जिणसासणसुद्धागरसंभूए निम्मले य सच्छाए । सो सम्मं देइ निए, पंचमहव्वयमहारयणे ॥२९॥
जं तेहिं पंच रयणेहिं, अज्जियं सुहकरं सुकयदव्वं । न य तं कयावि गिण्हइ, कमेण पावेइ सिवनयरं ॥३०॥
इय सोउं संविग्गो, हरिनंदी गिण्हए समणधम्मं । सयणावि ससत्तीए, धम्मं गहिउं गया सगिहे ॥३१॥
हरिनंदी परवंचणकिरियासरियाइ सोसणिक्करवी । कयसक्किरिओ अकिरियठाणंमि कमेण संपत्तो ॥३२॥

इत्यवेत्य हरिनन्दिवज्जनाः, पापसन्तमसदर्शयाभिनीम् ।
संविमुच्य परवञ्चिकां क्रियां, सत्क्रियाः स्थ यदि वाऽक्रियेच्छवः ॥३३॥

## इति हरिनन्दिकथा ॥

इत्युक्त ऋजुव्यवहारेऽवञ्चिका क्रियेति द्वितीयो भेदः, सम्प्रति भाव्यपायप्रकाशनस्वरूपं तृतीयं भेदमाह–'हुंतावायपगासणं' ति। 'हुंत'त्ति–प्राकृतशैल्या भाविनोऽशुद्धव्यवहारकृतो येऽपायास्तेषां प्रकाशनं प्रकटनं करोति, 'भद्र ! मा कृथाः पापानि चौर्यादीनि

४ ऋजुव्य-
वहारीति
भावश्रावक-
लक्षणम् ।

तत्र भाव्य-
पायप्रका-
शने भद्र-
श्रेष्ठिकथा ।

इह परत्र चानर्थकारीणि' इत्याश्रितं शिक्षयति, भद्रश्रेष्ठीव निजपुत्रं धनम्, न पुनरन्यायप्रवृत्तमप्युपेक्षत इति भावः ।

**भद्रश्रेष्ठिकथा चैवम्—**

हरिदेहं पिव भद्दिलपुरमत्थि सुवण्णगसंगयं सुगयं । तत्थ सुपसत्थनयकुंजकेसरी केसरी राया ॥१॥
सिट्ठी भद्दो भद्दो, दंती व दाणपसरदुल्ललिओ । तस्स पवंचणपवणो धणलुद्धमणो धणो तणओ ॥२॥
मुणिचित्तं व सकरुणं, सअज्जुणं पंडवाण सिन्नं व । ते कीलिउं कयावि हु, दुवेवि उज्जाणमणुपत्ता ॥३॥
उव्वूढखमाभारं, निव्वूढदयं परूढगुरुवंसं । सेलंपि व सुपइट्ठं, सुपइट्ठमुणिं नियंति तहिं ॥४॥
ते तं समणुत्तममुत्तमंगसुनिविट्ठकरयला नमिउं । निसियंति उचियठाणे, तो धम्मं कहइ इय सुमुणी ॥५॥
कमलसरं पिव मरुमंडलंमि तमसंमि रयणदीवं व । नरभवमिह दुलहं लहिय कुणह सत्तीइ जिणधम्मं ॥६॥
इय सुणिय पियपुत्ता पहिट्ठचित्ता गहित्तु गिहिधम्मं । मुणिचरणे जयसरणे, नमिउं पत्ता निए सरणे ॥७॥
भाविबहुभद्दसंदोहसुंदरो भद्दमाणसो भद्दो । ववहारसुद्धिनिरओ गिहिधम्मं पालइ विसुद्धं ॥८॥
हट्टंमि ठिओ निच्चं, धणो पुणो लुद्धओ धणे धणियं । कूडक्कयविक्कयतुल्लमाणमाईहिं ववहरइ ॥९॥
अणविक्खिवउं अवाए, तेणाणीयंपि लेइ पच्छन्नं । तं नाउ सो उ पिउणा मिउणा वयणेण इय भणिओ ॥१०॥
वच्छ ! अपत्थं पच्छा, अपत्थभत्तं व दोसपडिहत्थं । अन्नाएणं दविणस्स, अज्जणं सज्जणा बिंति ॥११॥
अन्नाएण विढत्तं, दव्वमसुद्धं असुद्धदव्वेणं । आहारोवि असुद्धो, तेण असुद्धं सरीरं पि ॥१२॥

देहेण असुद्धेणं, जं जं किज्जइ कयावि सुहकिच्चं । तं तं न होइ सहलं बीयं पिव ऊसरनिहित्तं ॥१३॥

किं च—

भाविअवाए अन्नयपहपहियाणं नराण चिंतेसु । निज्जियकज्जलपसरो, अजसभरो फुरइ भुवणंमि ॥१४॥

इहयंपि हुंति कारापवेसवहबंधहत्थछेयाई । परलोए पुण दारुणनरगाइसु दुक्खरिंछोली ॥१५॥

संपासंपायचलं, जलजलणनरिंदमाइसाहीणं । विहवलवं नाउं अण्णायउज्जुओ को हविज्ज इहं ? ॥१६॥

वच्छ ! वियाणसु, अन्नायअज्जियं उज्झियंपि विहवभरं । पज्जंते अइविरसं सु(दु)ज्जयभवमूलभावं च ॥१७॥

अइलोहनेहपूरियअन्नायपईवभाविणा इमिणा । नियवयभरभंजणखंजणेण को मइलए अप्पं ? ॥१८॥

इय जंपिओवि पिउणा, सो गुरुणा लोहकम्मणा मलिणो । नहु किंपि तं पवज्जइ, चिट्ठइ पुव्वं व अनयपरो ॥१९॥

अह चोरेणिक्केणं, वरकुंडलजुयलसंजुयं हारं । उवणीयं झत्ति धणो, धणेण थोवेण गिण्हेई ॥२०॥

चोरकराओ कइयावि, जाव रयणावलिं स गिण्हेइ । निवसिरिहरिओ, विमलो ता पत्तो तस्स हट्टंमि ॥२१॥

तेण य भणिओ वरसिचयसंचए दंसए धणो जाव । ताव धणउड्डियाए, पडिया रयणावली झत्ति ॥२२॥

तं गहियं उवलक्खिय, विमलो पुच्छेइ सिट्ठि ! किं एयं ? । जा किंपि न सो जंपइ, खुहिओ ता जंपए विमलो ॥२३॥

अन्नंपि इमीइ समं, नट्ठं वरहारकुंडलाईयं । तुह पासे तंपि अहं, मन्ने ता लहु समप्पेसु ॥२४॥

अन्नह निवेण नाए, धणेण देहेण वा न छुट्टिहिसि । अह हणहणित्ति भणिरो, संपत्तो तलवरो तत्थ ॥२५॥

बद्धो तेण धणो विमलपुच्छिओ सो य भणइ जह अज्ज ! । लद्धो इक्को चोरो, सोहिज्जंतेण तेण इमो ॥२६॥
कहिओ मोसट्ठाणं, नरवरआहरणमाइ सव्वाणं । तो रयणावलिसहिओ, स तेण नीओ निवसमीवे ॥२७॥
तो भिउडिभासुरेणं, निवेण सेहाविओ धणो अहियं । रयणावलिकुंडलहारमाइ सव्वं समप्पेइ ॥२८॥
इय सोऊण अखुद्दो, भद्दो गंतूण निवइपासंमि । दाउं पभूयविहवं, कहकहमवि मोयए पुत्तं ॥२९॥
तो नाउं बहुअवायं, चइऊण दुहावि दुज्जणं व धणं । दिक्खं गिण्हिय जाओ, भद्दो भद्दाण आभागी ॥३०॥
मुक्कववहारसुद्धी, सुमहंतसमुल्लसंतधणगिद्धी । परिचत्तविमलभावो, नरए पत्तो धणो पावी ॥३१॥

इत्येवमाकर्ण्य सकर्णलोका ! भद्रस्य भद्रङ्करणं चरित्रम् ।
तद् भाव्यपायप्रसरेण मुक्ताम् । श्रयन्तु नित्यं व्यवहारशुद्धिम् ॥३२॥

## ॥ इति भद्रश्रेष्ठिकथा ।

इत्युक्त ऋजुव्यवहारे भाव्यपायप्रकाशनमिति तृतीयो भेदः, सम्प्रति सद्भावतो मैत्रीभाव इति चतुर्थं भेदमाह—

'मित्तीभावो य सब्भाव' त्ति । मित्रस्य भावः कर्म वा मैत्री, तस्या भावो-भवनं सत्ता सद्भावान्निष्कपटतया सुमित्रवत् निष्कपटमैत्रीं करोतीत्यर्थः, मैत्रीकपटभावयोश्छायातपयोरिव विरोधात् ।

उक्तं च—

"शाठ्येन मित्रं कलुषेण धर्मं, परोपतापेन समृद्धिभावम् । सुखेन विद्यां परुषेण नारीं, वाञ्छन्ति ये व्यक्तमपण्डितास्ते ॥"

इति चतुर्थ ऋजुव्यवहारभेदः।

सुमित्रकथा चैवम्—

सुपुरिसपुर इव सुकरे, वरवच्छे सिरिपुरंमि नयरंमि। सिट्ठी आसि न दीणो, समुद्ददत्तो समुद्दुव्व ॥१॥
सब्भावसारमित्तीमहंतदिप्पंतकंतिकयसोहो। पुत्तो तस्स सुमित्तो, मित्तु व्व परं असत्तासो ॥२॥
निद्धम्मो चत्तगुणो, लोहमओ मग्गणु व्व पीइहरो। परमम्मवेहणपरो, मित्तो तस्सत्थि वसुमित्तो ॥३॥
अणुण्णविय कहवि पिउणो, ववहरणत्थं सुमित्तवसुमित्ता। संगहियपउरपणिया, वणिया देसंतरे चलिया ॥४॥
मित्तपओसी दोसुक्करिसपरो कोसिउ व्व वसुमित्तो। लुद्धमणो मित्तधणे, कुणइ वियारं इय पहंमि ॥५॥
जीवाण जओ धम्माउ, किं व पावाउ कहसु मह मित्त!। भणइ सुमित्तो धम्माउ, नणु जओ न उण पावाओ ॥६॥

यतः—

दविणमलं कुलममलं, आणेस्सरियं अभंगुरं विरियं। सुरसंपयं सिवपयं, धम्माउ च्चिय जियाण धुवं ॥७॥
जइ पुण पावेण बुद्धिरिद्धिसंसिद्धिमाइणो हुज्जा। तो हुज्ज न कोवि इहं, जडो दरिद्दो असिद्धो य ॥८॥
रक्खियमिगोवि मियलंछणो ससी हयमिगोवि मिगनाहो। सीहो उ तओ पावा, जउ त्ति इय भणइ वसुमित्तो ॥९॥
इय विवयंता दुन्निवि, सव्वस्सपणंमि निम्मियपइण्णा। अण्णायधम्मनामे, कमेण कंमिवि गया गामे ॥१०॥
तत्थ य वसुमित्तेणं, मच्छरभरपूरिएण नियपक्खं। पुट्ठा गामीणजणा, पावाउ जउ त्ति जंपंति ॥११॥



सद्भाववतो
मैत्रीभावे
सुमित्र-
कथा।

जे परवंचणपउणा, विगलियकरुणा सया असच्चधणा । ते पच्चक्खं पिच्छह, अतुच्छलच्छीइ संछन्ना ॥१२॥

अन्यैरप्युक्तम्—

"नातीवसरलैर्भाव्यं, गत्वा पश्य वनस्पतीन् । सरलास्तत्र छिद्यन्ते, कुब्जास्तिष्ठन्ति पादपाः ॥१३॥
गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते । असञ्जातकिणस्कन्धः सुखं जीवति गौर्गलिः ॥१४॥
उत्तरदाणअसत्तो, तस्स सुमित्तो मुरुक्खसत्थस्स । वसुमित्तेणं सत्थाउ, धाडिओ गहिय सव्वस्सं ॥१५॥
सो एगागी अडवीइ, निवडिओ आहिदुक्खतत्तो वि । पगईइ मित्तभावेण, परिगओ चिंतए एवं ॥१६॥
भुंजंतो रे जिय ! पुव्वजम्मकडुकम्मरुक्खफलमेयं । काऊणं संतोसं, वसुमित्ते वज्जसु पओसं ॥१७॥
इय चिंतिउं सुमित्तो, निसाइ सावयगणाण बीहंतो । इक्कस्स निलुक्को गरुयविडवविडविस्स कुहरंमि ॥१८॥
इत्तो निसुणइ दीवंतराउ पत्ताण रुक्खसिहरंमि । सो पक्खीणुल्लवियं, महल्लविहगेण पुट्ठाणं ॥१९॥
भो विहगा ! कहह महं, कत्तो को इत्थ आगओ इण्हिं ? । दीवंतरंमि केणं, किं किर दिट्ठं व निसुयं वा ? ॥२०॥
तेहिवि जं जह दिट्ठं, सुयं व दीवंतरेसु तं सव्वं । तह चेव तस्स कहियं, एगो पुण भणइ तत्थ इमं ॥२१॥
ताय ! अहमज्ज पत्तो, सिंहलदीवाउ तत्थ नरवइणो । अत्थि जियमयणघरिणीरूवा धूया मयणरेहा ॥२२॥
तीसे य अच्छिवियणाइ पीडियाए तइज्जओ मासो । विज्जेहिवि पडिसिद्धा, तो पिउणा दाविओ पडहो ॥२३॥
जो मह धूयं पउणेइ, तस्स वियरेमि रज्जमद्धमहं । तीइ समं चिय न य कोवि पडहयं छिवइ पुण ताय ! ॥२४॥

अन्न·दिणं छट्ठं पडहयस्स ता तीइ नयणरोगस्स । किं नत्थि ओसहमिहं, किंवा अत्थि त्ति मह कहसु ॥२५॥
अह भणइ वुड्डपक्खी, जाणंतेहि वि जहा तहा एयं । दिवसंमि वि न कहिज्जइ, किं पुण रयणीइ हे पुत्त ! ॥२६॥
तेणुत्तं मह गरुयं कुड्डं, न य कोइ सुणइ इह ताय ! । तो कहसु आह सो वि, हु सुयपुव्वं वच्छ ! मह एयं ॥२७॥
अद्धाणपवन्नेहिं, इह निसि वसिएहि जइणसाहूहिं । सल्लक्खणु त्ति कहिओ, एस तरू नयणरोगहरो ॥२८॥
जइ कोइ एयतरुणो, पत्तरसं तीइ अच्छिसु खिविज्जा । तो सा पउणिज्जइ लहु, इय सोउं चिंतइ सुमित्तो ॥२९॥
छज्जीवहिया मित्तीइ, मंदिरं दुरियदहणजलवाहा । सन्नाणरयणजलही, न अन्नहा बिंति जइणमुणी ॥३०॥
इय निच्छिय तत्तरुणो, सरलदलाइं गहित्तु सो अप्पं । बंधइ सिंहलदीवागयभारुंडस्स चरणंमि ॥३१॥
नीओ तेण तहिं सो, छिविउं पडहं गओ निवइपासे । विहिओचियपडिवत्ती, रण्णा पुट्ठो कुसलवत्तं ॥३२॥
वाहरिय मयणरेहं, बलिमंडलमाइ काउ संझाए । लोयणवेयणरहियं, करेइ तेणं दलरसेणं ॥३३॥
परिणाविय नियकन्नं, दिन्नं रण्णा य तस्स रज्जद्धं । सो तत्थच्छइ सुत्थियहियओ सव्वेसि हियनिरओ ॥३४॥
वसुमित्तो वहणेणं, कयावि तत्थागओ वणिज्जेण । निवदंसणाय पत्तो, गहिउं कोसल्लियं बहुयं ॥३५॥
तत्थ सुमित्तं सुमहंतरायलच्छीइ दट्ठु दिप्पंतं । सो चत्तमित्तभावो धसक्किओ चिंतए एवं ॥३६॥
एसो पयडपओसो, जइ कहमवि मज्झ वइयरं रण्णो । पायडइ तओ अहुणा, हियसव्वस्सो विणस्सामि ॥३७॥
केणावि उवाएणं, ता एयं मारिमु त्ति चिंतेउं । पाहुडमप्पित्तु नमित्तु निवइपासंमि आसीणो ॥३८॥

विजणं जाणित्तु इमो, सुमित्तभवणंमि जाइ मायाए। पुच्छियकुसलोदंता परुप्परं जाव अच्छंति ॥३९॥
ता वसुमित्तेणुत्तं सुमित्त! वरमित्त! कइवयदिणाणि। मा मं जाणाविज्जसु, रण्णो तेणावि पडिवन्नं ॥४०॥
अन्नदिणे वसुमित्तो, रहंमि विण्णवइ नरवइं एवं। परदोसग्गहणं जइवि, देव! जुत्तं न पुरिसाणं ॥४१॥
तहवि हु गुरुअववाओ, पहुणो मा होउ इय पयंपेमि। एसो तुह जामाऊ, अम्ह पुरे विज्जडुंबसुओ ॥४२॥
तं सोउं सुविसण्णो, करालकुलिसाहउ व्व नरनाहो। तं वुत्तंतं सव्वं, सुबुद्धिसचिवस्स साहेइ ॥४३॥
सो पडिभणेइ जइ देव! एवमेयं तओ गुरू अयसो। ववहारियाण ठाणं, जमिमा दीवेसु तुह नयरी ॥४४॥
सहसा निवोवि जंपइ, जा पयडं हवइ न हु इमं लोए। ता पच्छन्नं एयं, वावायसु मंति! तं झत्ति ॥४५॥
आमंति मंतिणुत्ते, रहंमि पुट्ठा निवेण नियधूया। किं अकुलीगवियारो, सचविओ कोवि ते पइणा? ॥४६॥
सा भणइ अवि कलंको, ससिणो किर अत्थि न उण मह पइणो। केवलगुणमयमुत्ती पडु व्व परगुज्झरक्खट्ठा ॥४७॥
नियपच्चइयनरेहिं, इत्तो पिच्छणयपिच्छणमिसेण। सचिवेण लहु सुमित्तो, संझासमयंमि वाहरिओ ॥४८॥
पुण्णभरपेरिएणं, तेणवि नियवेसमप्पिउं तइया। पट्ठविओ वसुमित्तो, सुबुद्धिपुरिसेहि सो निहओ ॥४९॥
तं नाउ निवो कह मह, दुहिया होहि त्ति जाव झूरेइ। सा ताव तत्थ आगंतु, पुच्छए किं इमं ताय! ॥५०॥
तुह वेहव्वकरो हं, वच्छे! पावु त्ति जंपिए रण्णा। सा भणइ तुज्झ जामाउगो गिहे चिट्ठए ताय! ॥५१॥
तं आयण्णिय रण्णा, रहंमि पुट्ठो पयंपइ सुमित्तो। मज्झत्थमणो सव्वं तं, वसुमित्तस्स वुत्तंतं ॥५२॥

तो चिंतए नरिंदो, मित्तीभावत्तणं इमस्स अहो ! । मच्छरभीरुत्तमहो अहो ! अहो ! धम्मसुथिरत्तं ॥५३॥
इय चिंतिउं चमक्कियमणो निवो कहइ मंतिपउराणं । सब्भावरुइरमित्तीजुत्तं चित्तं सुमित्तस्स ॥५४॥
तयणु सुमित्तेण तहिं, पियरो आणाविया पहिट्ठेणं । नयरपिवेसो रण्णा, कराविओ गुरुविभूईए ॥५५॥
जाया य वंससुद्धी, सपरेसि सुहाण कारगो जाओ । पडिवज्जियपव्वज्जो, कमा सुमित्तो गओ सुगइं ॥५६॥
मित्तीभावविरहिओ, अहिओ सपरेसि सययवसुमित्तो । मरिऊण गओ नरए, भमिही संसारमइघोरं ॥५७॥

एवं सुमित्रस्य समस्तसत्त्वसन्दोहमित्रस्य निशम्य वृत्तम् ।
भव्या जना ! दुःखलतालवित्र्यां, सद्भावमैत्र्यां भृशमाद्रियध्वम् ॥५८॥

## ॥ इति सुमित्रकथा ॥

इत्युक्त ऋजुव्यवहारे सद्भावमैत्रीलक्षणश्चतुर्थो भेदः, तदुक्तौ निरूपितं चतुर्विधमप्यृजुव्यवहारस्वरूपम् । साम्प्रतमस्यैव विपर्यये दोषदर्शनपूर्वकं विधेयतामाह—

**अन्नहभणणाईसुं, अबोहिबीयं परस्स नियमेण । तत्तो भवपरिवुड्ढी, तो होज्जा उज्जुववहारी ॥४८॥**

'अन्यथाभणनम्' अयथार्थजल्पनम्, आदिशब्दाद्वञ्चकक्रियादोषोपेक्षाऽसद्भावमैत्रीपरिग्रहः, तेषु सत्सु श्रावकस्येति भावः । अबोधेः—धर्मप्राप्तेर्बीजं—मूलकारणं परस्य मिथ्यादृष्टेर्नियमेन—निश्चयेन भवतीति शेषः । तथाहि—श्रावकमेतेषु वर्तमानमालोक्य वक्तारः

सम्भवन्ति–धिगस्तु जैनं शासनम्, यत्र श्रावकस्य शिष्टजननिन्दितेऽलीकभाषणादौ कुकर्मणि निवृत्तिर्नोपदिश्यते इति निन्दाकरणादमी प्राणिनो जन्मकोटिष्वपि बोधिं न प्राप्नुवन्तीत्यबोधिबीजमिदमुच्यते, ततश्चाबोधिबीजाद् भवपरिवृद्धिर्भवति तन्निन्दाकारिणस्तन्निमित्तभूतस्य श्रावकस्यापि।

यदवाचि—

"शासनस्योपघाते योऽनाभोगेनापि वर्तते। स तन्मिथ्यात्वहेतुत्वादन्येषां प्राणिनामिति ॥१॥

बध्नात्यपि तदेवालं परं संसारकारणम्। विपाकदारुणं घोरं सर्वानर्थविवर्द्धनम्" ॥२॥ इति।

'ततः' तस्मात् कारणाद् 'भूयाद्' भवेत् 'ऋजुव्यवहारी' प्रगुणव्यवहारवान् प्रकृतो भावश्रावक इति।

उक्तमृजुव्यवहार इति चतुर्थं भावश्रावकलक्षणम्, सम्प्रति गुरुशुश्रूषक इति पञ्चमं भावश्रावकलक्षणमाह—

**सेवाइ कारणेण य, संपायणभावओ गुरुजणस्स। सुस्सूसणं कुणंतो, गुरुसुस्सूओ हवइ चउहा ॥४९॥**

सेवया–पर्युपासनेन १, कारणेन–अन्यजनप्रवर्तनेन २, सम्पादनं–गुरोरौषधादीनां प्रदानम् ३, भावश्चेतोबहुमानः ४, तान्नाश्रित्य सम्पादनभावतः गुरुजनस्य–आराध्यवर्गस्य। इह यद्यपि गुरवो मातापित्रादयोऽपि भण्यन्ते, तथापि धर्मप्रस्तावादिहाचार्यादय एव प्रस्तुता इति तानेवोद्दिश्य गुरुशुश्रूषो व्याख्येयः। गुरुलक्षणं चेदम्—

"धर्मज्ञो धर्मकर्ता च सदा धर्मप्रवर्तकः। सत्त्वेभ्यो धर्मशास्त्राणां देशको गुरुरुच्यते" ॥ इति।

गुरुजनग्रहणं बहुत्वप्रतिपत्त्यर्थम्, तेन ये केचित् पूर्वोक्तगुरुलक्षणलक्षितास्ते सर्वेऽपि गुरुजनशब्देन गृहीता द्रष्टव्याः, ततश्च तस्य

गुरुजनस्य 'शुश्रूषणं' पर्युपासनं कुर्वन् गुरुशुश्रूषो भवति, स च 'चतुर्द्धा' चतुष्प्रकार इति गाथाक्षरार्थः।

भावार्थं तु सूत्रकार एव व्याख्यानयन् प्रथमभेदं सेवालक्षणं गाथापूर्वार्द्धेनाह—

**सेवइ कालंमि गुरुं अकुणंतो झाणजोगवाघायं।**

'सेवते' पर्युपास्ते 'काले' अवसरे 'गुरुं' पूर्वोक्तस्वरूपम्। कथम्? 'अकुर्वन्' 'ध्यानं' धर्मध्यानादि 'योगाः' प्रत्युपेक्षणावश्यकादयस्तेषां 'व्याघातम्'—अन्तरायम्, जीर्णश्रेष्ठिवत्।

तत्कथा चेयम्—

पुरी समस्ति वैशाली, शालीनजनशालिनी। तत्रासीत् परमश्राद्धो, जिनदत्ताभिधः सुधीः ॥१॥
सदा जिनपदाम्भोजसेवनैकसितच्छदः। च्युतः श्रेष्ठिपदाज्जीर्णश्रेष्ठित्वेन च विश्रुतः ॥२॥
बहिर्देवकुले तत्र, श्रीवीरप्रभुरन्यदा। छद्मस्थोऽस्थात् प्रतिमया, काले मुदिरमेदुरे ॥३॥
अजीर्णवासनो जीर्णश्रेष्ठी त्रैलोक्यभास्करम्। दृष्ट्वा कोक इवास्तोकहर्षमापदपापधीः ॥४॥
ध्यानविघ्नमतन्वानो, मन्वानो जन्मनः फलम्। स विश्वविश्वसेव्यस्य, सेवां चक्रे जगद्गुरोः ॥५॥
कृत्वा च सुचिरं सेवां, श्रेष्ठी स्वगृहमागमत्। अहिण्डनेन नाथस्य, तर्कयन्नुपवासिताम् ॥६॥
एवं प्रतिदिनं सेवां, कुर्वन् वर्षा अतीत्य सः। दध्यौ स्वाम्यद्य मद्गेहे, यथा गच्छेत् परेण किं? ॥७॥
ध्यायन्निति गृहस्यान्तस्तस्थौ स्वस्थमनाश्चिरम्। मध्याह्ने तु गृहद्वारे, सोऽथ स्थित्वेत्यचिन्तयत् ॥८॥



तत्र गुरुसेवायां जीर्णश्रेष्ठिकथा।

यद्यत्रैष्यति वीरोऽद्य कल्पद्रुरिव जङ्गमः । सम्मुखं तस्य यास्यामि, मूर्द्धबद्धाञ्जलिस्तदा ॥९॥
तं त्रिःप्रदक्षिणीकृत्य, वन्दिष्ये सपरिच्छदः । ततो नेष्ये गृहस्यान्तर्निधानमिव बन्धुरम् ॥१०॥
प्रधानैस्तत्र पानाद्यैः, प्रासुकैरेषणीयकैः । भक्त्या तं पारयिष्यामि, संसाराम्भोधितारकम् ॥११॥
पुनर्नत्वा तु यास्यामि, पदानि कतिचित्ततः । धन्यंमन्यः स्वयं भोक्ष्ये, शेषमुद्धरितं मुदा ॥१२॥
एवं मनोरथश्रेणीं, जिनदत्तस्य कुर्वतः । श्रीवीरोऽभिनवश्रेष्ठिगृहे भिक्षाकृतेऽविशत् ॥१३॥
कुल्माशा दापितास्तेन, चेट्या चटुकहस्तया । सुपात्रदानतस्तत्र, पञ्च दिव्यानि जज्ञिरे ॥१४॥
नृपाद्या मिलितास्तत्र, श्रेष्ठ्यसौ तैः प्रशंसितः । पारयित्वा ततोऽन्यत्र, विहर्तुं प्रभुरप्यगात् ॥१५॥
जिनदत्तो निशम्याथ, ध्वनन्तं देवदुन्दुभिम् । दध्यौ धिग् मामधन्योऽहं, यन्नायान्मद्गृहं प्रभुः ॥१६॥
तत्पुर्यामथ तत्राह्नि, केवली समवासरत् । नृपाद्या एत्य तं नत्वाऽपृच्छन् कः पुण्यवानिह ? ॥१७॥
स प्रोचे जिनदत्तं तं, राज्ञोचेऽनेन नो जिनः । पारणां पारितः किं तु, श्रेष्ठिनाभिनवेन सः ॥१८॥
केवली कथयित्वाऽस्य, भावनां मूलतोऽपि हि । बभाषे भावतोऽनेन, पारितः परमेश्वरः ॥१९॥
अमानं बहुमानं च दधता धीमता तदा । द्वादशस्वर्गसंसर्गयोग्यं कर्म समर्जितम् ॥२०॥
किञ्चान्ययदि नाश्रोष्यत्तदासौ देवदुन्दुभिम् । प्राप्स्यत्ततस्तदैवायं केवलज्ञानमुज्ज्वलम् ॥२१॥
अनेन भावशून्येन, नूतनश्रेष्ठिना पुनः । सुपात्रदानतः प्राप्तं, स्वर्णवृष्ट्यादिकं फलम् ॥२२॥

सद्भक्तिरहितो जीवः, स्याल्लभेतैहिकं फलम् । भक्तिव्यक्त्या पुनर्युक्तः, स्वर्गमोक्षावपि क्षणात् ॥२३॥
जिनदत्तं प्रशस्याथ, ते सर्वेऽगुर्यथागतम् । सुचिरं धर्ममाराध्य, स श्रेष्ठी प्रापदच्युतम् ॥२४॥
एवं जीर्णश्रेष्ठिनः शुद्धदृष्टेः, श्रुत्वा वृत्तं भावसद्भावसारम् ।
भो भो भव्याः ! सद्गुरूणां हि सेवाहेवाकत्वं सन्ततं संश्रयध्वम् ॥२५॥

## ॥ इति जीर्णश्रेष्ठिकथा ॥

इत्युक्तो गुरुशुश्रूषकलक्षणस्य गुरुसेवारूपः प्रथमो भेदः, सम्प्रति अस्यैव द्वितीयं कारण इति भेदं प्रकटयन् गाथोत्तरार्द्धमाह—

**सइ वन्नणाइकरणा अन्नेवि पवत्तए तत्थ ॥५०॥**

'सदा वर्णवादकरणात्' नित्यं सद्भूतगुणोत्कीर्तनेन 'अन्यानपि' प्रमादवतः 'प्रवर्तयति' प्रेरयति पद्मशेखरमहाराजवत्, 'तत्र' तस्यां गुरुसेवायामिति । तत्र प्रवर्तने पद्मशेखर-महाराज-कथा ।

### पद्मशेखरमहाराजकथा चैवम्—

पुरिसुत्तमसयणं सुरयणसहियं किं तु खारगुणरहियं । नीरनिहिनीरसरिसं, पुहइपुरं अत्थि इत्थ पुरं ॥१॥
सुनओ वसणविरहिओ, किंतु जडासंगवज्जिओ समयं । ससिसेहरु व्व सिरिपउमसेहरो नरवरो तत्थ ॥२॥
सो बालभावओ भाविऊण भावेग गहियजिणधम्मो । राईसराईपुरओ, पत्तो पन्नवइ जिणधम्मं ॥३॥

वक्खाणइ जीवदयं, अपमायाओ परूवए मुक्खं । बहुसो बहुमाणेणं, एवं वण्णवइ सया गुरुणो ॥४॥

खन्ता दन्ता संता, उवसंता रागरोसपरिचत्ता । परपरिवायविरत्ता, हुंति गुरू निच्चमपमत्ता ॥५॥

उवसमसीयलसलिलप्पवाहविज्झवियकोहजलणा वि । गाढप्परूढभववियडविडविनिट्ठवणदवदहणा ॥६॥

निज्जियमयणा वि पसिद्धसिद्धिबहुसंगसुक्खतल्लिच्छा । परिचत्तसयलसंगावि सुदिढसंगहियचरणधणा ॥७॥

नीसेसजंतुसंताण पालणे फुरियगरुयकरुणावि । निट्ठुरपमायसिंधुरकुम्भत्थलदलणहरिसरिसा ॥८॥

तथा—

कंसे संखे जीवे, गयणे वाऊ य सारए सलिले । पुक्खरपत्ते कुम्मे, विहगे खग्गे य भारुण्डे ॥९॥

कुंजर वसहे सीहे, नगराया चेव सागरक्खोहे । चंदे सूरे कणगे, वसुंधरा चेव सुहुयहुए ॥१०॥

जिणसमए निद्दिट्ठा, इच्चाइनिदंसणेहिं मुणिवसहा । भावेण तेसि गुणवण्णणंपि नासेइ दुरियभरं ॥११॥

किं च—

माणुस्सं उत्तमो धम्मो, गुरू नाणाइसंजुओ । सामग्गी दुल्लहा एसा, जाणेह हियमप्पणो ॥१२॥

एयारिसो सुहगुरू, धन्नाणं दिट्ठिगोयरमुवेइ । एयस्स सवणसुहयं पियंति वयणामयं धन्ना ॥१३॥

एयस्स महामुणिणो, उवएसरसायणं अकाऊण । होही पच्छायावो, चत्ते पत्ते निहाणि व्व ॥१४॥

इय भणिएणं तेणं, जिणधम्मे ठाविओ बहू लोओ । एगो पुण सिद्धिसुओ, विजओ नामेण इय भणइ ॥१५॥

पवणुद्धुयचेलचलं, चलं मणं कह धरंति ते मुणिणो ? । कह नियनियविसए, धाविराइं रुंधंति करणाइं ॥१६॥
दुहियजियाणं च वहो, जुत्तो जं ते विणासिया इहयं । वेइत्तु निययकम्मं, सुगईए भायणं हुंति ॥१७॥
जं पुण अपमायाओ, मुक्खस्स परूवणं तयं मन्ने । जरहरणे तक्खगमउलिरयणउवएसदाणं व ॥१८॥
इय सो वायालत्तेण धम्मभिमुहंपि मोहए लोयं । नाउं निवेण तब्बोहणत्थमेवं तओ विहियं ॥१९॥
जक्खु त्ति नियपुरिसो, भणिओ जह मह इमं अलंकारं । पक्खिवसु काउ मित्तिं, रयणकरंडंमि विजयस्स ॥२०॥
तेणवि तहेव काउं, विण्णत्तं राइणो तओ इमिणा । पडहगपयाणपुव्वं नयरे घोसावियं एवं ॥२१॥
जो निवआहरणं कहवि लद्धमप्पइ स दोसवं निण्हि । पच्छा से तणुदंडो, इय घोसावित्तु वारतिगं ॥२२॥
सह पउरेहिं सपुरिसा, वुत्ता गिहसोहणंमि अह तेहिं । विजयगिहे तं दिट्ठं, सो पुट्ठो नणु किमेयंति ? ॥२३॥
स भणइ अहं न याणे, चोरियमवि न मुणसि त्ति भणिरेहिं । निवपासे नीओ तेहिं, तेण वज्झो स आणत्तो ॥२४॥
न य तं कोवि मुयावइ, पच्चक्खो तक्करुत्ति तो विजओ । परिचत्तजीवियासो, जक्खं पइ जंपइ सुदीणो ॥२५॥
मित्त ! निवं विण्णविउं, दंडेणं दुक्करेण वि कहंपि । दावेसु जीवियं मे, तो जक्खो भणइ इय निवइं ॥२६॥
देव ! मह मुयसु मित्तं, केणवि दंडेण भणइ तो राया । जइ जाइ हओ सुगइं, मित्तो तुह किं न पडिहाइ ? ॥२७॥
स भणइ सुगईइ अलं, जीवंतो पिच्छए नरो भद्दं । ता देसु पाणभिक्खं, तो निवई भणइ कुविउव्व ॥२८॥
जइ मम पासाओ तिल्लपुण्णपत्तिं गहित्तु बिंदुंपि । अचयंतो सयलपुरे, भमिउं पुण ठवइ मह पुरओ ॥२९॥

ता तुह मुएमि मित्तं, रायाएसं तयं कहइ जक्खो। विजयस्स तेण तंपि हु, पडिवण्णं जीवियासाए ॥३०॥
तत्तो निरूवियाइं, सयलपुरे पउमसेहरनिवेण। पडुपडहवेणुवीणाइ, सद्दउद्दामहरिसाइं ॥३१॥
अइलडहरूवलवणिमसुवेसवेसाविलासकलियाइं। सव्विंदियसुहयाइं, पए पए पिच्छणसयाइं ॥३२॥
सो किर विसेसरसिओ, तेसिं अइमरणभीरुओ तहवि। तिल्लपडिपुण्णपत्तीनिहियमणो भमिय सयलपुरे ॥३३॥
पत्तो नरवरपासे, पुरओ जत्तेण मुत्तुं तं पत्तिं। पडिओ चलणेसु तओ, ईसिं हसिउं निवो भणइ ॥३४॥
अच्चंतचंचलाइं, मणकरणाइं कहं तुमे विजय!। अइवल्लहेसुवि भिसं, पिच्छणगाइसु निरुद्धाइं? ॥३५॥
तेणुत्तं सामिय! मरणभीरुणा अह निवो भणइ जइ ते। एगभवमरणभीएण, सेविओ एवमपमाओ ॥३६॥
ता कह सेवंति न तं, अणंतभवमरणभीरुणो मुणिणो?। इय सोउं पडिबुद्धो, विजओ जाओ पवरसड्ढो ॥३७॥
इय गुरुगुणगणवन्नणपरायणो बोहिउं बहुयलोयं। सो पउमसेहरनिवो, सुगईए भायणं जाओ ॥३८॥

श्रुत्वेति कुग्रहविनिग्रहणैकमन्त्रं श्रीपद्मशेखरनरेश्वरसच्चरित्रम्।
सज्ज्ञानदर्शनचरित्रभृतां गुरूणां, भव्या जना! गुणगणं परिकीर्त्तयन्तु ॥३९॥

## ॥ इति पद्मशेखरमहाराजकथा ॥

इत्युक्तो गुरुशुश्रूषकलक्षणस्य कारण इति द्वितीयो भेदः, साम्प्रतमौषधभेषजसम्प्रगाम इति तृतीयं भेदमभिधित्सुर्गाथापूर्वार्द्धमाह–

ओसहभेसज्जाई सओ य परओ य संपणामेई ।

औषधानि—केवलद्रव्यरूपाणि बहिरुपयोगीनि वा, भेषजानि—सांयोगिकान्यन्तर्भोग्यानि वा, आदिशब्दादन्यान्यपि संयमोपकारकाणि वस्तूनि स्वतः—स्वयं दानेन, परतोऽन्यजनतो दापनेन च सम्यक् प्रणमयति—संपादयति श्रीयुगादिजिनाधीशजीवाभयघोषवद् गुरुभ्य इति शेषः ।

उक्तं च—

"अन्नं पानमथौषधं बहुविधं धर्मध्वजः कम्बलं, वस्त्रं पात्रमुपाश्रयश्च विविधो दण्डादिधर्मोपधिः ।
शस्तं पुस्तकपीठकादि घटते धर्म्माय यच्चापरं, देयं दानविचक्षणैस्तदखिलं मोक्षार्थिने भिक्षवे ॥१॥

तथा—

"जो देइ ओसहाइं, मुणीण मणवयणकायगुत्ताणं । सो सुद्धभावविभवो, भवे भवे होइ नीरोगुत्ति" ॥२॥

तत्र औषधादिसंपादने अभयघोषकथा।

अभयघोषकथा चेयम्—

आसीत् पूर्वविदेहेषु, शत्रुसंहतिदुर्जये । वत्सावत्याख्यविजये, प्रवरा पूः प्रभङ्करा ॥१॥
तस्यां सुविधिवैद्यस्य, सूनुः सत्कर्मकर्मठः । आसीदभयघोषाख्यो, वैद्यविद्याविशारदः ॥२॥
नरेन्द्रमन्त्रिसार्थेशनगरश्रेष्ठिनां सुताः । प्रशस्याः सद्गुणश्रेण्यो वयस्यास्तस्य जज्ञिरे ॥३॥
मिलितानामथामीषामन्येद्युर्वैद्यमन्दिरे । आगादनागाः सद्वृत्तिः साधुर्माधुकरीं चरन् ॥४॥

तं पृथ्वीपालभूपालपुत्रं नाम्ना गुणाकरम् । निकृष्टकुष्टं तं दृष्ट्वा, प्रोचीरे वैद्यनन्दनम् ॥५॥
सदार्थदृग्भिर्वेश्यावत् भवद्भिर्भक्ष्यते जनः । न कस्यचित्तपस्व्यादेश्चिकित्सा क्रियते किल ॥६॥
जगाद वैद्यजन्मापि, चिकित्स्योऽयं मुनिर्मया । भो भद्रा ! निश्चितं किं तु, भेषजानि न सन्ति मे ॥७॥
तेऽप्यूचुर्दद्महे मूल्यं, शाधि साध्यौषधानि नः । उवाच सोऽपि गोशीर्षचन्दनं रत्नकम्बलम् ॥८॥
लक्षद्वयेन तत् क्रेयं, (ग्रं. ५५००) तृतीयं तु मद्गोकसि । विद्यते लक्षपाकाख्यं, तैलं तद् गृह्यतां द्रुतम् ॥९॥
लक्षद्वयं गृहीत्वाऽथ, गत्वा ते कुत्रिकापणे । अयाचन्तौषधे तांस्तु, श्रेष्ठ्यूचे किं प्रयोजनम् ? ॥१०॥
तेऽवोचन् कुष्ठिनः साधोश्चिकित्साऽऽभ्यां विधास्यते । आकर्ण्य तद्वचः श्रेष्ठी चेतस्येवमचिन्तयत् ॥११॥
क्वैषां प्रमादशार्दूलकाननं यौवनं ह्यदः । विवेकबन्धुरा बुद्धिः, क्वचेयं वार्धकोचिता ॥१२॥
मादृशामीदृशं योग्यं जराजर्जरवर्ष्मणाम् । यत् कुर्वन्त्यपि तदहो धन्यैर्भारोऽयमुह्यते ॥१३॥
एवं विचिन्त्य स श्रेष्ठी, ते समर्प्यौषधे मुदा । भावितात्मा प्रवव्राज, वव्राज च महोदयम् ॥१४॥
कृत्वा समग्रसामग्रीं, तेऽग्रिमा भक्तिशालिनाम् । समं वैद्यवरेण्येन, प्रययुः साधुसन्निधौ ॥१५॥
नत्वाऽनुज्ञाप्य तैलेन, सर्वाङ्गं म्रक्षितः स तैः । वेष्टितः कम्बलेनाथ, निरीयुः कृमयस्ततः ॥१६॥
शीतत्वात्तत्र ते लग्ना निर्यद्भिस्तैः प्रपीडितः । लिप्तश्च चन्दनेनाशु, स्वास्थ्यमाप मुनिः क्षणात् ॥१७॥
त्रिरेवमाद्यवेलायां, निर्ययुः कृमयस्त्वचः । मांसगास्तु द्वितीयस्यां, तृतीयस्यां च तेऽस्थिगाः ॥१८॥

तान् कृमींस्ते दयावन्तश्चिक्षिपुर्गोकलेवरे । संरोहण्या च तं साधुं, सद्यः सज्जीप्रचक्रिरे ॥१९॥
क्षमयित्वा च नत्वा च, गत्वाऽन्तर्नगरं ततः । चैत्यं चक्रुश्च विक्रीय, तेऽर्द्धमूल्येन कम्बलम् ॥२०॥
गृहीत्वा गृहिधर्मं च, पश्चात् कृत्वा च संयमम् । ते पश्चाप्यच्युतेऽभूवन्निन्द्रसामानिकाः सुराः ॥२१॥
ततश्च्युत्वा विदेहेषु, भूत्वा पश्चापि सोदराः । ते प्रव्रज्य च सर्वार्थसिद्धेऽभूवन् सुरोत्तमाः ॥२२॥
ततोऽप्यभयघोषस्य जीवश्च्युत्वाऽत्र भारते । बभूव भव्यसन्दोहबोधनः प्रथमो जिनः ॥२३॥
शेषास्तु भरतो बाहुबलिर्ब्राह्मी च सुन्दरी । जज्ञिरे तदपत्यानि प्रापुश्च परमं पदम् ॥२४॥

एवं निशम्याभयघोषवृत्तं मुदा गुरूणां गुणराजिभाजाम् ।
दाने सदाप्यौषधभेषजादेः कृतोद्यमा भव्यजना ! भवन्तु ॥२५॥

## ॥ इत्यभयघोषकथा ॥

इत्युक्तो गुरुशुश्रूषकस्य औषधभेषजसम्प्रणाम इति तृतीयो भेदः, सम्प्रति भाव इति चतुर्थं भेदं विवरीषुर्गाथोत्तरार्द्धमाह–

**सइ बहु मन्नेइ गुरुं भावं चणुवत्तए तस्स ॥५९॥**



'सदा बहु मन्यते' मनःप्रीतिसारं श्लाघते 'गुरुम्' उक्तस्वरूपं सम्प्रतिमहाराजवत् । 'भावं च' चेतोवृत्तिं 'अनुवर्तते' तदनुकूलं व्यवहरति तस्य गुरोः संबन्धिनं तत्सम्मतमेवाचरतीति तत्त्वम् ।

उक्तं च—

"सरुषि नतिः स्तुतिवचनं, तदभिमते प्रेम तद्द्विषि द्वेषः। दानमुपकारकीर्तनममूलमन्त्रं वशीकरणम्" ॥ इति ।

सम्प्रतिमहाराजनिदर्शनं त्वेवम्—

अत्थि पुरी उज्जइणी, सिरीहिं अलयं पुरिंपि उज्जइणी । तत्थ निवनिवहसेवियपयजुयलो संपइनरिंदो ॥१॥
जीवंतसामिपडिमं, अप्पडिमं वंदिउं कयावि तहिं । पत्तो भवतरुहत्थी, गुरु सुहत्थी सपरिवारो ॥२॥
तइया चउविहआउज्जसज्जपिच्छणयजणियजणहरिसो । ठाणे ठाणे पायडियपयडपुरनारिहल्लीसो ॥३॥
सद्धाबंधुरभवियणपयपयकयलगुडरासमणहरणो । चउदिसिसु साविगागिज्जमाणसुमहल्लमंगल्लो ॥४॥
रहिएहि व भविएहिं, सणियं पगडिज्जमाणओ पुरओ । पइहट्टं पइभवणं, गरुयं पूयं पडिच्छंतो ॥५॥
अणुगम्मंतो गुरुणा, सुहत्थिणा सयलसंघसहिएण । भमिरो तत्थ जिणरहो, पत्तो निवभवणदारंमि ॥६॥
अह राया निज्जूहे, सकम्मविवरि व्व वट्टमाणो सो । दट्ठुं सुहत्थिसूरिं, तुट्ठमणो चिंतए चित्ते ॥७॥
मन्ने कत्थवि दिट्ठो, एस मुणिंदो मया दयाभवणं । जं मह मणजलनिहिणो, इंदु व्व जणेइ उल्लासं ॥८॥
इय चिंतिरस्स तस्स, सुभासुरं जाइसरणमुप्पन्नं । तो मुत्तु सव्वकज्जे, पत्तो गुरुचरणनमणत्थं ॥९॥
नमिउं गुरुणो पुच्छइ, जिणधम्मो किंफलो भणइ सूरी । सो सग्गमुक्खफलओ, पुच्छेइ पुणोवि नरनाहो ॥१०॥
किं फलमवत्तसामाइयस्स रज्जाइ संसइ मुणिंदो । तो तुट्ठो भणइ निवो, किं उवलक्खेह मं भयवं ? ॥११॥

तयणु अणुत्तरसुयनाणसुद्धउवओगओ मुणिय सूरी । जंपइ संपइ नरवर !, आसि पुरा मज्झ तं सीसो ॥१२॥

तथाहि—

कइयावि मासकप्पेण, विहरमाणा समं महागिरिणा । अम्हे कोसंबिपुरिं, पत्ता दुब्भिक्खकालंमि ॥१३॥
संकडभावा वसहीण, बहुयभावेण मुणिजणस्स तहा । सिरिअज्जमहागिरिणो, वयं च वसहीसु वीसु ठिया ॥१४॥
सुत्तत्थपोरिसिकमेण भिक्खवेलाइ साहुसंघाडो । अम्हं कम्मिवि ईसरगिहम्मि भिक्खत्थमणुपत्तो ॥१५॥
अत्ताणं सत्ताणं मन्नंतेणं च तेण धणवइणा । भत्तीइ भत्तपाणं पउरं उवढोइयं तस्स ॥१६॥
दिट्ठं च तमेगेणं, भिक्खयरेणं तहिं पविट्ठेणं । चिंतियमिमिणा समणा अहो ! अहो ! पुण्णमाहप्पं ॥१७॥
तुच्छे भिक्खयरत्ते, इमे सउण्णा लहंति सव्वत्थ । अहयं तु पुण्णरहिओ, लहेमि जइ नवरमक्कोसो ॥१८॥
इय चिंतिय सो लग्गो, मुणीण मग्गंमि मग्गए बहुसो । भयवं ! तुब्भे सव्वत्थ, लहह तो देह मह किंचि ॥१९॥
तो मुणिवरेहिं भणियं, भो भद्द ! न अम्ह संतियं भत्तं । अम्ह इमस्स य पहुणो, गुरुणो चिट्ठंति वसहीए ॥२०॥
तेणासाविवसेणं, वसहिं आगंतु जाइया अम्हे । साहूहि वि णे कहिओ, सव्वोवि हु मग्गवुत्तंतो ॥२१॥
तो नाउं सुएण वयं, भाविं पवयणसमुण्णइकरं तं । सामाइयसुत्तपयाणपुव्वगं झत्ति दिक्खिसु ॥२२॥
भोयविओ जहिच्छमणुण्णमाहारमह निसाए सो । सुद्धमणो गू(गा)ढविसूइयाइ पंचत्तमणुपत्तो ॥२३॥
सिरिचंदगुत्तसुयबिंदुसारतणुरुहअसोगसिरिरण्णो । पियपुत्तस्स कुणालस्स एस तं नंदणो जाओ ॥२४॥

इय सोऊणं राया, बहुबहुमाणुल्लसंतरोमंचो । भालत्थलमिलियकरो, एवं थुणिउं समाढत्तो ॥२५॥

जय जय नाणदिवायर !, परोवयारिक्कपच्चल ! मुणिंद ! । गुरुकरुणारससायर ! नमो नमो तुज्झ पायाणं ॥२६॥

दारिद्दअमुद्दसमुद्दमज्झनिवडंतजंतुपोयाणं । गुरुकरुणारससायर ! नमो नमो तुज्झ पायाणं ॥२७॥

सग्गापवग्गमग्गाणुलग्गजणसत्थवाहपायाणं । गुरुकरुणारससायर ! नमो नमो तुज्झ पायाणं ॥२८॥

चक्कंकुसझसवरकलसकुलिसकमलाइलक्खणजुयाणं । गुरुकरुणारससायर ! नमो नमो तुज्झ पायाणं ॥ २९ ॥

इय थोउं सो गुरुणो, गिहिधम्मं गहिय सगिहमणुपत्तो । सव्वत्थवि नियरज्जे, रहजत्ताओ पवत्तेइ ॥३०॥

जह सुमरिय रंकत्तं, सत्तागारा कराविया तेण । जह बोहिया अणज्जा, तहा निसीहाउ नेयव्वं ॥३१॥

जिणसासणं पभाविय, सुइरं सुगुरूसु बहुमाणपरो । सो संपइनरनाहो, जाओ वेमाणिओ सुसुरो ॥३२॥

इत्यवधार्य्य सुधर्मविचारं, सम्प्रतिभूपतिवृत्तमुदारम् ।
सद्गुरुषु प्रहताखिलमानं, भव्यजना ! दधतां बहुमानम् ॥३३॥

॥ इति सम्प्रतिमहाराजनिदर्शनम् ॥

इत्युक्तो गुरुशुश्रूषकलक्षणस्य भाव इति चतुर्थो भेदः, तदुक्तौ च समर्थितं सप्रभेदं गुरुशुश्रूषक इति पञ्चमभावश्रावकलक्षणम् । सम्प्रति तदेव प्रवचनकुशल इति षष्ठमाह—

**सुत्ते अत्थे य तहा, उस्सग्गववायभाववववहारे । जो कुसलत्तं पत्तो, पवयणकुसलो तओ छद्धा ॥५२॥**

इह प्रकृष्टं वचनं प्रवचनम्—आगमः, स च सूत्रादिभेदात् षोढा, अतस्तदुपाधिकं कौशलमपि षोढा, तत्सम्बन्धात् कुशलोऽपि षोढै-वेत्याह—'सूत्रे' सूत्रविषये यः कुशलत्वं प्राप्त इति प्रत्येकं योजनीयम्। तथा 'अर्थे' सूत्राभिधेये, 'चः' समुच्चये, 'तथा' तेनैव प्रकारेण उत्सर्गे—सामान्योक्तौ, 'अपवादे' विशेषभणिते, 'भावे' विधिसारधर्मानुष्ठानकरणस्वरूपे, 'व्यवहारे' गीतार्थाचरितरूपे, सूत्रे समाहारस्यै-कत्वेऽपि सप्तम्या पृथग् व्याख्यानं बालावबोधनार्थम्। एतेषु यः कुशलत्वं प्राप्तः—सद्गुरूपदेशादेव प्रवचनकुशलः 'तउ' त्ति स भवति 'षोढा' षट्प्रकार इति गाथाक्षरार्थः।

६ प्रवचन कुशल इति भावश्रावक-लक्षणम्।

सम्प्रत्यस्यैव षष्ठलक्षणस्य भावार्थं विवरीषुराद्यभेदं गाथाप्रथमपादेनाह—

उचियमहिज्जइ सुत्तं

'उचितं' योग्यं श्रावकभूमिकाया 'अधीते' पठति 'सूत्रं' प्रवचनमात्रादि षड्जीवनिकान्तम्।

उक्तं च—

"पवयणमाई छज्जीवणियं ता उभयओवि इयरस्स"। ग्रहणशिक्षेति तत्र प्रकृतम्। उभयतः—सूत्रतोऽर्थतश्च—इतरस्य श्रावकस्येति सूत्रग्रहणमुपलक्षणम्, तेनान्यदपि पञ्चसंग्रहकर्मप्रकृतिप्रभृतिकं शास्त्रसन्दोहं गुरुप्रसादीकृतं निजप्रज्ञानुसारेण जिनदासवत् पठतीति।

तत्र सूत्राध्ययने जिनदास-कथा।

तत्कथा चैवम्—

अच्छरसोहजुयाए, अणिमिसकलियाइ हरिसहाइव्व। उवगूढा जउणनईइ, अत्थि इह पुरवरी महुरा॥१॥

समुचियससुत्तअज्झयणरज्जुसंजमियचवलमणपवगो। सिट्ठी जिणदासो तत्थ, साहुदासी पिया तस्स॥२॥

तेहिं पच्चक्खायं, सव्वस्स चउप्पयस्स जा जीवं । गिण्हंति गोरसं पइदिणंपि गोउलियहत्थाओ ॥३॥
जाया सिणेहवुड्ढी, अनुन्नं तेसिं इंतजंताणं । कइयावि विवाहमहे, गोवेहिं निमंतिओ सिट्ठी ॥४॥
आउलभावेण सयं, तत्थ न सिट्ठी गओ परं तेसिं । बहुवेसवारलंकारसारचीराइं अप्पेइ ॥५॥
पत्ता गुरुई सोहा, तेहिं हिट्ठेहिं सिट्ठिणो दुन्नि । कंबलसंबलभिहाणा गोणजुवाणा समुवणीया ॥६॥
सो जंपइ मह नियमो, चउप्पयाणं तओ बलावि इमे । ते गोणे सिट्ठिगिहे, बंधित्तुं गया सठाणंमि ॥७॥
चिंतइ सिट्ठी एए, जइ बाहिं मुच्चिहं तओ लोओ । वाहिस्सए जहिच्छं सुहेण इत्थेव चिट्ठंतु ॥८॥
सययं पोसइ फासुयचारीखाणेण गलियपाणेण । अट्ठमिचउद्दसीसुं, उववासं कुणइ जिणदासो ॥९॥
वाएइ पुत्थयं तह, अपुव्वमहिज्जए पइदिणंपि । तं सोउं ते सन्नी, उवसंता भद्दया जाया ॥१०॥
जं दिवसं जिणदासो, विगयपिवासो न भोयणं कुणइ । तंमि दिणे सुद्धमणा, आहारं तेवि वज्जंति ॥११॥
सिट्ठिस्स तेसु जाओ, बहुमाणो समहिओ सिणेहो य । भविया उवसंतप्पा भद्दगभाव त्ति काऊण ॥१२॥
सावयमित्तेण कयावि, नियय्गंतीइ जोइउं एए । नीया अपुच्छिऊणं, भंडीरमणस्स जत्ताए ॥१३॥
अन्नस्स नत्थि खलु एरिस त्ति विम्हियमणेण तेण इमे । अन्नन्नेहिं सद्धिं वसहेहिं वाहिया बहुयं ॥१४॥
ते सुकुमाला तुट्टा, सिट्ठिगिहे तेण आणिउं बद्धा । न चरंति नेव नीरं, पिबंति पीडाविहुरदेहा ॥१५॥
तो नायवइयरेणं, झूरेउं सिट्ठिणा बहुपयारं । विहिणाणसणं कारिय, दिन्नो तेसिं नमुक्कारो ॥१६॥

तो मरिउं सुहभावा, नागकुमारा महिड्डिया जाया । अज्झयणझाणपवरो, सिट्ठीवि गओ मरिय सुगइं ॥१७॥
एवं च सूत्राध्ययनोद्यतोऽभूत्, परोपकारैर्जिनदास उच्चैः ।
विश्वप्रकाशैकसहस्रभानौ, तदत्र भव्याः ! कुरुत प्रयत्नम् ॥१८॥

॥ इति जिनदासकथा ॥

इत्युक्तः प्रवचनकुशलस्य सूत्रकुशल इति प्रथमो भेदः, सम्प्रत्यर्थकुशल इति द्वितीयं भेदं व्याचिख्यासुर्गाथापूर्वार्द्धस्य द्वितीयं पादमाह—

सुणइ तयत्थं तहा सुतित्थंमि ।

'शृणोति' आकर्णयति 'तदर्थं' सूत्रार्थं 'तथा' तेनैव प्रकारेण स्वभूमिकौचित्यरूपेण 'सुतीर्थे' सुगुरुमूले । यत आह—
"तित्थे सुत्तत्थाणं, गहणं विहिणा उ इत्थ तित्थमिणं । उभयन्नू चेव गुरू, विही उ विणयाइओ चित्तो" ॥ इत्यादि ॥
अत्रायमाशयः–ऋषिभद्रपुत्रवत् संविग्नगीतार्थगुरुसमीपश्रवणसमुत्पन्नप्रवचनार्थकौशलेन भावश्रावकेण भाव्यमिति ।

ऋषिभद्रपुत्रकथा चैवम्—

इत्थेव जंबुदीवे, भारहवासस्स मज्झिमे खंडे । अत्थि पुरी आलभिया, न कयावि अरीहि आलभिया ॥१॥
सुगुरुप्पसायउल्लसियविमलबहुपवयणत्थकोसल्लो । इसिभद्दपुत्तनामो, सड्ढो तत्थासि सुवियड्ढो ॥२॥



तत्र प्रवच-
नार्थ कौशले
ऋषिभद्र-
पुत्रकथा।

अन्नेवि तत्थ निवसंति, सावया आवयासु दढधम्मा । इसिभद्दसुओ कइयावि तेहिं मिलिएहिं इय पुट्ठो ॥३॥
भो ! भो ! देवाणुपिया !, देवाण ठिई कहेसु अम्हाणं । सोवि हु पवयणभणियत्थसत्थकुसलो इय भणेइ ॥४॥
असुरा नागा विज्जू, सुवन्न अग्गी य वाउ थणिया य । उदही दीव दिसा विय, दसहा इह हुंति भवणवई ॥५॥
पिसाय भूया जक्खा य, रक्खसा किन्नरा य किंपुरिसा । महोरगा य गंधव्वा, अट्ठविहा वाणमंतरिया ॥६॥
ससि रवि गह नक्खत्ता, तारा जोइसिय पंचहा देवा । वेमाणिया य दुविहा, कप्पगया कप्पतीया य ॥७॥

तत्र कल्पगताः—

सोहम्मीसाणसणंकुमारमाहिंदबंभलंतगया । सुक्कसहस्साराणयपाणयआरणयअच्चुयजा ॥८॥

कल्पातीतास्त्विमे—

सुदरिसणसुप्पबद्धं, मणोरमं सव्वभद्दसुविसालं । सोमणसं सोमाणसपीइकरं चेव नंदिकरं ॥९॥
विजयं च वेजयंतं, जयंतमपराजियं च सव्वट्ठं । एएसु जे गया ते, कप्पाईया मुणेयव्वा ॥१०॥
चमरबलि अयरमहियं, दिवड्ढपलियं तु सेसजं माणं । आउं दो देसूणुत्तराग पलियं वणयराणं ॥११॥
पलियं सवासलक्खं, सवाससहस्सं च पलियमद्धं च । चउभागो य कमेणं, ससिरविगहरिक्खताराणं ॥१२॥
दो साहि सत्त साहिय दस चउदस सतर अयर जा सुक्को । इक्किक्काहिग तदुवरि, तित्तीसं अणुत्तरेसु परं ॥१३॥
दसवरिससहस्साइं, भवणवणेसु ठिई जहन्ना उ । पल्लचउभागो चंदाइचउसु तारेसु अडभागो ॥१४॥

पलियं अहियं दो अयर साहिया सत्त दस य चउदस य । सतरस जा सहस्सारे तदुवरि इग अयरवुड्ढि त्ति ॥१५॥
अह जन्तुक्कोसठिई, अयरा तित्तीस हुंति सव्वट्ठे । इत्तो परेण देवा, देवाण ठिई य वुच्छिन्ना ॥१६॥
इसिभद्दपुत्तकहियं, इणमट्ठं सुट्ठियंपि ते सड्ढा । सव्वे असद्दहंता, नियनियगेहेसु संपत्ता ॥१७॥
सुपभूयभत्तिआहूयपवरपुरुहूयवहुसमूहनओ । अह तत्थ वीरसामी, चामीयरसमपहो पत्तो ॥१८॥
सिरिपवयणउच्छप्पणपुव्वं जयतायपायनमणत्थं । इसिभद्दपुत्तसहिया, ते सव्वे सावया पत्ता ॥१९॥
काउं पयाहिणतिगं, सुभत्तिजुत्ता नमित्तु ते सामिं । निसियंति उचियदेसे, इय धम्मं कहइ भुवणगुरू ॥२०॥
भो भविया ! अइदुलहं, नरजम्मं लहिय उज्जमह सययं । अण्णाणहणणमल्ले, पवयणभणियत्थकोसल्ले ॥२१॥
इय आयण्णिय धम्मं, ते सड्ढा विन्नवंति जयपहुणो । तं देवठिइविसेसं, सव्वं इसिभद्दसुयकहियं ॥२२॥
तो संसइ संसयरेणुपुंजहरणे समीरणो सामी । भो भद्दा ! देवठिइं, एमेव अहंपि जंपेमि ॥२३॥
इय सोउं ते सड्ढा, इसिभद्दसुयं सुयत्थकुसलमइं । खामित्तु नमित्तु पहुं, संपत्ता नियनियगिहेसु ॥२४॥
इयरोवि वंदिय जिणं, पुच्छिय पसिणाइं सगिहमणुपत्तो । वरकमलुव्व पहूवि हु, अन्नत्थ सुवासए भविए ॥२५॥
सम्ममिसिभद्दपुत्तो, चिरकालं पालिऊण गिहिधम्मं । कयमासभत्तचाओ, जाओ सोहम्मसग्गसुरो ॥२६॥
अरुणाभंमि विमाणे, चउपलियाइं तहिं सुहं भुत्तुं । चविय विदेहे पवयणकुसलो होउं सिवं गमिही ॥२७॥

**एवं निशम्य सम्यग् भव्या ! ऋषिभद्रपुत्रसुचरित्रम् । भवत भवतापहारिषु कुशलधियः प्रवचनार्थेषु ॥२८॥**

तत्र प्रवचनार्थकौशले ऋषिभद्र-पुत्रकथा।

इति ऋषिभद्रपुत्रकथा ॥

इत्युक्तः प्रवचनकुशलस्य अर्थकुशल इति द्वितीयो भेदः, साम्प्रतमुत्सर्गापवादकुशलाभिधानौ तृतीयचतुर्थभेदौ युगपदभिधित्सु-र्गाथोत्तरार्द्धमाह—

उस्सग्गववायाणं विसयविभागं वियाणाइ ॥५३॥

'उत्सर्गापवादयोः' जिनप्रवचनप्रतीतयोः, 'विषयविभागं' करणाकरणप्रस्तावं विशेषेण जानाति—अवगच्छति। अयमत्राभिप्रायः—नोत्सर्गमेव केवलमालम्बते, नाप्यपवादमेव प्रमाणीकरोति, किं तर्हि ? अचलपुरश्रावकसमुदायवत् तयोरवसरमवबुध्यते।

उक्तश्च—

"उन्नयमविक्ख निन्नस्स, पसिद्धी उन्नयस्स इयरा उ। इय अन्नुन्नपसिद्धा, उस्सग्गववाय दो तुल्ला" ॥

ज्ञात्वा च यथाऽवसरं तयोर्विषये स्वल्पव्ययबहुलाभां प्रवृत्तिमातनोतीति।

अचलपुरश्रावकसमुदायकथा चेयम्—

बहुभद्दसालभावेण, पउरसोमणससंगयत्तेण। निज्जिणियकणयअचलं, अचलपुरं अत्थि वरनयरं ॥१॥
तत्थ त्थि जइणपवयणपभावणाकरणपवणमणकरणा। उस्सग्गववायविऊ, बहवे सुमहड्डिया सड्ढा ॥२॥
कन्नाविन्नानइअंतरंमि तत्थेव तावसा बहवे। निवसिंसु तत्थ एगो, विसारओ पायलेवंमि ॥३॥

सो पयलेवबलेणं, निच्चं संचरइ सलिलपूरेवि । थलमग्गे इव धणियं, जणयंतो विम्हयं लोए ॥४॥
तं दट्ठुं मुद्धजणो, दुस्सहमिच्छत्ततावसं तत्तो । महिसो विव तद्दंसणपंके निस्संकमणुपत्तो ॥५॥
जह पच्चक्खं अम्हाण, सासणे दीसए गुरुपहावो । न तहा तुम्हं इय सो, धिट्ठो धरिसेइ सड्ढजणं ॥६॥
मिच्छत्तथिरीकरणं, मा मुद्धाणं हवेउ इय सड्ढा । उस्सग्गपयं लीणा, तं दिट्ठीएवि न नियंति ॥७॥
अह मउलियकुमयपमोयकइरवो वइरसामिमाउलओ । सिरिअज्जसमियसूरी, सूरु व्व समागओ तत्थ ॥८॥
सव्विड्ढीए सव्वेवि, सावया ते लहुं समागम्म । भूमिलियमउलिकमला, गुरुपयकमलं नमंसंति ॥९॥
वाहजलुल्लियनयणा, सुदीणवयणा य निययतित्थस्स । संसंति तावसकयं, तामसमसमंजसं सव्वं ॥१०॥
अह भणइ गुरू सड्ढा !, अवियड्ढजणं इमो कवडबुद्धी । केणावि पायलेवप्पमुहपयारेण वंचेइ ॥११॥
न हु कावि तवोसत्ती, तवस्सिणो तावसस्स एयस्स । तं सोउं ते सड्ढा, वंदिय गुरुणो गया सगिहं ॥१२॥
अववायकरणसमयं, नाउं ते सावया विमलमइणो । अह तं तावसमइआयरेण भुत्तुं निमंतंति ॥१३॥
सोवि हु बहुलोयजुओ, पत्तो एगस्स सावगस्स गिहे । तं दट्ठुं समयन्नू, सहसा अब्भुट्ठए सोवि ॥१४॥
उववेसिय भणइ इमं, पक्खालावेसु नियपयपउमं । न हवइ गरुएसु धुवं, अत्थीणं पत्थणा विहला ॥१५॥
तस्स अणिच्छंतस्सवि, पाए पाऊयउसिणनीरेण । तह सो धोयइ जह तत्थ, लेवगंधोवि न हु ठाइ ॥१६॥
गरुयपडिवत्तिपुव्वं, तं भुञ्जावइ न सो पुणो मुणइ । भोयणआसायंपि हु, भाविविगोवणभएण भिसं ॥१७॥

६ प्रवचन-
कुशल इति
भावश्रावक-
लक्षणम् ।

तत्र उत्सर्गा
पवादकौश-
ले अचलपु-
रश्रावकस-
मुदायकथा।

जलथंभकूडदंसणसमुस्सुएणं जणेण परियरिओ । सरियातीरं पुगरत्ति, जिमिउं सो तावसो पत्तो ॥१८॥
अज्जवि य लेवअंसो, कोवि हवित्ति त्ति चिंतिय पविट्ठो । नइतीरे लहु बुड्डो, पकुणंतो बुडबुडारावं ॥१९॥
किच्चिरमम्हणा मायाविणा वयं वंचियत्ति चिंतंता । मिच्छत्तिणोवि जाया, तयाऽणुरत्ता जइणधम्मे ॥२०॥
तक्कालं तुमुलकरे, नयरजणे तह य दत्ततालंमि । पत्ता समियायरिया, फुरंतबहुजोगसंजोगा ॥२१॥
काउमणा जिणसासणपभावणं सरियअंतरालंमि । जोगविसेसं खिवित्तिउं, लोयसमक्खं इय भणिंसु ॥२२॥
विण्णे ! तुह परतीरे, गंतुं वयमिच्छिमो तओ झत्ति । तत्तडदुगंपि मिलियं, सायं चिंचादलजुयं व ॥२३॥
तत्तो अमंदआणंदपुण्णचउवण्णसंघपरियरिया । सिरिअज्जसमियगुरुणो, परतीरभुवं समणुपत्ता ॥२४॥
ते तावसा निएउं, आयरियं पयासियप्पभावं तं । सव्वे गयमिच्छत्ता, तेसिं समीवे पवज्जिंसु ॥२५॥
ते बंभदीवनिवासिणु त्ति तेसिं पहाणवंसम्मि । बंभदीवगनामा, समणा सुयविस्सुया जाया ॥२६॥
इय समियकुमयतावा, भवियणमणनयगसिहिपमोयकरा । नवजलहरसारिच्छा, गुरुणो अन्नत्थ विहरिंसु ॥२७॥
ते सावयावि सुइरं, सिरिजिणवरपवयणं पभावित्ता । परिपालियगिहिधम्मा, सुगईए भायणं जाया ॥२८॥
इत्युत्सर्गापवादद्वयकुशलधियो दग्धमिथ्यात्वकक्षा, विस्फूर्जद्धर्मलक्ष्या अचलपुरवरश्रावकाः सुष्ठुदक्षाः ।
श्रीमत्तीर्थेशतीर्थस्वपरहितकरोत्सर्पणायै बभूवुस्तस्माद् भव्या! विवेकद्रुमघनसलिलं कौशलं तत्र धत्त ॥२९॥

॥ इत्युत्सर्गापवादलक्षणगुणद्वयेऽप्यचलपुरश्रावकसमुदायकथा ॥

इत्युक्तः प्रवचनकुशलस्योत्सर्गापवादौ तृतीयचतुर्थभेदौ, सम्प्रति विधिसारानुष्ठान इति पञ्चमं भेदं प्रकटयन् गाथापूर्वार्द्धमाह–

**वहइ सइ पक्खवायं विहिसारे सव्वधम्मणुट्ठाणे।**

'वहति' धत्ते सदा 'पक्षपातं' बहुमानं 'विधिसारे' विधानप्रधाने 'सर्वधर्मानुष्ठाने' देवगुरुवन्दनादौ। इदमुक्तं भवति–विधिकारिणमन्यं बहु मन्यते, स्वयमपि सामग्रीसद्भावे यथाशक्ति विधिपूर्वकं धर्मानुष्ठाने प्रवर्तते, सामग्र्यभावे पुनर्विध्याराधनमनोरथान्न मुञ्चति, एवमप्यसावाराधकः स्याद्, ब्रह्मसेनश्रेष्ठिवत्।

तत्कथा चेयम्—

गंगाविभूषिता नन्दिकलिता वृषभासिता। शंभुमूर्तिरिवात्रास्ती पुरी, वाणारसी वरा ॥१॥
दारिद्र्यमुद्रितस्तत्र, ब्रह्मसेनोऽभवद् वणिक्। यशोमती च तत्पत्नी, सोऽन्यदाऽगाद् बहिः पुरात् ॥२॥
भव्यानां धर्ममाख्यान्तं, दृष्ट्वोद्यानगतं मुनिम्। प्रणम्य मुदितः श्रेष्ठी, निषसाद तदन्तिके ॥३॥
मुनिराख्यदहो भव्या !, यावज्जीवोऽयमेजति। तावदाहारमादत्ते, तावत् कर्माणि चार्जयेत् ॥४॥
ततोऽप्यनन्तदुःखानि, सहते दुःसहान्यसौ। तस्मात् सुखैषिणाऽऽहारगृद्धिस्त्याज्या मनीषिणा ॥५॥
श्रेष्ठ्यथाख्यदशक्योऽयमुपदेशः प्रभो ! ननु। मुनिः प्रोचे गृहस्थानामस्ति भोः ! पौषधव्रतम् ॥६॥
तत्राहाराङ्गसत्काराब्रह्मव्यापारवर्जनम्। देशतः सर्वतो वापि, कर्तव्यं द्विविधं त्रिधा ॥७॥
यावत्कालमिदं धन्यो, बिभर्ति श्रावको व्रतम्। तावत्कालं स विज्ञेयो, यत्याचारानुपालकः ॥८॥



तत्र विधि-
सारानुष्ठाने
ब्रह्मसेनश्रे-
ष्ठिकथा।

श्रुत्वेत्यत्रान्तरे कश्चिच्छ्राद्धः क्षेमङ्कराभिधः । बभाषे पौषधाख्येन, व्रतेनानेन मे कृतम् ।।९।।
श्रेष्ठ्यूचेऽथ मुनिं नत्वा, किं विद्वेषोऽस्य पौषधे ? । प्रकृत्या भद्रकस्यापि, जातस्य श्रावके कुले ।।१०।।
मुनिः स्माह भवादस्मात्, तृतीयेऽयं भवेऽभवत् । नगर्यां किल कौशाम्ब्यां क्षेमदेवाभिधो वणिक् ।।११।।
भ्रातरौ तत्र चाभूतां, महेभ्यौ श्रावकोत्तमौ । जिनदेवाभिधो ज्येष्ठो, धनदेवः कनिष्ठकः ।।१२।।
कुटुम्बभारमारोप्य, जिनदेवोऽन्यदाऽनुजे । पौषधं पौषधागारे, प्रत्यहं विधिना व्यधात् ।।१३।।
अन्यदा पौषधस्थस्य, तस्योत्पेदेऽवधिस्ततः । ज्ञात्वा ज्ञानोपयोगेन, सोऽवादीदनुजं यथा ।।१४।।
वत्सावशिष्टमायुस्ते, नूनं जाने दिनान् दश । विधेहि बान्धव ! स्वार्थं, सावधानमना भृशम् ।।१५।।
धनदेवस्ततः कृत्वा, चैत्ये पूजां गरीयसीम् । दत्त्वा दानं च दीनानामदीनो निर्निदानकम् ।।१६।।
सङ्घं च क्षमयित्वाऽसौ, विधायानशनं सुधीः । तृणसंस्तारके तस्थौ, स्वाध्यायध्यानतत्परः ।।१७।।
क्षेमदेवोऽथ तत्रैत्य तमूचे भोः ! कथं भवेत् ? । गृहस्थस्य ससङ्गत्वादवधिज्ञानमीदृशम् ।।१८।।
अथैतदपि चेत् सत्यं, भवेद् भद्र ! ततो भृशम् । ग्रहीष्ये पौषधं ज्ञानभानोः पूर्वाचलोपमम् ।।१९।।
धनदेवोऽथ तत्राह्नि, स्मरन् पञ्चनमस्क्रियाम् । विपद्य द्वादशे कल्पे, इन्द्रसामानिकोऽजनि ।।२०।।
कलेवरस्य तस्याशु, यथासन्निहितामरैः । गन्धाम्बुपुष्पवृष्ट्याद्यैश्चक्रे तुष्टैर्महामहः ।।२१।।
क्षेमदेवोऽपि वीक्ष्यैतदीपच्छ्रद्धालुतां दधत् । पौषधं प्रायशश्चक्रे, धर्मकामो यदा तदा ।।२२।।

कृत्वाऽऽषाढचतुर्मासे, सोऽन्यदा पौषधव्रतम् । तमस्विन्यां तपस्तापक्षुत्तृडार्त्तो व्यचिन्तयत् ॥२३॥
अहो ! दुःखमहो ! दुःखं, क्षुत्तृड्घर्मादिसम्भवम् । एवमार्त्याऽतिचर्यासौ, पौषधं हि ततो मृतः ॥२४॥
व्यन्तरेषु सुरो भूत्वा, सोऽभूत् क्षेमङ्करो ह्ययम् । यत् पौषधान्मृतः प्राक् तत्, त्रस्तोऽद्यापि तदाख्यया ॥२५॥
ब्रह्मसेन इति श्रुत्वा, प्रणिपत्य पुनर्मुनिम् । पौषधव्रतमादाय, धन्यंमन्यो ययौ गृहम् ॥२६॥
ततः प्रभृति स श्रेष्ठी, सुखेन प्राप्तजीविकः । कियत्कालमतीयाय, कुर्वाणः पौषधव्रतम् ॥२८॥
अन्यदा तत्पुराधीशे, मृतेऽकस्मादपुत्रिणि । पुरेऽरिभिर्भज्यमाने श्रेष्ठ्यनेशत्समानुषः ॥२८॥
गत्वा मगधदेशेषु, ग्रामे प्रत्यन्तवर्तिनि । कस्मिन्नाजीविकाहेतोरध्युवास विधेर्वशात् ॥२९॥
एकदा स तु सम्प्राप्ते, चतुर्मासकपर्वणि । धर्मानुष्ठानकरणे लालसो ध्यातवानिति ॥३०॥
अहो ! मे हीनपुण्यत्वमहो ! मे विधिवक्रता । यदहं न्यपतं स्थाने, साधुसाधर्मिकोज्झिते ॥३१॥
अभविष्यदर्हच्चैत्यमत्र चेत् तत् तदा मुदा । विधिसारमवन्दिष्ये, द्रव्यतो भावतोऽपि च ॥३२॥
गुरवोऽप्यभविष्यंश्चेदत्र सर्वत्र निःस्पृहाः । अदास्यं द्वादशावर्तवन्दनं तत्तदंह्रिषु ॥३३॥
एवं विचिन्त्य स श्रेष्ठी, श्रेष्ठधीर्गृहकोणके । स्वायत्तं पौषधं चक्रे, कर्मव्याधिसदौषधम् ॥३४॥
इतश्च तद्गृहे नित्यं, क्रयविक्रयणच्छलात् । चत्वारः पुरुषाः केचिन्निषेदुर्दुष्टबुद्धयः ॥३५॥
ततश्च तैर्नरैर्ज्ञातः, श्रेष्ठिनः पौषधक्षणः । सन्नह्य ब्रह्मसेनोऽपि, कालेऽस्वाप्सीद्यथाविधि ॥३६॥

तत्र विधिसारानुष्ठाने ब्रह्मसेनश्रेष्ठिकथा ।

निशीथप्रहरादूर्ध्वं, तस्मिन् सुप्तेऽथ ते नराः । प्रविश्य तत्र खात्रेणारेभिरे मोषितुं गृहम् ॥३७॥
प्रबुद्धः श्रेष्ठ्यथो गेहं, मुष्यमाणं विदन्नपि । मनागपि शुभध्यानान्नाचालीदचलाचलः ॥३८॥
संवेगातिशयात्सोऽनुशिष्टिमित्यात्मनो ददौ । रे जीव ! धनधान्यादौ, मा मुहः सर्वथा यतः ॥३९॥
कइया सव्वं संगं, अंगंमि वि निप्पिहो अहं चइउं । मिगचारियं चरिस्सं, सुहगुरुपयसेवणासत्तो ? ॥६॥
कइया पहाणउवहाणसंगयं सयलदोसपरिमुक्कं । आयारप्पमुहमहं, आगमसत्थं पढिस्सामि ? ॥७॥
समिईगुत्तिपहाणं, पालिस्सं दुद्धरं कया चरणं । कइया उवसमलच्छी, वच्छे रमिही मम जहिच्छं ? ॥८॥
गुरुतरउज्जलतवचरणकरणजलणंमि खिविय अप्पाणं । नीसेसमलविमुक्कं, कणगं व कया करिस्सामि ? ॥९॥
संलिहियदव्वभावो, कइया इहपरभवेसु निरविक्खो । आराहणमाराहिय, पाणच्चायं करिस्सामि ? ॥१०॥
इय सुमणोरहगुरुरहआरूढमणो गमेइ सो कालं । अन्नदिणे सेणमुणी, सिद्धं दट्ठुं समणुपत्तो ॥११॥
जिणसुयभावियमइणो उप्पलदलकोमलाइ वाणीए । दाउं चोयणमन्नुन्नमेगहिं दोवि उवविट्ठा ॥१२॥
अह कम्मघिहाणाओ, विवाइया दोवि असणिपाएण । अच्चंतदुक्खिओ तो जाओ जणओ परियणो य ॥१३॥
तत्थन्नया महप्पा, जुगंधरो केवली समोसरिओ । पुट्ठो गईविसेसं, वसुणा सो निययपुत्ताणं ॥१४॥
केवलिणा सिट्ठं से, सिद्धो सोहम्मकप्पमणुपत्तो । सेणो पुणो महिड्ढी वंतरदेवो समुप्पन्नो ॥१५॥
कारणमिह सामन्ने सुद्धे सिद्धस्स आसि करणिच्छा । इयरेण उ सामण्णं, गहियंपि न पालियं सम्मं ॥१६॥
इय सोउ गेहवासे, विरत्तचित्तो बहू जणो जाओ । भवियपडिबोहहेउं गुरूवि अन्नत्थ विहरित्था ॥१७॥
सिद्धस्य वृत्तमेवं निशम्य भव्याः ! शुभेन भावेन । प्रतिमुक्तप्रतिबन्धा गेहे मन्दादरा भवत ॥१८॥

॥ इति सिद्धकथा ॥

इत्युक्तो भावश्रावकस्य सप्तदशोऽपि भेदः। आह—स्त्रीन्द्रियविषयाणामरक्तद्विष्टमध्यस्थासम्बद्धानां गेहगेहवासयोश्चैकविषयाणां भेदो नोपलभ्यते, तत्कथं न पुनरुक्तदोष इति ? सत्यम्, देशविरतेश्चित्ररूपत्वादेकस्मिन्नपि विषये परिणामनानात्वम्, एकस्यापि परिणामस्य विषयभेदोऽपि सम्भवतीति सर्वभेदनिषेधार्थत्वात् प्रपञ्चस्य न पौनरुक्त्यमिति व्याख्यानगाथाभिः प्रकाशितमेव, अतः सूक्ष्मधियाऽऽलोच्य समाधानान्तरमपि विधेयमिति।

इति प्ररूपिताः सदृष्टान्ताः सप्तदशाऽपि भावश्रावकभेदाः। तत्प्ररूपणे च प्ररूपितं सप्रपञ्चं भावश्रावकस्य भावगतलिङ्गकदम्बकम्। सम्प्रति एतदेवोपसंहरन् प्रस्तावान्तरं च सम्बन्धयन्नाह—

इय सतरसगुणजुत्तो, जिणागमे भावसावगो भणिओ।
एस उण कुसलजोगा, लहइ लहुं भावसाहुत्तं ॥७७॥

'इति' उक्तप्रकारेण सप्तदशगुणयुक्तो 'जिनागमे' भावश्रावको भणित इति प्रकटार्थः। 'एषः' एवंविधः 'पुनः' शब्दो विशेषणार्थः। किं विशिनष्टि ? द्रव्यसाधुस्तावदेष भणित एवागमे—

तत्र १ मार्गानुसारिणी क्रिया।

यदुक्तम्—

"मिउपिंडो दव्वघडो, सुसावओ तह य दव्वसाहु त्ति। साहू य दव्वदेवो सुद्धनयाणं तु सव्वेसिं" ॥

एवंविधपरिणामोपार्जितकुशलयोगात् पुनः 'लभते' अवाप्नोति 'लघु' शीघ्रम् 'भावसाधुत्वम्' यथावस्थितयतित्वमिति ।

कीदृशः पुनर्भावसाधुर्भवतीति? उच्यते ।

"निर्वाणसाधकान् योगान्, यस्मात्साधयतेऽनिशम् । समश्च सर्वभूतेषु, तस्मात्साधुरुदाहृतः ॥१॥

क्षान्त्यादिगुणसम्पन्नो, मैत्र्यादिगुणभूषितः । अप्रमादी सदाचारे, भावसाधुः प्रकीर्त्तितः" ॥२॥ इति ।

कथं पुनश्छद्मस्थैरयं ज्ञायते? लिङ्गैः ।

कानि पुनस्तानीत्याह—

**एयस्स उ लिंगाइं, सयला मग्गाणुसारिणी किरिया[1] । सद्धा पवरा धम्मे[2] पण्णवणिज्जत्तमुजुभावो[3] ॥७८॥**

**किरियासु अप्पमाओ[4], आरंभो सक्कणिज्जणुट्ठाणे[5] । गुरुओ गुणाणुराओ[6], गुरुआणाराहणं परमं[7] ॥७९॥**

द्वारगाथाद्वयम् । अस्य व्याख्या—

'एतस्य' पुनर्भावसाधोः, 'लिङ्गानि' चिह्नानि—'सकला' समस्ता 'मार्गानुसारिणी' मोक्षाध्वानुपातिनी 'क्रिया' प्रत्युपेक्षणादिका चेष्टा १, तथा 'श्रद्धा' करणेच्छा 'प्रवरा' प्रधाना 'धर्मे' संयमविषये २, तथा 'प्रज्ञापनीयत्वम्' असदभिनिवेशत्यागित्वम् 'ऋजुभावात्' अकौटिल्येन ३, तथा 'क्रियासु' विहितानुष्ठानेषु 'अप्रमादो'ऽशैथिल्यम् ४, तथा 'आरम्भः' प्रवृत्तिः 'शकनीये' शक्त्यनुरूपे 'अनुष्ठाने' तपश्चरणादौ ५, तथा 'गुरुः' महान् 'गुणानुरागो' गुणपक्षपातः ६, तथा 'गुर्वाज्ञाराधनम्' धर्माचार्यादेशवर्त्तित्वं 'परमं' सर्वगुणप्रधा-

नम् ७ इति सप्त लक्षणानि भावसाधोरिति द्वारगाथासमासार्थः।

व्यासार्थं तु सूत्रकारः स्वयमेवाह—

**मग्गो आगमनीई, अहवा संविग्गबहुजणाइण्णं। उभयाणुसारिणी जा, सा मग्गणुसारिणी किरिया॥८०॥**

मृग्यते—अन्विष्यतेऽभिमतस्थानावाप्तये पुरुषैर्यः स मार्गः, स च द्रव्यभावभेदाद् द्वेधा—द्रव्यमार्गो ग्रामादेः, भावमार्गो मुक्तिपुरस्य सम्यग्ज्ञानदर्शनचारित्ररूपः क्षायोपशमिकभावरूपो वा, तेनेहाधिकारः। स पुनः कारणे कार्योपचारादागमनीतिः—सिद्धान्तभणिताचारः। अथवा संविग्नबहुजनाचीर्णमिति द्विरूपोऽवगन्तव्य इति। तत्रागमो—वीतरागवचनम्।

उक्तं च—

"आगमो ह्याप्तवचनमाप्तं दोषक्षयाद् विदुः। वीतरागोऽनृतं वाक्यं न ब्रूयाद्धेत्वसम्भवात्" ॥

तस्य नीतिः—उत्सर्गापवादरूपः शुद्धसंयमोपायः स मार्गः।

उक्तं च—

तत्र १ मार्गानुसारिणी क्रिया।

यस्मात् प्रवर्त्तकं भुवि, निवर्त्तकं चान्तरात्मनो वचनम्। धर्मश्चैतत्संस्थो, मौनीन्द्रं चैतदिह परमम्॥१॥

अस्मिन् हृदयस्थे सति, हृदयस्थस्तत्त्वतो मुनीन्द्र इति। हृदयस्थिते च तस्मिन्नियमात्सर्वार्थसंसिद्धिः" ॥ इति।

तथा संविग्ना—मोक्षाभिलाषिणो ये बहवो जना अर्थाद् गीतार्थाः, इतरेषां संवेगायोगात् तैर्यदाचीर्णमनुष्ठितं क्रियारूपम्। इह च संविग्नग्रहणमसंविग्नानां बहूनामप्यप्रमाणतां दर्शयति, यद्व्यवहारः—

"जं जीयमसोहिकरं, पासत्थपमत्तसंजयाईहिं । बहुएहिवि आयरियं, न पमाणं सुद्धचरणाणं" ॥ ति ।

बहुजनग्रहणं संविग्नोऽप्येकोऽनाभोगानवबोधादिभिर्वितथमप्याचरेत्ततः सोऽपि न प्रमाणमित्यतः संविग्नबहुजनाचरितं मार्ग इति । अत एवाह–उभयानुसारिणी याऽऽगमाबाधया संविग्नव्यवहाररूपा सा मार्गानुसारिणी क्रियेति ।

आह–आगम एव मार्गो वक्तुं युक्तो बहुजनाचीर्णस्य पुनर्मार्गीकरणमयुक्तम्, शास्त्रान्तरविरोधादागमस्य चाप्रामाण्यापत्तेः ।

तथा हि–

"बहुजणपवित्तिमित्तं, इच्छन्तेहिं इहलोइओ चेव । धम्मो न उज्झियव्वो, जेण तहिं बहुजणपवित्ती ॥१॥

ता आणाणुगयं जं, तं चेव बुहेण होइ कायव्वं । किमिह बहुणा जणेणं, हंदि न सेयत्थिणो बहुया ॥२॥

तथा–

"जिट्ठंमि विज्जमाणे, उचिए अणुजिट्ठपूयणमजुत्तं । लोयाहरणंपि तहा, पयडे भयवन्तवयणंमि" ॥

आगमस्तु केवलिनापि नाप्रमाणीक्रियते । यतः–

"ओहा सुओवउत्तो, सुयनाणी जइवि गिण्हइ असुद्धं । तं केवलीवि भुंजइ, अपमाणसुयं भवे इहरा" ॥

किञ्च–आगमे सत्यप्याचरितस्य प्रमाणीकरणे तस्य लघुता स्फुटैवेति ।

नैतदेवम्–

अस्य सूत्रस्य शास्त्रान्तराणां च विषयविभागापरिज्ञानात् । तथा हि–इह सूत्रे संविग्नगीतार्था आगमनिरपेक्षं नाचरन्ति, किं तर्हि ?

"दोसा जेण निरुज्झन्ति, जेण खिज्जंति पुव्वकमाइं। सो सो मुक्खोवाओ, रोगावत्थासु समणं व"।

इत्याद्यागमवचनमनुस्मरन्तो द्रव्यक्षेत्रकालभावपुरुषाद्यौचित्यमालोच्य संयमवृद्धिकार्ये च किञ्चिदाचरन्ति, तच्चान्येऽपि संविग्नगीतार्थाः प्रमाणयन्तीति स मार्गोऽभिधीयते। भवदुच्चारितशास्त्रान्तराणि पुनरसंविग्नगीतार्थलोकमसमञ्जसप्रवृत्तमाश्रित्य प्रवृत्तानि ततः कथं तैः सह विरोधसम्भवः? तथागमस्यापि नाप्रमाणतापत्तिः, अपि तु सुष्ठुतरं प्रतिष्ठा, यस्मादागमेऽप्यागमश्रुताज्ञाधारणाजीतभेदात् पञ्चधा व्यवहारः प्ररूप्यते। यत उक्तं श्रीस्थानाङ्गे-"पञ्चविहे ववहारे पन्नत्ते, तंजहा-आगमववहारे, सुयववहारे, आणाववहारे, धारणाववहारे, जीयववहारे"। जीताचरितयोश्चानर्थान्तरत्वादाचरितस्य प्रमाणत्वे सुतरामागमस्य प्रतिष्ठासिद्धिः। तस्मादागमाविरुद्धमाचरितं प्रमाणमिति स्थितम्।

अत एवेदमाह—

**अन्नह भणियंपि सुए, किंची कालाइकारणाविक्खं। आइन्नमन्नहच्चिय, दीसइ संविग्गगीएहिं॥८१॥**



'अन्यथा' प्रकारान्तरेण 'भणितमपि' उक्तमपि 'श्रुते' पारगतगदितागमे किञ्चिद्वस्तु 'कालादिकारणापेक्षं' दुःषमादिस्वरूपालोचनपूर्वकम् 'आचीर्णं' व्यवहृतमन्यथैव चियशब्दस्यावधारणार्थत्वाद् 'दृश्यते' साक्षादुपलभ्यते 'संविग्नगीतार्थैः' उक्तस्वरूपैरिति।

किं तदित्याह—

**कप्पाणं पावरणं, अग्गोयरचाउ झोलियाभिक्खा। ओवग्गाहियकडाहयतुम्बयमुहदाणदोराई॥८२॥**

'कल्पानाम्' आत्मप्रमाणायामसार्द्धद्विहस्तविस्तराणामागमप्रतीतानां 'प्रावरणं' परितो वेष्टनं प्रतीतमेव। ते हि किल कारणव्यतिरेकेण भिक्षाचर्यादौ गच्छता संवृताः स्कंधत एव वोढव्या इत्यागमाचारः, संप्रति प्राव्रियन्ते। 'अग्गोयर'त्ति अग्रावतारः परिधानविशेषः साधुजनप्रतीतस्तस्य त्यागः कटीपट्टकस्यान्यथाकरणम्, तथा 'झोलिका' ग्रन्थिद्वयनियन्त्रितपात्रबन्धरूपा तया भिक्षा, आगमे हि मणिबन्धप्रत्यासन्नं पात्रबन्धाञ्चलद्वयं मुष्ट्या ध्रियते, कूर्परसमीपगमे च बध्यते इति व्यवस्था। तथौपग्रहिककटाहकतुम्बकमुखदानदवरकादयः सुविदिता एव साधूनामाचरिताः संप्रतीति गम्यते इति।

तथा—

**सिक्किगनिक्खिवणाई पज्जोसवणाइतिहिपरावत्तो। भोयणविहिअन्नत्तं एमाई विविहमन्नंपि॥८३॥**

सिक्किको—दवरकरचितो भाजनाधारविशेषः, तत्र निक्षेपणं बन्धनमर्थात् पात्राणाम्, आदिशब्दाद्युक्तिलेपेन पात्रलेपनादि, तथा पर्युषणादितिथिपरावर्त्तः—पर्युषणा सांवत्सरिकम्, आदिशब्दाच्चातुर्मासकपरिग्रहः, तयोः स्थितिपरावर्त्तः—तिथ्यन्तरकरणं सुप्रतीतमेतत्, तथा भोजनविधेरन्यत्वं यतिजनप्रसिद्धमेव, 'एमाइ' त्ति प्राकृतशैल्यैवंशब्दे वकारलोपः, तत एवमादिग्रहणेन षड्जीवनिकायामप्यधीतायां शिष्य उत्थाप्य इत्यादि गीतार्थानुमतं विविधमन्यदप्याचरितं प्रमाणभूतमस्तीत्यवगन्तव्यम्।

तथा च व्यवहारभाष्यम्—

"सत्थपरिन्ना छक्कायसंजमो पिंड उत्तरज्झाए। रुक्खे वसहे गोवे, जोहे सोही य पुक्खरिणी" ॥१॥

अस्या अयमर्थलेशः—

शस्त्रपरिज्ञाध्ययने सूत्रतोऽर्थतश्चावगते भिक्षुरुत्थापनीय इत्यप्रमेयप्रभावपारमेश्वरप्रवचनमुद्रा, जीतं पुनः षट्कायसंयमो—दशवैकालिकचतुर्थाध्ययने षट्जीवनिकाख्ये ज्ञाते भिक्षुरुत्थाप्यत इति । तथा पिण्डैषणायां पठितायामुत्तराध्ययनान्यधीयन्ते स्म, संप्रति तान्यधीत्याचार उद्दिश्यते। पूर्वं कल्पपादपा लोकस्य शरीरस्थितिहेतवोऽभूवन्, इदानीं सहकारकरीरादिभिर्व्यवहारः । तथा वृषभाः—पूर्वमतुलबला धवलवृषभा बभूवुः, संप्रति धूसरैरपि लोको व्यवहरति । तथा गोपाः—कर्षकाश्चक्रवर्त्तिगृहपतिरत्नवत् तद्दिन एव धान्यनिष्पादका आसन्, संप्रति तादृगभावेपीतरकर्षकैर्लोको निर्वहति । तथा पूर्वं योधाः—सहस्रयोधादयः समभवन्, संप्रत्यल्पबलपराक्रमैरपि राजानः शत्रूनाक्रम्य राज्यमनुपालयन्ति । तद्वत् साधवोपि जीतव्यवहारेणापि संयममाराधयन्तीत्युपनयः । तथा शोधिः—प्रायश्चित्तम्, षाण्मासिक्यामप्यापत्तौ जीतव्यवहारे द्वादशकेन निरूपितेति । पुष्करिण्योऽपि प्राक्तनीभ्यो हीना अपि लोकोपकारिण्य एवेति दार्ष्टान्तिकयोजना पूर्ववत् । एवमनेकधा जीतमुपलभ्यत इति । अथवा किंबहुना—

**जं सव्वहा न सुत्ते, पडिसिद्धं नेव जीववहहेऊ । तं सव्वंपि पमाणं, चारित्तधणाण भणियं च ॥८४॥**

तत्र १ मार्गानुसारिणी क्रिया।

यत्तु सर्वथा—सर्वप्रकारैर्नैव सूत्रे—सिद्धान्ते प्रतिषिद्धं निवारितं—सुरतासेवनवत् ।

उक्तं च—

"न य किंचि अणुन्नायं, पडिसिद्धं वावि जिणवरिंदेहिं । मोत्तुं मेहुणभावं, न तं विणा रागदोसेहिं" ॥



नापि जीववधहेतुराधाकर्मग्रहणवत्, तद्—अनुष्ठानं सर्वमपि प्रमाणं चारित्रमेव धनं येषां तेषां चारित्रधनानां—चारित्रिणामागमानु-

ज्ञातत्वाद्, भणितमुक्तं च पूर्वाचार्यैरिति ॥

यद्भणितं तदेवाह—

**अवलंबिउण कज्जं, जंकिंपि समयारंति गीयत्था । थोवावराहबहुगुण सव्वेसिं तं पमाणं तु ॥८५॥**

अवलम्ब्य–आश्रित्य कार्यं संयमोपकारि यत् किमपि समाचरन्ति–संगतं–सिद्धान्तानुयाय्याचरन्त्यासेवन्ते गीतार्था–विदितागमतत्त्वास्तोकापराधमल्पदोषम्, निष्कारणपरिभोगत्वेन प्रायश्चित्तापत्तेः, बहुगुणं–गुरुग्लानबालवृद्धक्षपनकादीनामुपष्टम्भेन बहूपकारं मात्रकादिपरिभोगवत् सर्वेषामपि, चारित्रिणां तत् प्रमाणमेव, तु शब्दस्यैवकारार्थत्वाद्, आर्यरक्षितसूरिसमाचरितं दुर्बलिकापुष्यमित्रस्येव ।

तथाहि—

इह दसपुरनयरे सोमदेववरविप्पवंसनहतरणी । अक्खुद्दरुद्दसोमातणुसरसीरायहंससमो ॥१॥
पाडलिपुरा चउद्दस, विज्जाठाणाणि पढिय संपत्तो । तुट्ठेण निवेण पुरे, पवेसिओ गुरुविभूईए ॥२॥
आणंदियनयरजणो, जणणीवयणेण दिट्ठिवायसुयं । पढिउं सिरितोसलिपुत्तसूरिपासंमि पव्वइओ ॥३॥
सिरिवइरसामिगणहरपयमूले गहियसड्ढनवपुव्वो । दिक्खियलहुबंधवफग्गुरक्खियजणणिप्पमुहलोओ ॥४॥
बहुविहउवायगाहियचरित्तपिउमुणिविदिन्नकडिदोरो । सिरिअज्जरक्खियपहू अहेसि सूरी जुगप्पवरो ॥५॥
तस्स त्थि तिन्नि सीसा, विणीयत्तिणया विसिट्ठलद्धिजुया । घयवत्थपूसमित्ता दुब्बलियापुस्समित्तो य ॥६॥
तत्थ घयपूसमित्तस्स, अत्थि लद्धी इमा कयचमक्का । दव्वे घयमाणेयं, खित्ते उज्जेणिनयरीए ॥७॥

काले जिट्ठासाढेसु, भावओ नियडपसवसमयाए । दिन्नं दरिद्दइत्थीइ, भावओ गच्छपरिमाणं ॥८॥
एसा पुण लद्धी वत्थपूसमित्तस्स अत्थि जह दव्वे । वत्थं आणेयव्वं, खित्ते महुराइ नयरीए ॥९॥
कालंमि सिसिरकाले, भावंमि दरिद्दविहवमहिलाए । दिन्नं परिमाणे पुण, पडिपुन्नं सयलगच्छस्स ॥१०॥
दुब्बलियपूसमित्तो नव पुव्वाइं पढित्तु ताइं सया । परियट्टइ तव्वसओ, अईव सो दुब्बलो जाओ ॥११॥
तस्स य दसपुरनयरे, दसबलभत्ता समत्थि बहुसयणा । ते कोउगेण गुरुणो, पासं पत्ता इय भणंति ॥१२॥
तुम्हाण नत्थि झाणं, झाणपरा अम्ह भिक्खुणो सययं । जंपंति गुरु झाणं, अम्हं चिय नणु अइपहाणं ॥१३॥
जं एस तुम्ह नियगो, झाणेणं चेव दुब्बलो जाओ । ते बिंति इमो गेहे, निद्धाहारेहि आसि बली ॥१४॥
संपइ पुण तयभावा, जाओ दुब्बलतणू तओ गुरुणो । जंपंति कयावि इमो नेहेण विणा न भुंजेइ ॥१५॥
कत्तो तुम्हं नेहु त्ति, तेहि वुत्ते भणंति मुणिपहुणो । घयपूसाउ इमाओ, तहावि नहु पत्तियंति इमे ॥१६॥
तो पडिबोहणहेउं, पेसंति तयं गुरू गिहे ताण । ते दिंति निद्धपेसलआहारे सोवि गिण्हेइ ॥१७॥
भुंजेवि तयणु पुव्वे, झरमाणो हवइ तारिसो चेव । गाढतरं दिंति तओ, तहवि झरंतो किसो एसो ॥१८॥
ते निव्विन्ना दाउं, बिंति गुरू पुसमित्त ! इत्ताहे । मा झरसु कइवि दिवसे, आहारसु अंतपंताइं ॥१९॥
तह चेव कए एसो बलियसरीरो फुरंततेयभरो । पडिपुन्नगलकवोलो, थोवदिणेहिंपि संजाओ ॥२०॥
तं दट्ठु महच्छरियं, ते बुद्धा बुद्धमग्गमुज्झेउं । रक्खियपहुपयमूले, गिहत्थधम्मं पवज्जंति ॥२१॥



तत्र दुर्बलि-
कापुष्यमि-
त्रकथा ।

तग्गच्छे दुब्बलिया पुस्सो विञ्झो य फग्गुरक्खी य । गुट्ठामाहिलनामा, चत्तारि जणा पहाण त्ति ॥२२॥
तत्थ य विञ्झो विञ्झो व्व, समयसुत्तत्थहत्थिआहारो । कइयावि साहुनाहं भत्तीए विन्नवेइ इमं ॥२३॥
पहु ! सुत्तमंडलीए, परिवाडीए समेइ सुचिरेण । आलावगो तओ मह, देह पुढो वायणायरियं ॥२४॥
गुरुणावि पूसमित्तो, तो दिन्नो तस्स वायणायरिओ । सो दाउ वायणं कइवि वासरे भणई इय सूरिं ॥२५॥
दिंतस्स वायणाउ अणुपेहावज्जिणो य सयणगिहे । पहु ! अज्झरियं च मज्झं, नवमं पुव्वं पणिस्सिहिइ ॥२६॥
तं सोउ चिंतइ गुरू, अइमेहाविस्स इय झरंतस्स । जइ एयस्सवि नस्सइ, ता नट्ठं चेव इयराण ॥२७॥
अइसयकओवओगो, मइमेहाधारणाइ परिहीणे । नाऊण सेसपुरिसे, खित्तं कालाणुभावं च ॥२८॥
सविसयमसद्दहंता, नयाण तम्मत्तगं च गिण्हंता । मन्नंता य विरोहं अपरीणामाइपरिणामा ॥२९॥
मा मिच्छत्तं गच्छिज्ज, इय विचिंतिय इमो समणनाहो । सुनिगूहियनयमग्गे पुढोणुओगे इय करेसि ॥३०॥

तथाहि—

चरणकरणाणुओगे, कालियसुयछेयसुत्तमाईणि । धम्मकहाअणुओगे ठवेइ इसिभासियाइसुयं ॥३१॥
रविससिपन्नत्तीओ, करेइ गणियाणुओगविसयाओ । सव्वोवि दिट्ठिवाओ, ठविओ दव्वाणुओगम्मि ॥३२॥

तथा—

दसपुरनगरुच्छुघरे, ठिओ मुणीणं कयावि दयहेउं । मत्तगपरिभोगंपिहु अणुजाणइ वरिसयालंपि ॥३३॥

आलोयणवयदाणं, छेयसुयं संजईण वारेइ । आगमभणियंपि इमो, कालं भावं च आसज्ज ॥३४॥
जं निरवज्जं एमाइतेण असढेण पभणियं तइया । मग्गाणुसारिबुद्धीण, अणुमयं तं परेसिंपि ॥३५॥
पसरंतबहुलअन्नाणधन्तहीरंतजन्तुसुपईवो । कइयावि अज्जरक्खियसामी य महुराउरिं पत्तो ॥३६॥
तत्थ य भूयगुहाए, वन्तरभवणे ठिओ सपरिवारो । सीमन्धरपहुपासे, इओ निगोए हरी सुणिउं ॥३७॥
पुच्छइ भयवं ! भरहेवि, कोवि एए जिए वियारेइ । साहइ सामी रक्खियअज्जो अहमिव वियारेइ ॥३८॥
सक्को बम्भणरूवं, काउमिहागम्म पुच्छइ निगोए । गोला इ असंखिज्जा इच्चाइ गुरूवि साहेइ ॥३९॥
पुण भणइ हरी भयवं, वुड्ढत्ता काउ इच्छिमोऽणसणं । भण मह कित्तियमाउं, सुयउवओगा तओ सूरी ॥४०॥
जा पिच्छइ दो अयरे, किंचूणे तस्स आउं भणइ गुरू । इंदो भवंति सक्को, तो काउ सरूवमिय थुणइ ॥४१॥
निरइसएवि हु काले, नाणं विप्फुरइ निम्मलं जस्स । विम्हाइयतेलुक्कं, तस्स नमो होउ तुह नाह ! ॥४२॥
जय जिणआगमअणुमयसुद्धसमायारआयरणवित्त ! । जय रागदोसजलरासिसोसकुंभुब्भव मुणिंद ! ॥४३॥
इय थुणिय जा सट्ठाणं, इंदो गच्छइ गुरूहिं तो भणिओ । पडिवालसु खणमेगं, जा विहरिय इंति इह मुणिणो ॥४४॥
दट्ठूण तुमं वासव ! अज्जवि सीलंगसंगसुभगमणे । हरिणोवि नमंति मुणी, इय थिरया हवइ तेसिंपि ॥४५॥
सक्कोवि आह मुणिपहु ! ते मं दट्ठुं विसिट्ठरूवधरं । काहंति अप्पसत्ता नियाणमिय जामि सट्ठाणं ॥४६॥
इय जंपिय तस्स उवस्सयस्स काऊण दारमवरमुहं । नमिय मुणिंदं पत्तो, पुरंदरो नियय़ट्ठाणंमि ॥४७॥



तत्र दुर्बलि-
कापुष्यमि-
त्रकथा ।

ता तत्थ मुणी पत्ता, कओ दुवारं ति बिंति तो गुरुणा । वाहरिया एह इओ, सिट्ठं तह सक्कआगमणं ॥४८॥
ते आहु किं न धरिओ, खणमेगं तो कहंति गुरुणोवि । तं वुत्ततं सयलंपि पाडिहेरावसाणं ति ॥४९॥
अन्नदिणे विहरन्ता, ते भयवन्तो गया दसपुरम्मि । पबलो नाहियवाई, महुराइ समुट्ठिओ इत्तो ॥५०॥
सिरिअज्जरक्खियाणं जुगप्पहाणागमाण पासंमि । संघेण सुगुणसंघेण पेसिओ साहुसंघाडो ॥५१॥
तेहिवि गुट्ठामाहिलनामो नियमाउलो तहिं पहिओ । गुरुवायलद्धिणा तेण, झत्ति सो निज्जिओ वाई ॥५२॥
सो तयणु सावगेहिं, धरिओ वासासु हिट्ठचित्तेहिं । रक्खियपहुणा इत्तो अइथोवं आउ नाउ नियं ॥५३॥
को गणहरो ठविज्जइ, इय चिंतन्तेण निउणबुद्धीए । आयरियठाणजुग्गो, समिक्खिओ दुब्बलियपूसो ॥५४॥
जे पुण से सयणजणा, तेसिं किर फग्गुरक्खिओ समणो । माहिलओ वाऽभिमओ, तो ते वुत्ता इमं गुरुणा ॥५५॥
निष्फावतिल्लघयगाण इह कुडेसुं अहोमुहकएसु । सव्वेवि नेन्ति तिल्ला तिल्लं पुण लग्गए किमवि ॥५६॥
लग्गइ सुबहुंपि घयं, एमेव अहंपि सुत्तअत्थेहिं । निप्फावकुडसमाणो, दुब्बलियं पइ महाभागा ॥५७॥
तह फग्गुरक्खियमुणिं, गुट्ठामाहिलमुणिं च आसज्ज । तिल्लघयकुडु व्व कमा, अहयं इय कारणा भद्दा ! ॥५८॥
सुत्तत्थतदुभयधरो, सद्धासंवेगसंगओ सुमई । सक्किरियाकरणरओ, रायकरंडगसमाणगुणो ॥५९॥
ससमयपरसमयविऊ, दुब्बलिओ एस होउ तुम्ह गुरू । तेवि तहत्ति पडिच्छन्ति सीसवीसंतकरकमला ॥६०॥
वूढो गणहरसद्दो, गोयममाईहिं धीरपुरिसेहिं । जो तं ठवइ अपत्ते, जाणंतो सो महापावो ॥६१॥

इय चिंतिऊण गुणपक्खराइणा सूरिणा समयविहिणा । ठविऊण पूसमित्तो आयरियपए इमं वुत्तो ॥६२॥
जह फग्गुरक्खिए माहिले य इह वट्टिओ अहं वच्छ ! । तह वट्टिज्ज तुमंपि हु, तहत्ति तं गिण्हइ इमोवि ॥६३॥
सयणा उ इमं वुत्ता, जह तुब्भे वट्टिया मइ सयावि । एयंमिवि मुणिनाहे, तह वट्टिज्जेह विणयपरा ॥६४॥
अविय अहं अकए वा कएवि वा नेव रूसिओ कइया । एसो उण नहु खमिही, ता वट्टिज्जेह सुट्ठुयरं ॥६५॥
एवं दुन्निवि वग्गे अप्पाहिय हियकरेहि वयणेहिं । भत्तं पच्चक्खाइत्तु सूरिणो सग्गमणुपत्ता ॥६६॥
दुब्बलियपूसमित्तोवि गणहरो हरियसयलसंदेहो । मग्गाणुसारिकिरियानिरओ कयभवियजणहरिसो ॥६७॥
दप्पिट्ठदुट्ठकुग्गहनिम्महियजणाभिमाणघणपवणो । विहियनियगच्छसुत्थो, कमेण सुहभायणं जाओ ॥६८॥

श्रुत्वेति वृत्तं त्रिजगत्पवित्रं श्रीपुष्यमित्रस्य मुनीश्वरस्य ।
मुमुक्षवः संतु कृतप्रयत्ना मार्गानुसारिप्रवरक्रियायां ॥६९॥

## ॥ इति दुर्बलिकापुष्यमित्रकथा समाप्ता ॥

अत्र कश्चिदेवमाह—नन्वेवमाचरिते युष्माभिः प्रमाणीकृतेऽस्माकं पितृपितामहादयो नानारम्भमिथ्यात्वक्रियाप्रवृत्तयोऽभूवन्नतोऽस्माकमपि तथैव प्रवर्त्तितुमुचितमिति । अत्रोच्यते—सौम्यमार्गेणापि नीयमानो मोन्मार्गेण गमः, यतोऽस्माभिः संविग्नाचरितमेव स्थापितम्, न सर्वपूर्वपुरुषाचरितमित्यतएवाह—

जं पुण पमायरूवं गुरुलाघवचिंताविरहियं सवहं। सुहसीलसढाइन्नं चरित्तिणो तं न सेवंति ॥८६॥

यत् पुनराचरितं प्रमादरूपं संयमबाधकत्वात्, अत एव गुरुलाघवचिंताविरहितं–सगुणमपगुणं वेति पर्यालोचनवर्जितमत एव सवधं यतनाभावात् सुखशीला–इहलोकप्रतिबद्धाः शठा–मिथ्यालम्बनप्रधानास्तैराचीर्णं–समाचरितं चारित्रिणः–शुद्धचारित्रवन्तस्तं न सेवन्ते-नानुतिष्ठन्तीति।

अस्यैवोल्लेखं दर्शयन्नाह–

जह सड्ढेसु ममत्तं राढाइ असुद्धउवहिभत्ताई। निद्दिज्जवसहितूलीमसूरमाईण परिभोगो ॥८७॥

यथेत्युपदर्शने श्राद्धेषु–श्रावकेषु ममत्वं–ममकारं 'मदीयोऽयं श्रावक' इति गाढाग्रहं "गामे कुले वा नगरे च देसे ममत्तभावं न कहिंचि कुज्जा।" इत्यागमनिषिद्धमपि केचित् कुर्वन्ति। तथा राढया–शरीरशोभाकाम्ययाऽशुद्धोपधिभक्तादि केचन गृह्णन्ति। तत्राशुद्धमुद्गमोत्पादनादिदोषदुष्टम्, उपधिर्वस्त्रपात्रादिर्भक्तमशनपानखाद्यस्वाद्यादि, आदिशब्दादुपाश्रयग्रहणम्, एतान्यप्यागमेऽशुद्धानि निषिद्धान्येव। यत एवमार्षम्–

"पिंडं सिज्जं च वत्थ च, चउत्थं पायमेवय। अकप्पियं न इच्छिज्जा, पडिगाहिज्ज कप्पियं" ॥ इति।

इह च राढाग्रहणं पुष्टालम्बनेन दुर्भिक्षाक्षेमादौ पञ्चकपरिहाण्या किंचिदशुद्धमपि गृह्णतो न दोष इति ज्ञापनार्थम्, यतोऽभाणि पिण्डनिर्युक्तौ–

"एसो आहारविही जह, भणिओ सव्वभावदंसीहिं। धम्मावस्सगजोगा, जेण न हायन्ति तं कुज्जा ॥१॥

तथा—

"कारणपडिसेवा पुण, भावेणासेवणत्ति दट्ठव्वा। आणाइ तीइ भावे, सो सुद्धो मुक्खहेउ त्ति" ॥

तथा 'निद्दिज्ज' त्ति पत्रलेखनेनाचन्द्रकालिकं प्रदत्ता वसतिर्गृहमेषापि साधूनामकल्पनीया, अनगारत्वहानेः भग्नसंस्थापनादौ कायवधसंभवात्। तथा च पठ्यते—

"अविकत्तिऊण जीवे, कत्तो घरसरणगुत्तिसंठप्पं। अविकत्तिया य तं तह पडिया अस्संजयाण पहे" ॥

एतद्ग्रहणमप्येकैराचर्यते। तथा तूलीमसूरकादीनामपि परिभोगः कैश्चिद्विधीयते। तत्र तूलीमसूरके प्रतीते, आदिशब्दात्तूलिका-खल्लककांस्यताम्रपात्रादीनां परिग्रहः, एतान्यपि यतीनां न कल्पन्ते इति।

अथ प्रस्तुतमुपसंहरन्नाह—

**इच्चाई असमंजसमणेगहा खुद्दचिट्ठियं लोए। बहुएहिवि आयरियं, न पमाणं सुद्धचरणाणं ॥८८॥**

इत्यादि—एवंप्रकारमसमञ्जसं—वक्तुमप्यनुचितं शिष्टानामनेकधाऽनेकप्रकारं क्षुद्राणां—तुच्छसत्त्वानां चेष्टितमाचरितं लोके—लिङ्गिजने बहुभिरप्यनेकैरप्याचीर्णं न प्रमाणं—नालम्बनहेतुः शुद्धचरणानां—निष्कलङ्कचारित्रिणाम्। अप्रमाणता पुनरेतस्य सिद्धान्तनिषिद्धत्वात् संयमविरुद्धत्वादकारणप्रवृत्तत्वाच्च सम्यगालोचनीयेति।

एवमानुषङ्गिकमभिधाय प्रस्तुतोपसंहारमाह—

**गीयत्थपारतन्ता, इय दुविहं मग्गमणुसरंतस्स । भावजइत्तं जुत्तं दुप्पसहंतं जओ चरणं ॥८९॥**

गीतार्थपारतन्त्र्याद्–आगमविदाज्ञया, इति–उक्तनीत्या द्विविधम्–आगमनीत्या आगमानुमतवृद्धसमाचारभेदेन द्विप्रकारं मार्गमनुसरतस्तदनुसारेण व्यवहरतः साधोरिति गम्यते भावयतित्वं–सुसाधुत्वं युक्तमुचितं वक्तुमिति शेषः । किमित्यत आह दुष्प्रसहान्तं–दुष्प्रसहनामधेयाचार्यपर्यन्तं यतो–यस्माच्चरणं–चारित्रं सिद्धान्ते श्रूयत इति शेषः ।

अयमभिप्रायः—यदि मार्गानुसारिक्रियाकरणसारं यतमानाश्चारित्रिणो नाभ्युपगम्यन्ते, ततस्तदन्येषामनुपलम्भाद्व्यवच्छिन्नं चारित्रम्, तद्व्यवच्छेदात्तीर्थं चेत्यायातम्। एतच्च प्रत्यक्षीभूतभूतभवद्भाविभावस्वभावजिननाथप्रणीतसिद्धान्तेन सह विरुद्धमिति न प्रेक्षापूर्वकारिणः प्रतिपद्यन्ते ।

तथा च व्यवहारभाष्यम्—

"केसिंचिय आएसो, दंसणनाणेहिं वट्टए तित्थं । वोच्छिन्नं च चरित्तं, वयमाणे भारियाचउरो ॥१॥
जो भणइ नत्थि धम्मो, नय सामइयं न चेव य वयाइं । सो समणसंघबज्झो, कायव्वो समणसंघेण" ॥२॥

इत्याद्यागमप्रामाण्यान्मार्गानुसारिक्रियाकारिणो भावयतय इति स्थितम् ।

उक्तं सकलमार्गानुसारिणी क्रियेति भावसाधोः प्रथमं लिङ्गम्, संप्रति श्रद्धा प्रवरा धर्मे इति द्वितीयमाह—

**सद्धा तिव्वभिलासो, धम्मे पवरत्तणं इमं तीसे, । विहिसेवं[1] अतित्ती[2] सुद्धदेसणा[3] खलियपरिसुद्धी ॥९०॥**

श्रद्धा प्रवरा धर्मे इति द्वितीयं लिङ्गमुक्तम् । तत्र श्रद्धा तीव्रः-पटुरभिलाषः कर्मक्षयोपशमस(ज)ज्ञानप्रभवो न पुनर्विषयप्रतिभासमात्रं बालस्य रत्नग्रहणाभिलाषवत् धर्मे-श्रुतचारित्ररूपे, प्रवरत्वं-प्रधानत्वं विशेषणीकृतमिदं वक्ष्यमाणं तस्याः श्रद्धायाः फलभूतम् । तद्यथा-विधिसेवा १, अतृप्तिः २, शुद्धदेशना ३, स्खलितपरिशुद्धिः ४, इति लिङ्गानि श्रद्धायाः प्रवरत्वस्येति । सूत्रे च 'विहिसेव अतित्ती' इत्यत्र ह्रस्वत्वं प्राकृतत्वात् ।

१ विधिसेवा

संप्रत्येतान्येव प्रत्येकं विभावयिषुः प्रथमं तावद्विधिसेवामधिकृत्याह—

**विहिसारं चिय सेवइ, सद्धालू सत्तिमं अणुट्ठाणं । दव्वाइदोसनिहओवि, पक्खवायं वहइ तंमि ॥९१॥**

विधिसारं-विधिप्रधानमेव सेवतेऽनुतिष्ठति श्रद्धालुः-श्रद्धागुणवान् शक्तिमान्-सामर्थ्योपेतः सन्ननुष्ठानं-प्रत्युपेक्षणैषणादिकम्, श्रद्धालुत्वस्यान्यथानुपपत्तेः । यदि पुनः शक्तिमान्नस्यात्ततः का वार्तेत्याह-द्रव्याण्याहारादीनि, आदिशब्दात् क्षेत्रकालभावाः परिगृह्यन्ते तेषां दोषः प्रतिकूलता, तेन निहतोऽपि-गाढपीडितोपि पक्षपातं भावप्रतिबन्धं वहति-धारयति तस्मिन्नेव-विध्यनुष्ठान एव सावधारणत्वाद्वाक्यस्येति ।

कथं पुनरनुष्ठानाभावे पक्षपातसंभव इत्याह—

**निरुओ भुज्जरसन्नू , किंचि अवत्थं गओ असुहमन्नं । भुंजंतंमि न रज्जइ, सुहभोयणलालसो धणियं ॥९२॥**



नीरुजो-ज्वरादिरुजारहितो भोज्यानि-खण्डखाद्यादीनि तेषां रसमास्वादविशेषं जानातीति भोज्यरसज्ञः, कामप्यवस्थां-दुष्काल-

दारिद्र्यादिदशां गतः–प्राप्तः सन्नशुभमनिष्टमन्नं भोजनं भुञ्जानो न तस्मिन्नशुभान्ने रज्यति–गृद्धिमुपैति ।

तथाहि संभवत्येतत् कदाचित्—

"सुहभत्तलालिओवि हु, दुक्कालदारिद्दभिदुओ पुरिसो । भक्कडयभरुट्टाई, भुंजइ तह कंडुयं कंटिं ॥१॥

कडुयरसं च गुयारं, अरणिदलाइं कुडिञ्झराईयं । भुञ्जइ जणो छुहत्तो, तरुछल्ली हिल्लिझिल्लाइ" ॥ त्ति ।

नचासौ तेषु गृद्धिमाधत्ते शुभभोजनलालसो–विशिष्टाहारलम्पटो 'लङ्घयाम्येतां कुदशां ततः सुभिक्षं प्राप्य पुनरपि शोभनमाहारं भोक्ष्ये इति मनोरथवान् 'धणियं'ति बाढमिति ।

एवं दृष्टान्तमभिधाय दार्ष्टान्तिकयोजनामाह—

**इय सुद्धचरणरसिओ, सेवंतो दव्वओ विरुद्धंपि । सद्धागुणेण एसो, न भावचरणं अइक्कमइ ॥९३॥**

इत्येवं कुभक्तभोगदृष्टान्तेन शुद्धचरणरसिको–निष्कलङ्कसंयमपालनोत्साहवान् सेवमानो द्रव्यतो–बाह्यवृत्त्या विरुद्धमागमनिषिद्धं नित्यवासादिकम्, अपिशब्दादेकाकित्वमपि श्रद्धागुणेन–संयमाराधनलालसत्वपरिणामेन न–नैव भावचरणं–पारमार्थिकचारित्रमतिक्रामति–अतिचरति श्रीसंगमसूरिवत् ।

तथा चोक्तम्—

"दव्वाइया न पायं, सोहणभावस्स हुंति विग्घकरा । बज्झकिरियाउ वि तहा, हवंति लोएवि सिद्धमिणं ॥१॥

दइयाकन्नुप्पलताडनं व सुहडस्स निव्वुइं कुणइ । पहुणो आणाए पत्थियस्स कंडंपि लग्गंतं ॥२॥

जह चेव सदेसंमि, तह परदेसेवि चलइ नहु सत्तं । मणवंछियंमि कज्जे, आरद्धे धीरपुरिसाणं ॥३॥
कालोवि हु दुब्भिक्खाइलक्खणो न खलु दाणसूराणं । भिंदइ आसारयणं, अवि अहिययरं विसोहेइ ॥४॥
एवं चिय भव्वस्सवि, चरित्तिणो नहि महाणुभावस्स । सुहसामायारिगओ, भावो परियत्तइ कयावि" ॥५॥

किंच—

जो होज्जउ असमत्थो, रोगेण व पिल्लिओ झुरियदेहो । सव्वमवि जहा भणियं, कयाइ न तरिज्ज काउं जे ॥६॥
सोवि य नियपरक्कमववसायधिईबलं अगूहंतो । मुत्तूण कूडचरियं, जइ जयए तो अवस्सजई ॥७॥ इति।

श्रीसंगमसूरिकथा पुनरेवम्

इह सिरिसंगमसूरी, दूरीकयसयलगुरुपमायभरो । अन्नाणदारुदारुणदवहुयवहसरिससमयधरो ॥१॥
पइसमयमुत्तरुत्तरविसुद्धपरिणामहणियपावोहो । नगनगरगाममाइसु, नवकप्पपकप्पियविहारो ॥२॥
अइतिव्वपवरसद्धावसपरिणयसुद्धभावचारित्तो । जंघाबलपरिहीणो, कुल्लागपुरंमि विहियठिई ॥३॥
वट्टंते दुब्भिक्खे, कयजणदुक्खे कयावि सो भयवं । पवयणमायापरिपालणुज्जयं उज्जयविहारं ॥४॥
आहिंडिय बहुदेसं, अवधारिय सयलदेसबहुभासं । सीहं नामणगारं गणाहिवत्ते निरूवेइ ॥५॥
भणइ य जइवि महायस ! सयमवि तं मुणसि सयलकरणिज्जं । आयारु त्ति विचिंतिय इय वुच्चसि तहवि अम्हेहिं ॥६॥
उल्लसिरपवरसद्धो चरणभरं दुद्धरं धरिज्ज सया । सीयंतं सीसगणं मिउमहुरगिराइ सारिज्जा ॥७॥

१ विधिसेवा

तत्र संगम-
सूरिकथा ।

जओ—

जीहाएवि लिहंतो, न भद्दओ जत्थ सारणा नत्थि । दंडेणवि ताडन्तो, स भद्दओ सारणा जत्थ ॥८॥

जह सीसाइं निकिंतइ, कोई सरणागयाण जंतूणं । एवं सारणियाणं, आयरिओ असारओ गच्छे ॥९॥

तथा—

दव्वाइअपडिबद्धो अममो विहरिज्ज विविहदेसेसु । अनिययविहारया जं जईण सुत्ते विणिद्दिट्ठा ॥१०॥

तथाहि—

अनिएयवासो समुदाणचारिया, अन्नायउंछं पइरिक्कया य । अप्पोवही कलहविवज्जणा य, विहारचरिया इसिणं पसत्था।११।

इच्चाइ कहिय वुत्तो, सो एवं वच्छ! विहर अन्नत्थ । मा ओमे इत्थ ठिओ, सीसगणो एस सीइज्जा ॥१२॥

एगागीवि अहं पुण, पहीणजंघाबलो अबलदेहो । अनलो विहरिउमन्नत्थ तो इहं चेव ठाइस्सं ॥१३॥

इय भणिय मुणी वुत्ता, वच्छा! सच्छासया सयाकालं । कुलवहुनाएण इमं, मा मुंचिज्जह कयावि तुमे ॥१४॥

तिण्णुच्चिय भवजलही, एयपसाया सुहेण तुब्भेहिं । संपइ इमिणा सद्धिं, कुणह विहारं महाभागा! ॥१५॥

इह सुणिय सुमुणिवइणो, ते मुणिणो सूरिचरणठवियसिरा । मुंचंता गुरुविरहुत्थसोयउप्पन्नअंसुभरं ॥१६॥

पडिपुन्नमन्नुभररुद्धकंठउट्ठिंतगग्गरगिरिल्ला । गुरुवयणं पडिकूलिउमचयंता दुक्खसंतत्ता ॥१७॥

कहमवि नमिउं गुरुणो, अवराहपए खमाविउं नियए । ओमाइदोसरहिए देसे पत्ता विहारेण ॥१८॥

संगमगुरूवि खित्तं, नवभागीकाउ कायनिरविक्खो । वीसुं वसहीगोयरवियारभूमाइसु जएइ ॥१९॥
सुद्धिकए गुरुपासे, कयावि सीहेण पेसिओ दत्तो । सो पुव्ववसहिसंठियसूरिं दट्टुं विचिंतेइ ॥२०॥
कारणवसा न कीरइ, खित्ते अवरावरे जइ विहारो । नवनववसहिविहारो, कीस एएहिं परिचत्तो ? ॥२१॥
ता एस सिढिलचरणो, खणंपि न खमो इमेण संवासो । एवं चिंतिय वीसुं, समीववसहीइ सो ठाइ ॥२२॥
भिक्खासमए गुरुणा, सह हिंडन्तो विसिट्ठमाहारं । दुब्भिक्खवसा अलहंतओ य, जाओ तत्थ कसिणवयणो ॥२३॥
तं तह निएवि सूरी, कम्मिवि ईसरगिहे गओ तत्थ । रेवइदोसेणेगो, सया रुयंतो सिसू अत्थि ॥२४॥
सो दाउं चप्पुडियं, गुरुणा भणिओ य बाल ! मा रुयसु । गुरुतेयं असहन्ती, झडत्ति सा रेवई नट्ठा ॥२५॥
जाओ बालो सुत्थो, तज्जणगो गहिय मोयगे पत्तो । गुरुणा करुणानिहिणा, दवाविया ते उ दत्तस्स ॥२६॥
अह मुणिपहुणा भणियं, तं गच्छसु दत्त ! संपयं वसहिं । अहयंपि आगमिस्सं, पडिपुन्नं काउ समुयाणं ॥२७॥
सड्ढगिहमेगमिमिणा, चिराउ मह दंसियं सयं अहुणा । सेसेसु गमी दत्तो, इय चिंतंतो गओ वसहिं ॥२८॥
गुरुणोवि अंतपंतं, गहिउं सुचिरेण आगया वसहिं । पन्नगबिलनाएणं, भुंजंति तयं समयविहिणा ॥२९॥
आवस्सयवेलाए, आलोइय सूरिणो समुवविट्ठा । सो निसियंतो गुरुणा, आलोइसु संममिय वुत्तो ॥३०॥
स भणइ तुब्भेहिं चिय, सह परिभमिओ म्हि किमिह वियडेमि । आह गुरू सिसुविसयं, सुहुमं नणु धाइपिंडं ति ॥३१॥
दत्तो तओ दुरप्पा, अणप्पसंकप्पकप्पणाभिहओ । लिंबुक्कडकडुयगिराइ, मुणिवरं पइ इमं भणइ ॥३२॥

राईसरिसवमित्ताणि, परच्छिद्दाणि पिच्छसि । अप्पणो बिल्लमित्ताणि, पासंतोवि न पाससि ? ॥३३॥
इय भणिय गओ एसो, नियवसहिं तयणु तस्स सिक्खत्थं । पुरदेवयाइ सिग्घं, विउव्वियं दुद्दिणं गरुयं ॥३४॥
फुडफुट्टमाणबंभंडभंडरवविरसजलहरारावं । सो निसुणंतो भयभरखलंतवयणो भणइ सूरिं ॥३५॥
भयवं ! बीहेमि अहं, आह गुरु एहि मम सयासंमि । स भणइ तिमिरभरेणं, दिसिविदिसिं नेव पिच्छामि ॥३६॥
दीवसिहं व जलंतिं, नियंगुलिं खेललद्धिणा काउं । दंसेऊण य गुरुणा, सो वुत्तो वच्छ ! एहि इओ ॥३७॥
तं दट्ठु स दुट्ठप्पा, जंपइ दीवोवि अत्थि किमिमस्स ? । तो पच्चक्खीहोउं, एवं वुत्तो स देवीए ॥३८॥
हा ! दुट्ठसेह ! निन्नेह ! देहगेहाइमुक्कपडिबन्धे । मुणिनाहंमि इमंमिवि, एवं चिंतेसि निल्लज्ज ! ॥३९॥
वसहिविहारकमेणं, पुणोवि इत्थ ट्ठियं सुगुरुमेयं । पाविट्ठ ! दुट्ठऽधम्मिट्ठ ! मन्नसि सिढिलचारित्तं ॥४०॥
अंतपंतभोयणपरंपि कप्पेसि मुद्ध ! रसगिद्धं । धिद्धी लद्धिसमिद्धंपि दीवजुत्तं पयंपेसि ॥४१॥
दव्वाइदोसवसओ, बीयपयठिएवि सुद्धसद्धाए । भावचरित्तपवित्ते, किह अवमन्नसि इमे गुरुणो ? ॥४२॥
इय अणुसिट्ठो, सो देवयाइ संजायगरुयअणुतावो । गुरुपयलग्गो खामइ, पुणो पुणो निययमवराहं ॥४३॥
आलोइयाइयारो, दत्तो गुरुदत्तविहियपच्छित्तो । विणउज्जुओ सुनिम्मलचारित्ताराहगो जाओ ॥४४॥
संगमसूरीवि चिरं, विहिसेवावल्लिपल्लवणमेहो । निरुवमसमाहिजुत्तो, सुगइं पत्तो गयकिलेसो ॥४५॥

इत्थं विशुद्धविधिसेवनतत्परस्य, श्रीसंगमस्य सुगुरोश्चरितं निशम्य ।

दुष्पमादिदोषनिहता अपि साधुलोकाः, श्रद्धां विधत्त चरणे प्रवरां पवित्रे ॥४६॥

॥ इति संगमसूरिकथा ॥

इत्युक्तं विधिसेवास्वरूपं प्रथमं श्रद्धालक्षणम्, संप्रत्यतृप्तिस्वरूपं द्वितीयमभिधित्सुराह—

**तत्तिं नचेव विंदइ, सद्धाजोगेण नाणचरणेसु । वेयावच्चतवाइसु, जहविरियं भावओ जयइ ॥९४॥**

'तृप्तिं' संतोषं कृतकृत्योऽहमेतावतैवेत्येवंरूपं 'न चैव' इति च शब्दस्य पूरणत्वान्नैव 'विन्दति' प्राप्नोति श्रद्धाया योगेन—संबन्धेन ज्ञानचरणयोर्विषये, ज्ञाने पठितं यावता संयमानुष्ठानं निर्वहतीति संचिन्त्य न तद्विषये प्रमाद्यति, किंतर्हि ? नवनवश्रुतसंपदुपार्जने विशेषतः सोत्साहो भवति ।

तथा चोक्तम् ।

"जह जह सुयमवगाहइ, अइसयरसपसरसंजुयमउव्वं । तह तह पल्हाइ मुणी, नवनवसंवेगसद्धाए" ॥

तथा—

अत्थो जस्स जिणुत्तमेहि भणिओ जायंमि मोहक्खए, बद्धं गोयममाइएहि सुमहाबुद्धीहि जं सुत्तओ ।
संवेगाइगुणाण वुड्ढिजणगं तित्थेसनामावहं, कायव्वं विहिणा सया नवनवन्नाणस्स तस्सज्जणं ।



तथा चारित्रविषये विशुद्धविशुद्धतरसंयमस्थानावाप्तये सद्भावनासारं सर्वमनुष्ठानमुपयुक्तमेवानुतिष्ठति, यस्मादप्रमादकृताः सर्वेपि

साधुव्यापारा उत्तरोत्तरसंयमकण्डकारोहणेन केवलज्ञानलाभाय भवन्ति।

तथा चागमः—

"जोगे जोगे जिणसासणंमि दुक्खक्खया पउंजन्ते, इक्किक्कम्मि अणंता, वट्टंता केवली जाया" ॥

तथा वैयावृत्त्यतपसी प्रतीते, आदिशब्दात् प्रत्युपेक्षणाप्रमार्जनादिपरिग्रहस्तेषु यथावीर्य—सामर्थ्यानुरूपं भाक्तः सद्भावसारं यतते प्रयत्नवान् भवति, अचलमुनीश्वरवत्।

तच्चरितं चैवम्—

भयरहिए निभयपुरम्मि, पुन्नजणविहियगरुयहरिसोवि। राया सि रामचन्दो, सलक्खणो रामचन्दु व्व ॥१॥

तस्स गुरुगउरवपयं, अयलो नामेण अत्थि सामन्तो। नयसच्चसोयसोंडीरयाइगुणरयणरयणनिही ॥२॥

कइयावि सो नरिन्दो, सभागओ भूरिसारपरिवारो। दुक्खभरखइगाए, गिराइ पउरेहि इय भणिओ ॥३॥

देव! न दीसइ चोरो, नय खत्तं नविय चरणसंचारो। केणवि तहवि मुसिज्जइ, अदिट्ठरूवेण पुरमेयं ॥४॥

तं सोउं कुविएणं, भणियं रन्ना अहो! सुहडसंघा। किं कोवि तक्करं तं, निग्गहिउं भे समत्थु त्ति ? ॥५॥

जा किंपि न बिंति भडा, ता अयलो आह देव! मह देसु। आएसं नणु कित्तियमित्तं एसो वराओ त्ति ॥६॥

रन्ना सहत्थतम्बोलदाणपुव्वं पयंपिओ स इमं। तह कुणसु भद्द! सिग्घं, जह लब्भइ तक्करो एसो ॥७॥

जइ पक्खंतो चोरं, न लहेमि अहं विसामि तो जलणं। इय काउ पइन्नं सो, विणिग्गओ रायभवणाओ ॥८॥

परिभमिओ पुरमज्झे, सिंघाडगतिगचउक्कमाईसु । लद्धो न कोवि चोरो, नीहरिओ तयणु नयराओ ॥९॥
करकलियखग्गदंडो, निविडीकयपरियरो दढपइन्नो । सो रयणिपढमपहरे, पत्तो कुंडाभिहमसाणे ॥१०॥
तत्थ अइकडुयकक्खडरडंतघूयडकुडुम्बदुप्पिच्छे । भल्लुंकचक्कपरिमुक्कपिक्कपिक्काररवरुद्दे ॥११॥
एगत्थ कालवेयालजालसंजणियकिलकिलारावे । अन्नत्थ मुक्कफुट्टट्टहासपरिभमिरभूयउले ॥१२॥
जा अक्खुहिओ अयलो, अयलो इव जाइ किंपि भूभागं । ता साहगहणणपरं, पिसायमेगं स पिच्छेइ ॥१३॥
तं पइ भणइ महायस! साहगपुरिसं हणेसि किं एयं? । आह पिसाओ इमिणा, पसाहिओ हं दिणे सत्त ॥१४॥
संपइ अइछुहिएणं, मए इमो मग्गिओ महामंसं । न तरइ दाउं खुद्दो, ता एयं लहु हणिस्सामि ॥१५॥
परउवयारपहाणो, अयलो पच्चाह मुञ्च नरमेयं । तुह देमि महामंसं, अहमिय मन्नइ पिसाओ वि ॥१६॥
तो छुरियाए छित्तुं, नियगमंसं स तस्स वियरेइ । असइ पिसाओ वि अहो! अभुत्तपुव्वं ति जम्पन्तो ॥१७॥
उक्कत्तिऊण जह जह, अयलो से देइ मंसखंडाइं । तह तह दिव्वोसहिविहियव्व वुड्ढिं छुहा जाइ ॥१८॥
नीसेसमंसवियलं, निएवि सयलं कलेवरं अयलो । अह जीवियनिरविक्खो, सीसंपि हु छित्तुमारद्धो ॥१९॥
धरिऊण पिसाएणं, दाहिणहत्थेण सत्ततुट्ठेण । भणिओ सो अलमेएण, साहसेणं वरेसु वरं ॥२०॥
अयलो भणेइ साहगइट्ठं पकरेसु जइसि तुट्ठो मे । एयं कयं चिय मए, मग्गसु अन्नंपि आह सुरो ॥२१॥
अयलो जम्पइ तुज्झवि, किं सीसइ अमर! मुणियकज्जस्स । नाउं ओहिबलेणं, तं कज्जं आह इय अमरो ॥२२॥

तं अयल ! गच्छ सगिहे, वीसत्थो होसु मुञ्चसु विसायं । एसो चोरपबन्धो, गोसे सयलो फुडो होही ॥२३॥
इय भणिय गओ अमरो, अयलोवि विसिट्ठदेहलायन्नो । निययावासे पत्तो, निच्चिन्तो लहइ निद्दं च ॥२४॥
ववगयनिद्दो अयलो, एएण पिसाएग पभणिओ भद्द ! । तं तक्करवुत्तंतं निसुणसु, सो आह कहसु फुडं ॥२५॥
एयस्स पुरस्स बहिं, पुव्वदिसाआसमे वसइ जोगी । पव्वइओ से सिद्धो, कविलक्खो चेडओ अत्थि ॥२६॥
तेणं हरेइ नयरे, सो सारं रमइ निसि जहिच्छाए । काऊग जोगिरूवं, दिवसे पुण कहइ धम्मकहं ॥२७॥
तस्सासमभूमिहरे, चिट्ठइ अवहरियदव्वसव्वस्सं । मा काहिसि इह संसयमिय भणिय तिरोहिओ देवो ॥२८॥
अह काउ गोसकिच्चं, अयलो कइवयजणाणुगो पत्तो । सुरकहियआसमे तत्थ, तेण दिट्ठो कवडजोगी ॥२९॥
ठाउणं तत्थ खणं, अयलो पत्तो नरिंदपयमूले । निवपुट्ठो एगंते, कहेइ तं चोरवुत्तंतं ॥३०॥
को इत्थ पच्चओ इय, नरवरपुट्ठो पयंपए अयलो । तस्सासमभूमिगिहंमि मोसजायं सयलमत्थि ॥३१॥
तो सिरवियणामिसवसविसज्जियासेसपरियणो राया । सुत्तो तयणु जणेणं, पारद्धा विविहउवयारा ॥३२॥
जाओ नय कोवि गुणो, आहूया मन्तवाइपमुहजणा । तेवि अकयपडियारा, गया विलक्खा सठाणेसु ॥३३॥
तो सुविसन्नमणेण व, सो जोगी वाहराविओ रन्ना । संभासिउमारद्धो, सायरदिन्नासणो य सयं ॥३४॥
पुरिसे य पेसिऊगं, खणाविओ तस्स आसमो झत्ति । निग्गयमसेसमोसं, आणीयं रायभवणंमि ॥३५॥
आहूओ तव्वेलं, महायणो दंसियं तयं मोसं । उवलक्खिऊण जं जस्स, आसि तं तस्स उवणीयं ॥३६॥

अह वुत्तो सो जोगी, रे रे पासंडियाहम! अणज्ज!। को एसो वुत्तन्तो, सो भीओ जंपइ न किंपि ॥३७॥
चेडो दूरीहूओ, सिद्धे कज्जंमि दुज्जणु व्व लहुं। सुबहुं विडंबिउं सो, जोगी माराविओ रन्ना ॥३८॥
इय दट्ठु तस्स मरणं, अयलो चिन्तेइ फुरियवेरग्गो। हा कह! जीवा धणलवविमोहिया जंति इह निहणं ॥३९॥
धणलोभेणं जीवो, हणेइ जीवे सया मुसं वयइ। पियपुत्तमित्तसुकलत्तपमुहलोयंपि वंचेइ ॥४०॥
इहलोइयतुच्छपओयणत्थमित्थं अकिंचलक्खंपि। काउं कंखइ जीवो, नय पिच्छइ तक्कयं दुक्खं ॥४१॥
अइगरुयलोहमुग्गरपहारभरगाढविहुरियसरीरा। हा किहणु दुग्गदुग्गइअवडे निवडंतिमे जीवा ॥४२॥
ता सयललोहसंखोहनिविडसरधोरणीखलणदक्खं। कवयं पिव पव्वज्जं, संपइ गिण्हामि दढसत्तो ॥४३॥
इय जा अचलो अचलियसंवेगभरो विचिंतए चित्ते। ता तत्थ समोसरिओ, सूरी गुणसुन्दरो नाम ॥४४॥
अयलोवि सुणियमुणिनाहआगमो आगओ गुरुसगासे। पणमियतप्पयपउमं, आसीणो उचियदेसंमि ॥४५॥
तयणु भवपरमनिव्वेयकारिणी लोहमोहनिम्महणी। विसयाणुरागपायवकरिणी संवेयसंजणणी ॥४६॥
संसारसमुत्थसमत्थवत्थुविगुणत्तपयडणपहाणा। सुइसुहकरेहि वयणेहिं, देसणा सूरिणा विहिया ॥४७॥
तं सोउं पडिबुद्धो, अयलो पुच्छेवि कहवि नरनाहं। गुरुणो तस्स समीवे, संविग्गो गिण्हए दिक्खं ॥४८॥
पडिवन्नदुविहसिक्खो, गुरुणा सह विहरए महीवलए। अरहन्ते अरिहन्ते, आराहइ सम्ममरुहन्ते ॥४९॥
पवयणवच्छल्लपरो, झायइ सिद्धे सया सुहसमिद्धे। सिवफलतरुणो गुरुणो, सेवइ दंसणविणयजुत्तो ॥५०॥



तत्र अचल-
मुनीश्वर-
कथा।

सुयवयपज्जायधरे, थेरे सुबहुस्सुए तवस्सी य । जह उचियं आराहइ, अभिक्खनाणोवओगपरो ॥५१॥
सीलव्वएसु आवस्सएसु परिहरइ दूरमइयारे । अपुव्वनाणग्गहणं, सुयभत्तिपरायणो कुणइ ॥५२॥
तवसा निकाइयाणं, कम्माण खउत्ति कुणइ गरुयतवं । खणलवझाणुवउत्तो, मुणीण भत्ताइ वियरेइ ॥५३॥
पडिभग्गस्स मयस्स व, नासइ चरणं सुयं अगुणणाए । नहु वेयावच्चचियं, सुहोदयं नासए कम्मं ॥५४॥
इय चिंतंतो वेयावच्चं पकुणइ अतिप्पमाणमणो । पवयणपभावणपरो, कुणइ समाहिं च संघस्स ॥५५॥
एवमणुत्तरदंसणनाणचरित्ते अतिप्पमाणस्स । उग्गतवकारिणो सुज्झमाणसुपसत्थलेसस्स ॥५६॥
अज्जियतित्थंकरनामकम्मणो तस्स अचलसाहुस्स । सव्वोसहिपमुहाओ, जायाओ विविहलद्धीओ ॥५७॥
इत्तो निभयपुरे रामचंदरन्नो विसिट्ठविज्जेहि । पयडिज्जंतेसु वि बहुभेसज्जोसहपओगेसु ॥५८॥
बहुमंततंतवाईहिं, कीरमाणासु अवि सुकिरियासु । रोगेण मरंति करी, तो आदन्नो निवो जाओ ॥५९॥
अह गुरुणाऽणुन्नाओ, अचलमुणी तत्थ आगओ तइया । पत्तो निवो मुणिं तं, नमिय निसन्नो उचियदेसे ॥६०॥
मुणिणावि निवइजुग्गो, सद्दंसणथूलमूलपरिकलिओ । पंचाणुव्वयखंधो, तिगुणव्वयगरुयसाहालो ॥६१॥
सिक्खावयपडिसाहो, निम्मलबहुनियमकुसुमसंकिन्नो । सुरमणुयसमिद्धिफलो, कहिओ गिहिधम्मकप्पतरू ॥६२॥
इय सोउ निवो जंपइ, पहु ! धम्ममिमं समीहिमो काउं । किंतु अकाले सिंधुरसंदोहं दट्ठु मरमाणं ॥६३॥
न गिहे न बहिं न जणे, न काणणे नय दिणे न रयणीए । मह संपइ संपज्जइ, रई मणागंपि मुणिपवर ! ॥६४॥

तो कहसु किंपि जेणं, सुत्थमणो हं करेमि धम्ममिमं । इय रन्ना पुणरुत्तं, वुत्तोवि हु सुमुणिसद्दूलो ॥६५॥
सावज्जकज्जवज्जी, सन्नाणो वि हु न किंपि जा भणइ । ता मुणिसमीवठियखेयरेण एवं निवो वुत्तो ॥६६॥
बहुलद्धिसमिद्धिसमन्नियस्स एयस्स समणसीहस्स । पयरेणूहिं संफुसिय कुणसु सज्जं करिसमूहं ॥६७॥
तं सुणिय निवो तुट्ठो, मुणिपयसंफुसियरेणुनियरेण । करिनियरं सव्वंपि हु, आमरिसावेइ तिक्खुत्तो ॥६८॥
विसमिव पीऊसहयं, तमं व दिणयरकिरणपडिरुद्धं । वेगेण रोगजायं, तं नट्ठं कुंजरकुलाओ ॥६९॥ [ग्रन्थाग्रं ८०००]
त पिच्छिवि अच्छरियं, अणत्थहरिसो इमं भणइ राया । भयवं! वारणवाही, केण निमित्तेण संजाओ? ॥७०॥
मुणिणा भणियं नरवर! जो जोई घाइओ तया तुमए । मरिउं अकामनिज्जरवसेण सो रक्खसो जाओ ॥७१॥
सरिऊण पुव्ववइरं, स तुह सरीरंमि अप्पभवमाणो । एयंपि होउ दुक्खं ति, कासी दंतीण रोगभरं ॥७२॥
मह चरणरेणुपुट्ठा, संपइ ते वाहिणो समुवसंता । सो रक्खसो पणट्ठो, सज्जं जायं करिकुडुंबं ॥७३॥
मुणिमाहप्पमणप्पं, दट्ठूणं गहियसुद्धगिहिधंमो । तुट्ठो राया पवयणपभावगो सावओ जाओ ॥७४॥

तत्र अचल
मुनीश्वर-
कथा ।

अयलोवि अतिप्पंतो, चरणाइसु काउ अणसणं सुमणो । सोहम्मे उववन्नो, तत्तो य चुओ विदेहंमि ॥७५॥
कच्छाविजए सिरिजयपुरीइ रन्नो पुरंदरजसस्स । देवी सुदंसणाए, चउदसवरसुमिणकयसूओ ॥७६॥
गब्भे पाउब्भूओ, समुचियसमए य जम्ममणुपत्तो । अहिसित्तो ससुरासुरवग्गेण सुमेरुसिहरंमि ॥७७॥
कयजयमित्तभिहाणो, उचिए समयंमि पव्वइउकामो । लोगंतियतियसेहिं, सविसेसपवुड्ढिउच्छाहो ॥७८॥



॥२५९॥

लोगाणं संवच्छरमच्छिन्नविदिन्नविहवसंभारो । चउसट्ठिसुरेसरविहियगरुयनिक्खमणवरमहिमो ॥७९॥
तिजयं एगजयंपिव, एगत्थागयसुरासुरनरेहिं । कुणमाणो पडिवन्नो निस्सामन्नं स सामन्नं ॥८०॥
तो सुक्कज्झाणानलसमूलनिद्दड्ढघाइकम्मदुमो । उप्पन्नकेवलालोयलोइयासेसतइलुक्को ॥८१॥
सीहासणोवविट्ठो, सिरउवरिं धरियसेयछत्ततिगो । नियदेहदुवालसगुणमहल्लकंकिल्लिकयसोहो ॥८२॥
चालियसियवरचमरो, पुरओ पक्खित्तकुसुमवरपयरो । निज्जियदिणयरमंडलभामंडलखंडियतमोहो ॥८३॥
सुरपहयदुन्दुहिस्सरपयडियदुज्जेयभावरिउविजओ । सव्वसभासाणुगदिव्ववाणिहयतिजयसन्देहो ॥८४॥
पायडियसुगइमग्गो, पडिबोहियभूरिभावभवियजणो । विहरित्ता चिरकालं, अणंतसुहसंपयं पत्तो ॥८५॥

**श्रीजैनशासनयनीनवनीरदस्य, श्रुत्वेति वृत्तमचलस्य मुनीश्वरस्य ।**
**सज्ज्ञानदर्शनतपश्चरणादिकेषु, श्रद्धामतृप्तमनसो मुनयो विधत्त ॥८६॥**

## ॥ इत्यचलमुनीश्वरचरित्रम् ॥

इत्युक्तमतृप्तिस्वरूपं द्वितीयं श्रद्धालक्षणम्, सांप्रतं शुद्धदेशनास्वरूपं तृतीयमभिधित्सुस्तदधिकारिणं तावदाह—

**सुगुरुसमीवे संमं, सिद्धंतपयाण मुणियत्तत्थो । तयणुन्नाओ धन्नो, मज्झत्थो देसणं कुणइ ॥१५॥**

सुगुरोः—संविग्नगीतार्थाचार्यस्य समीपे सम्यक्—पौर्वापर्यपर्यालोचनेन सिद्धान्तपदानामागमवाक्यानां पदार्थवाक्यार्थमहावाक्या-

थैदम्पर्यार्थप्रकारेण मुणिततत्त्वार्थो विज्ञातपरमार्थः—

उक्तं च—

"पयवक्कमहावक्कयअइदम्पज्जत्थवत्थु चत्तारि । सुयभावावगमम्मी, हंदि पगारा विणिद्दिट्ठा ॥

संपुन्नेहिं जायइ, भावस्स य अवगमो इहरहा उ । होइ विवज्जासोवि हु, अणिट्ठफलओ य सो नियमा । इति

एवंविधोऽपि गुरुणाऽनुज्ञातो, न स्वातन्त्र्येण मौखर्यास्थैर्यातिरेकादत एव धन्यो धर्मधनार्हत्वान्मध्यस्थः—स्वपक्षपरपक्षयो राग-द्वेषरहितः सद्भूतवादी देशनां—धर्मकथां करोतीति ।

तथा—

**अवगयपत्तसरूवो, तयणुग्गहहेउभाववुड्ढिकरं । सुत्तभणियं परूवइ, वज्जंतो दूरमुम्मग्गं ॥१६॥**

अवगतं—सम्यगवबुद्धं पात्रस्य श्रावणीयस्य प्राणिनः स्वरूपमाशयो येन सोऽवगतपात्रस्वरूपः ।

तथाहि—

बालमध्यमबुद्धिबुद्धभेदात्त्रिविधं पात्रं श्रावणीयं भवति । तत्र—

"बालः पश्यति लिङ्गं, मध्यमबुद्धिर्विचारयति वृत्तम् । आगमतत्त्वं तु बुधः, परीक्षते सर्वयत्नेन" ॥१॥



तेषां च देशनाविधिरेवम्—

"बाह्यचरणप्रधाना, कर्तव्या देशनेह बालस्य । स्वयमपि च तदाचारस्तदग्रतो नियमतः सेव्यः ॥१॥

सम्यग्लोचविधानं ह्यनुपानत्कत्वमथ धरा शय्या । प्रहरद्वयं रजन्यां स्वापः शीतोष्णसहनं तु ॥२॥
षष्ठाष्टमादिरूपं, चित्रं बाह्यं तपो महाकष्टम् । अल्पोपकरणसन्धारणं च तच्छुद्धता चैव ॥३॥
गुर्वी पिण्डविशुद्धिश्चित्रा द्रव्याद्यभिग्रहाश्चैव । विकृतीनां संत्यागस्तथैकसिक्थादिपारणकम् ॥४॥
अनियतविहारकल्पः, कायोत्सर्गादिकरणमनिशं च । इत्यादि बाह्यमुच्चैः, कथनीयं भवति बालस्य ॥५॥
मध्यमबुद्धेस्त्वीर्यासमितिप्रभृतित्रिकोटिपरिशुद्धम् । आद्यन्तमध्ययोगैर्हितदं खलु साधुसद्वृत्तम् ॥६॥
अष्टौ साधुभिरनिशं मातर इव मातरः प्रवचनस्य । नियमेन न मोक्तव्याः, परमं कल्याणमिच्छद्भिः ॥७॥
एतत्सचिवस्य सदा, साधोर्नियमान्न भवभयं भवति । भवति च हितमत्यन्तं, फलदं विधिनाऽऽगमग्रहणम् ॥८॥
गुरुपारतंत्र्यमेव च, तद्बहुमानात्सदाशयानुगतम् । परमगुरुप्राप्तेरिह, बीजं तस्माच्च मोक्ष इति ॥९॥
इत्यादिसाधुवृत्तं, मध्यमबुद्धेः सदा समाख्येयम् । आगमतत्त्वं तु परं, बुधस्य भावप्रधानं तु ॥१०॥
वचनाराधनया खलु, धर्मस्तद्बाधया त्वधर्म इति । इदमत्र धर्मगुह्यं, सर्वस्वं चैतदेवास्य" ॥११॥ इत्यादि ।

अथवा पारिणामिकापारिणामिकातिपारिणामिकभेदात्त्रिविधं पात्रमित्यादि पात्रस्वरूपमवगम्य श्रद्धावांस्तस्य पात्रस्यानुग्रहहेतुरुपकारी यो भावः–शुभपरिणामस्तस्य वृद्धिकरं तदपि सूत्रभणितमागमोक्तं प्ररूपयति–व्याचष्टे वर्जयन्–उत्सृजन् दूरं यथा भवत्येवमुन्मार्गं–मोक्षप्रतीपां वर्त्तिनीम् ।

अयमिहाभिप्रायः–सम्यक् पात्रस्वरूपमवगम्य तद्भाववृद्धिकारिकामनुवृत्त्यादिदोषरहितां सिद्धान्तमार्गानुत्तीर्णां देशनां विदधाति,

श्रेणिकं प्रति निर्ग्रन्थसाधुवत् ।



तथा हि—

मगहाजणवयअवयंसरायगिहनगरनायगो हुत्था । दुत्थियजणपरिपालणपउणमणो सेणिओ राया ॥१॥
सो अन्नदिणे सह चलिरफारसिंगारसारसुद्धंतो । सरहसनमन्तसामन्तमंतिसंदोहसंजुत्तो ॥२॥
हयगयरहवरपाइक्कचक्कअक्कंतसयलदिसिचक्को । हत्थिगओ सियचामरकयसोहो धरियसिरछत्तो ॥३॥
पुरओ पयट्टमागहमंडलगिज्जंतकंतकित्तिभरो । पत्तो विहारजत्ताइ, चेइए मंडिकुच्छिसि ॥४॥
तत्थुवविट्ठं दिट्ठा, तरुणो तरुणं निएवि मुणिमेगं । रइरहियं पिव मयणं, सुरूवमिय चिंतइ नरिन्दो ॥५॥
अज्जस्स अहो ! वन्नो, अहो ! सुरूवं अहो ! अहो ! मुत्ती । खन्ती अहो ! पहाणा, भोगेसु अहो ! असंगत्तं ॥६॥
अह नमिय तस्स पाए, कयंजली नाइदूरगो भणइ । तरुणत्तणेवि अज्जो ! उवट्ठिओ कीस सामन्ने ? ॥७॥
तो तयणुग्गहहेउं, सहेउअं सुद्धभावबुद्धिकरं । पत्ताणुरूवमेवं गिरं महेसी इय वएसी ॥८॥
मगहेस ! अणाहो हं, नाहो मह विज्जइ नहु नरिंद ! अणुकम्पगं सुहिं वा, नहु किंचि समेमि हं इत्थ ॥९॥
तेणाहं पडिवन्नो, दिक्खं बहुदुक्खलक्खखयजणणिं । अह हासवसविसप्पन्तदन्तकन्ती भणइ राया ॥१०॥

तत्र निर्ग्रन्थ-
साधुकथा ।

वरलक्खणवंजणगुणपिसुणियबहुविहववित्थरस्सावि । तुह मुणिपहु ! कह नाहो, न आसि अणुकंपग सुही वा ? ॥११॥
तो होमि अहं नाहो, तुज्झं बहुसयणपरियणसमेओ । भुंजेसु विसयसुक्खं, सुदुल्लहं पुणवि माणुस्सं ॥१२॥

तो सिद्धंताणुगयं, निवमणअणुवित्तिविरहियं निउणं । जुत्तिसुजुत्तं एयं, फुडक्खरं जंपियं मुणिणा ॥१३॥
भो ! भो ! सेणियनरवर ! तुमं अणाहोसि अप्पणावि धुवं । तो अप्पणा अणाहो, परेसिं नाहो कहं होसि ? ॥१४॥
एवं वुत्तो संतो, संभंतो नरवरो इमं आह । चउरंगबलजुओ हं, निरुवमभोगेहि कलिओ हं ॥१५॥
आणाइस्सरियसमिद्धरज्जजुत्तो अहं तओ तुमए । वुत्तो कहं अणाहो ? वयसु मुसं मा हु तं भंते ! ॥१६॥
अह मुणिणा वज्जरियं, एयस्स न पत्थिवा ! मुणसि अत्थं । नेव य उत्थाणं ता एगग्गमणो निसामेसु ॥१७॥
कोसंबीनयरीए, उवहसियकुबेरविहववित्थारो । आसि बहुसयणवग्गो, मह जणओ भुवणपयडजसो ॥१८॥
मगहाहिव ! मज्झ तया, पढमवइच्चिय सुदुस्सहा हुत्था । अच्छिवियणा महंती, तव्वसओ देहदाहो य ॥१९॥
देहंतो भमिरमहंतनिसियकुंतु व्व असणिनिहउ व्व । अइगाढनयणपीडाभरेण विवसो अहं जाओ ॥२०॥
बहुमंततंतविज्जाविऊ जणो मम करेइ तेगिच्छं । नय मोएइ दुहाओ, अणाहया निव ! इमा मज्झ ॥२१॥
मम कारणेण जणओ, गिहसव्वस्संपि देइ विज्जाणं । नय मोएइ दुहाओ, अणाहया निव ! इमा मज्झ ॥२२॥
बाहप्पवाहधोईयवयणा जणणीवि झूरए बहुयं । नय मोएइ दुहाओ, अणाहया निव ! इमा मज्झ ॥२३॥
किंकायव्वविमूढा, जिट्ठकणिट्ठा रुयंति तह बंधू । नय मोयंति दुहाओ, अणाहया निव ! इमा मज्झ ॥२४॥
भयणीउ वामकरयलसंठियवयणा रुयंति निहुयसरं । नय मोयंति दुहाओ, अणाहया निव ! इमा मज्झ ॥२५॥
उम्मुक्कपाणभोयणविलेवणाभरणपमुहवावारा । नयणेहि अंसुपुन्नेहिं, सिंचिरी मज्झ वच्छयलं ॥२६॥

पासाउ अप्फिडंती, खणंपि झूरेइ भारियावि बहुं । नय मोएइ दुहाओ, अणाहया निव ! इमा मज्झ ॥२७॥
कहमवि अणियत्तंतीइ, अच्छिवियणाइ थेवमित्तंपि । अहह ! इह नत्थि कोवि हु, नाहो इय चिंतयंतेणं ॥२८॥
विहिया मए पइन्ना, जइ मुंचिज्जा इमाइ वियणाए । तो चत्तसव्वसंगो, काहं अणगारियं पवरं ॥२९॥
एवं विहियपइन्नस्स, मज्झ रयणीइ आगया निद्दा । खयमुवगया य वियणा, जाओ म्हि पुणन्नवसरीरो ॥३०॥
जाए पभायसमए, तत्तो आपुच्छिउं सयणवग्गं । सिरिसव्वण्णुपणीयं, सुद्धं दिक्खं पवन्नो हं ॥३१॥
भो ! भो ! रायगिहेसर ! परस्स तह अप्पणो तदुभयस्स । सचराचरजियलोयस्स, तयणु नाहो अहं जाओ ॥३२॥

तथा—

इमा हु अन्नावि अणाहया निवा ! तमेगचित्तो निहुओ सुणेहि । नियंठधम्मं लहियाणवी जहा, सीयंति एगे बहुकायरा नरा ॥३३॥
जो पव्वइत्ताण महव्वयाणि, सम्मं च नो फासइ य पमाया । अणिग्गिहप्पा य रसेसु गिद्धे, न मूलओ छिंदइ बंधणं से ॥३४॥
आउत्तया जस्स न अत्थि काई, इरियाइ भासाइ तहेसणाए । आयाणनिक्खेवदुगुंछणाए, न वीरजायं अणुजाइ मग्गं ॥३५॥
चिरंपि से मुंडरुई भवित्ता, अथिरव्वए तवणियमेहिं भट्ठे । चिरंपि अप्पाण किलेइसत्ता, न पारए होइ हु संपराए ॥३६॥
पुल्ले व मुट्ठी जह से असारे, अयंतिए कूडकहावणे वा । राढामणी वेरुलियप्पगासे, अमहग्घए होइ हु जाणएसु ॥३७॥
कुसीललिंगं इह धारयित्ता, इसिज्झयं जीविय वूहइत्ता । असंजए संजय लप्पमाणे, विणिघायमावज्जइ से चिरंपि ॥३८॥
विसं तु पीयं जह कालकूडं, हणाइ सत्थं जह कुग्गहीयं । एमेव धम्मो विसओववन्नो, हणाइ वेयाल इवाविवन्नो ॥३९॥



तत्र निर्ग्रन्थ
साधुकथा ।

जे लक्खणं सुमिण पउंजमाणे, निमित्तकोऊहलसंपगाढे । कुहेडविज्जासवदारजीवी, न गच्छई सरणं तंमि काले ॥४०॥
तमंतमेणेव उ से असीले, सया दुही विप्परियासुवेइ । संधावई नरगतिरिक्खजोणिं, मोणं विराहित्तु असाहुरूवे ॥४१॥
उद्देसियं कीयगडं नियागं, न मुञ्चइ किंचि अणेसणिज्जं। अग्गीव वा सव्वभक्खी भवित्ता, इओ चुए गच्छइ कट्टु पावं ॥४२॥
न तं अरी कंठछित्ता करेइ, जं से करे अप्पणिया दुरप्पा । से नाहिई मच्चुमुहं तु पत्ते, पच्छाणुतावेण दयाविहूणे ॥४३॥
निरट्ठिया नग्गरुई उ तस्स, जे उत्तिमट्ठं विवज्जासमेइ । इमेवि से नत्थि परेवि लोए, दुहओवि से झिज्झइ तत्थ लोए ॥४४॥
एमेवऽहाछंदकुसीलरूवे, मग्गं विराहित्तु जिणुत्तमाणं । कुररी विवा भोगरसाणुगिद्धा, निरट्ठसोया परियावमेइ ॥४५॥
सुच्चाण मेहावि ! सुभासियं इमं, अणुसासणं नाणगुणोववेयं । मग्गं कुसीलाण जहाय सव्वं, महानियंठाण वए पहेणं ॥४६॥
चरित्तमायारगुणण्णिए तओ, अणुत्तरं संजम पालिया णं । निरासवे संखवियाण कम्मं, उवेइ ठाणं विउलुत्तमं धुवं ॥४७॥
एवुग्गदंतेवि महातवोहणे, महामुणी महापइण्णे महायसे । महानियंठिज्जमिणं महासुयं, से काहए महया वित्थरेणं ॥४८॥
एवं विसुद्धं समयाणुबद्धं, सुदेसणं साहुकयं निसम्म । चंचंतरोमंचपवंचगत्तो, कयंजली आह इमं नरिंदो ॥४९॥
तुज्झं सुलद्धं खु मणुस्सजम्मं, लाभा सुलद्धा य तुमे महेसी। तुब्भे सणाहा य सबंधवा य, जं भे ठिया मग्गि जिणुत्तमाणं ॥५०॥
तुमेव नाहो सि अणाहयाणं, जीवाण सव्वाण चराचराण । अणाहया सुट्ठुवदंसिया इमे, इच्छामि संमं अणुसट्ठिमेयं ॥५१॥
जो पुच्छिऊणं तुह झाणविग्घो, मए कओ कोवि महानियंठ !। निमंतिया जं पहु ! भोगकज्जे, पसीय सव्वंपि तयं खमेसु ॥५२॥
एवं थुणित्ताण स रायसीहो, महंतभत्तीइ णगारसीहं, पहिट्ठचित्तो परिवारजुत्तो, पत्तो नरिंदो निययंमि ठाणे ॥५३॥

साहूवि सुद्धाइ स देसणाए, चिरं विबोहित्तु पभूयभव्वे । खवित्तु सव्वंपि हु कंमजालं, पत्तो महाणंदपयं महप्पा ॥५४॥
एवं जगत्त्रितयविस्मयकारि हारि, निर्ग्रन्थसाधुवृषभस्य निशम्य वृत्तम् ।
सत्साधवो गुरुसमीपविबुद्धतत्त्वाः, संशुद्धदेशनविधौ कुरुत प्रयत्नम् ॥५५॥

॥ इति निर्ग्रन्थसाधुकथा ॥

आह—देशना धर्मोपदेशः, स च समभावस्य साधोरविशेषेण दातुमुचितः, किं सामायिकबाधाविधायिनाऽतिसंधानप्रायेण पात्रापात्रविचारेणेति । नैतदस्ति । तदनुग्रहाय प्रवृत्तावतिसंधानायोगात्, संनिपातातुरस्य क्षीरशर्करादिनिषेधनतः क्वाथादिप्रदानवत् । अत एव सामायिकबाधापि नास्ति, सर्वत्रानुग्रहबुद्धेस्तुल्यत्वाद् । अथवा सूत्रकार एव युक्त्यन्तरमाह ।

सव्वंपि जओ दाणं, दिन्नं पत्तंमि दायगाण हियं । इहरा अणत्थजणगं, पहाणदाणं च सुयदाणं ॥९७॥

सर्वमपि यतो दानं-वितरणं दत्तं-वित्तीर्णं पात्रे "सुपां सुपो भवन्ति" इति वचनात् पात्राय उचितग्राहकाय—
"जीवादिपदार्थज्ञो, यः समभावेन सर्वजीवानाम् । रक्षार्थमुद्यतमतिः, स यतिः पात्रं भवति दातुः" ॥
इत्यादिना श्रीमदुमास्वातिवाचकवर्णिताय-दायकानां-दातॄणां हितं-कल्याणकारि भवतीति शेषः । इतरथा कुपात्रायानिरुद्धाश्रवद्वाराय दत्तमिति प्रकृतम् अनर्थजनकं-संसारदुःखकारणं स्यादिति गम्यते । किंचातः प्रधानदानं च वर्तते श्रुतदानं देशनादिरूपमिति ।
ततः किमित्याह—

सुट्ठुयरं च न देयं, एयमपत्तंमि नायतत्तेहिं । इय देसणा विसुद्धा, इहरा मिच्छत्तगमणाई ।।९८।।

सुष्ठुतरम्–अतिशयेन चकारस्यावधारणार्थत्वान्नदेयमेव, एतत्–श्रुतोपदेशादिदानमपात्राय सप्तम्याश्चतुर्थ्यर्थत्वात् ज्ञाततत्त्वैर्विदितागमसद्भावैः—

उक्तं च—

"रत्तो दुट्ठो मूढो, पुव्विं वुग्गाहिओ य चत्तारि । उवएसस्स अणरिहा, अरिहो पुण होइ मज्झत्थो" ।।

इत्यपात्राणां परिहारेण पात्राणां चौचित्यवृत्त्या देशनापि क्रियमाणा शुद्धाऽभिधीयते, इतरथाऽन्यथा क्रियमाणायां तस्यां श्रोतृणां मिथ्यात्वगमनम्, आदिशब्दात् प्रद्वेषातिशयाद्भक्तपानशय्याव्यवच्छेदादयः प्राणहान्यादयश्च देशकस्य दोषाः संभवन्तीति। अत एव भावानुवृत्तिसारो गीतार्थः श्लाघ्यते ।

यदवादि—

"मग्गे य जोयइ तहा, केई भावाणुवत्तणनएण, बीयाहाणं पायं च तदुचियाणं कुणइ एसो" ।। गीतार्थ इति।

ननु सूत्रभणितं प्ररूपयतीत्युक्तम्, यत्पुनःसूत्रानुक्तं विवादपदं लोकानां तत्र पृच्छयमानानां गीतार्थानां किमुचितमित्याह—

जं च न सुत्ते विहियं, नय पडिसिद्धं जणंमि चिररूढं । समइविगप्पियदोसा, तंपि न दूसंति गयित्था ।।९९।।

इह चशब्दः पुनरर्थ इति यत् पुनरर्थजातमनुष्ठानं वा नैव सूत्रे–सिद्धान्ते विहितं करणीयत्वेनोक्तं चैत्यवन्दनावश्यकादिवत्, न

च प्रतिषिद्धं प्राणातिपातादिवत्, अथ च जने-लोके चिररूढमज्ञातादिभावं स्वमतिविकल्पितदोषात्-स्वाभिप्रायसंकल्पितदूषणात् तदपि, आस्तामागमोक्तं न दूषयन्ति-न युक्तमेतदिति परस्य नोपदिशन्ति संसारवृद्धिभीरवो गीतार्था-विदितागमतत्त्वाः, यतस्ते एवं श्रीभगवत्युक्तं पर्यालोचयन्ति—

तथाहि—

"जे णं मद्दुया! अट्ठं वा हेउं वा पसिणं वा वागरणं वा अन्नायं वा अदिट्ठं वा अस्सुयं वा अपरिन्नायं वा बहुजणमज्झे आघवेइ पन्नवेइ परूवेइ दंसेइ निदंसेइ उवदंसेइ, से णं अरहंताण आसायणाए वट्टइ, अरहंतपन्नत्तस्स धम्मस्स आसायणाए वट्टइ, केवलीणं आसायणाए वट्टइ, केवलिपन्नत्तस्स धम्मस्स आसायणाए वट्टइ" त्ति। इदं च गीतार्थानां सदा चेतसि चकास्ति।

तथाहि—

पंचवि इमे पहाणा, अन्नुन्नानिंदयाण साहूणं । अन्नुक्करिसविमुक्कइयत्रिवज्जयाणं जओ भणियं ॥९३॥
जोवि दुवत्थतिवत्थो, एगेण अचेलओ व संथरइ । नय ते दूसिंति परं, सव्वेवि य ते जिणाणाए ॥९४॥
इत्थ किर थेरकप्पो, निच्चो जम्हा इमंमि निप्पन्ना । सेसाण हुंति जोग्गा, तित्थं च इमेण निव्वहइ ॥९५॥
दुब्बलसंघयणाणं, एसच्चिय वद्धमाणपुरिसाणं । उचिओ कप्पो तम्हा, एयंमि हविज्ज उज्जुत्तो ॥९६॥

इय विविहजुत्तिसारं, पन्नविओ सूरिणा तहवि एसो । गाढाभिमाणवसओ, पडिभणिउं एवमाढत्तो ॥९७॥
जइ ताव मंदसत्ता, तुब्भे सुहलंपडा न उज्जमह । सइ सामत्थे किमहं, पमायसीलो हविस्सामि ? ॥९८॥
इय जंपंतो बहुहा, वारिज्जंतोवि वुड्ढवसहेहिं । पडिवन्ननग्गभावो, सिवभूई निग्गओ सहसा ॥९९॥
नेहेण य पव्वइया, लहुभइणी तस्स उत्तरा नाम । तं वच्चंतं दट्ठुं चिंतइ मह भाउणा नूणं ॥१००॥
एएण पगारेणं, दिट्ठो परलोयसाहणोवाओ । इय चिंतिय संचलिया, तहेव सा मग्गओ तस्स ॥१०१॥
लज्जाकरि त्ति काउं, वेसाए साडिया नियत्था से । तमणिच्छंतिं दट्ठूण, भाउणा सा इमं भणिया ॥१०२॥
देवयदिन्नं एयं, मा मुंचसु सुयणु साडियं एगं । इय एगसाडियत्तं, संजायं तस्स अज्जाणं ॥१०३।
एवं सो मोहंधो, आरंभेऊण कट्ठणुट्ठाणं । जाओ मिच्छादिट्ठी, दुग्गइदोहग्गभागी य ॥१०४॥

तथा चागमः—

ऊहाए पन्नत्तं, बोडियसिवभूइउत्तराहि इमं । मिच्छादंसणमिणमो, रहवीरपुरे समुप्पन्नं ॥१०५॥

अशक्यानुष्ठाने सुबहु शिवभूतिर्हतमतिः, प्रवृत्तिं कुर्वाणः समजनि भवे दुःखभवनम् ।
इति ज्ञात्वा सम्यक् सपदि परिहृत्याग्रहमिमं, सदा शक्यारम्भं कुरुत यतयो निर्मलधियः ॥१०६॥

तत्र शिवभूतिकथा ।

॥ इति शिवभूतिकथा ॥

महामोहता चास्य गुरावनवज्ञाबुद्ध्याऽऽत्मानमुन्नमयितुं प्रवृत्तत्वात् द्रष्टव्या। गुर्वाज्ञया शासनोन्नतिकारिणो लब्धिख्यातिनिरपेक्षस्य साधोरधिकृतपःकर्मातापनादिकरणं च वीर्याचाराराधनरूपत्वाद् गुणकरमेवेति।

इत्युक्तं शक्यानुष्ठानारम्भरूपं पञ्चमं भावसाधोर्लिङ्गम्, इदानीं षष्ठं गुणानुरागमाह—

**जायइ गुणेसु रागो, सुद्धचरित्तस्स नियमओ पवरो। परिहरइ तओ दोसे, गुणगणमालिन्नसंजणए॥१२०॥**

'जायते' संपद्यते गुणेषु—

"वय[५] समणधम्म[१०] संजम[१७] वेयावच्चं[१०] च बम्भगुत्तीओ[९]। नाणाइतियं[३] तव[१२] कोहनिग्गहा[४] इय चरणमेयं॥१॥

पिंडविसोही[४] समिई[५] भावण[१२] पडिमाउ[१२] इन्दिय[५]निरोहो। पडिलेहण[२५] गुत्तीओ[३], अभिग्गहा[४] चेव करणं तु"॥२॥

इत्यागमप्ररूपितेषु मूलगुणोत्तरगुणसंज्ञितेषु रागः—प्रतिबन्धः शुद्धचारित्रस्य—निष्कलङ्कसंयमस्य नियमतोऽवश्यंभावेन प्रवरः—प्रधानो न मिथ्या इति भावः, परिहरति—वर्जयति ततस्तस्माद्—गुणानुरागाद्दोषान्—दुष्टव्यापारान्, किंविशिष्टान्? गुणगणमालिन्यसंजनकान्—ज्ञानादीनामशुद्धिहेतून् भावसाधुरिति।

गुणानुरागस्यैव लिङ्गमाह—

**गुणलेसंपि पसंसइ, गुरुगुणबुद्धीइ परगयं एसो। दोसलवेणवि नियय, गुणनिवहं निग्गुणं गणइ॥१२१॥**

गुणलेशमपि, आस्तां महीयांसं गुणमित्यपेरर्थः, प्रशंसति—श्लाघते परगतमन्यसत्कमेष—भावसाधुः, उत्तमप्रकृतित्वान्महतोपि दी-

षानुत्सृज्य स्वल्पमपि परगतं गुणं पश्यति, कुथितकृष्णसारमेयशरीरे सितदन्तपङ्क्तिं पुरुषोत्तमवत् । तथा दोषलवेनापि-अल्पप्रमादस्खलितेनापि निजकम्-आत्मीयं गुणनिवहं-गुणकलापं निर्गुणम्-असारं गणयति-कल्पयति 'धिङ् मां प्रमादशीलम्' इति भावनया प्रकृतो भावयति, कर्णस्थापितविस्मृतशुण्ठीखण्डापश्चिमदशपूर्वधरश्रीवज्रस्वामिवदिति ।

पुरुषोत्तमचरितं पुनरेवम्—

अत्थि सुरट्ठाविसए, बारवई नाम पुरवरी रम्मा । कञ्चणमणिमयमन्दिरपायारा धणयनिम्मविया ॥१॥
तत्थ य हरिकुलनहयलहरिणंको अरिसमूहमयमहणो । महुमहणो नाम निवो दाहिणभरहद्धरज्जधरो ॥२॥
तत्थ कयावि हु विहुणियअइघणघणघाइकम्मपब्भारो । दुरियदुमदलणनेमी अरिट्ठनेमी समोसरिओ ॥३॥
सिरिरेवयगिरिसंठियउज्जाणे नन्दणंमि रमणीए । सुररइयसमोसरणे, उवविट्ठो देसणं काउं ॥४॥
तत्तो निउत्तपुरिसा, जिणआगमणं सुणेवि हिट्ठमणो । चलिओ भरहद्धवई, वन्दणहेउं जिणिंदस्स ॥५॥
चलिया तेण समाणं, दसवि दसारा समुद्दविजयाई । तह चेव महावीरा, पञ्चवि बलदेवपामुक्खा ॥६॥
सोलस रायसहस्सा, संचलिया उग्गसेणनिवपमुहा । इगवीससहस्सा, वीरसेणपमुहाण वीराणं ॥७॥
दुद्दन्तकुमाराणं, सट्ठिसहस्साण संबपमुहाणं । पज्जुन्नप्पमुहाओ, अद्धुट्ठकुमारकोडीओ ॥८॥
छप्पन्नं च सहस्सा, महसेणप्पमुहबलवगाणंपि । अन्नोवि सिट्ठिमाई नागरलोगो अणेगविहो ॥९॥
इत्तो सोहम्मवई, विण्हुमणं ओहिणा मुणेऊण । गाढं हरिसियहियओ, सहागओ भणइ नियअमरे ॥१०॥



तत्र पुरुषोत्तमचरितम्

हंहो ! पिच्छह पिच्छह, एए किर केसवा महाभागा । गुरुगुणबुद्धीइ नियन्ति, परगयं गुणलवंपि सया ॥११॥
सिसुणो इव खलु पहुणो, जहतह जम्पन्ति इय विचिन्तेउं । सिग्घं परिक्खणत्थं, एगो अमरो इहं पत्तो ॥१२॥
ओसरणगमणमग्गे, गयजीयं परमदुरहिगन्धड्ढं । वियसियमुहसियदन्तं, एगं साणं विउव्वेइ ॥१३॥
तग्गन्धेणभिभूयं, सिन्नं सयलंपि अन्नओ हुत्तं । दढपिहियवयणनासाउडं फुडं गन्तुमारद्धं ॥१४॥
कण्हो पुण वच्चन्तो, तेणेव पहेण दट्ठु तं साणं । परगुणलेसग्गहणंमि लालसो जम्पए एवं ॥१५॥
एयस्स कसिणसाणस्स, आणणे सेयदन्तघणपंती । एसा मरगयथाले, मुत्तामालेव कह सहइ ? ॥१६॥
इय नाउं हरिचरियं, कहवि न दोसं वयन्ति सप्पुरिसा । सो जायपच्चओ सुरवईमि, पयडेइ नियरूवं ॥१७॥
परगुणगहणपहाणं, बहुसो थुणिउं हरिं सबहुमाणं । असिवोपसमणभेरिं च, दाउ अमरो गओ सग्गं ॥१८॥
तत्तो कण्हो पत्तो, ओसरणे जिणवरं नमिय विहिणा । उचियट्ठाणे निसियइ, इय सामी कहइ धम्मकहं ॥१९॥
भो भविया ! भवगहणे, दुलहं कहकहवि लहिय संमत्तं । तस्स विसुद्धिनिमित्तं, संतगुणपसंसणं कुणह ॥२०॥
जह सयलतत्तविसया, अरुई सम्मत्तनासिगा भणिया । तह संतगुणाणुववूहणा वि अइयारसंजणणी ॥२१॥
जइ संतावि न हु गुणा, पसंसणं पाउणंति सत्ताणं । तो बहुकिलेससज्झाण, ताण को आदरं कुज्जा ? ॥२२॥
ता नाणाईविसए, गुणलेसं जत्थ जत्तियं पासे । संमत्तंगं अवगम्म, तत्थ संसिज्ज तावइयं ॥२३॥
जो पुण मच्छरवसओ, पमायओ वा गुणे न संसिज्जा । संतेवि सो दुहाइं, पावइ भवदेवसूरि व्व ॥२४॥

पुच्छेइ हरी भयवं ! भवदेवो नाम एस को सूरि ?। भणइ पहू इह भरहे, आसि पुरा एस मुणिनाहो ॥२५॥
बुद्धीइ सुरगुरुसमो, नवरं चरणंमि ईसिसिढिलमणो ।तस्स य एगो सीसो, नामेणं बन्धुदत्तु त्ति ॥२६॥
सो पुण निम्मलचरणो, सुहुममई वायलद्धिसंपन्नो । तक्कागमेसु कुसलो, अमच्छरिल्लो विणीओ य ॥२७॥
तो तस्स पायमूले, जिणसमयवियक्खणा समणसंघा । सत्थवियड्ढा सड्ढावि, विणयपवणा कयंजलिणो ॥२८॥
निसुणंति जिणिंदागममुवउत्तमणा तहत्ति जम्पन्ता । पकुणंति य बहुमाणं, पवित्तचारित्तजुत्तु त्ति ॥२९॥
तो भवदेवो सूरी, मच्छरभरिओ विचिंतए हियए । मं मुत्तु इमे मुद्धा, किं एयं पज्जुवासंति ? ॥३०॥
अहवा मुद्धा मुणिणो, गिहिणो व इमे कुणंतु जं किंपि । एस उण कीस सीसो, तहा मए दिक्खिओ वि फुडं ? ॥३१॥
तह बहुसुओ मइ च्चिय, कओवि तह गुरुगुणेसु ठविओत्ति । मं अवगणिउं एवं, वट्टइ परिसाइ भेयंमि ॥३२॥
नरनाहंमि जियन्ते, न छत्तभङ्गो हवेइ एसोवि । एएण अणज्जेणं, मन्ने ण सुओ जणपवाओ ॥३३॥
जइ संपइ वारिज्जइ, इमो मए धम्मकहणभाईयं । तो मच्छरि त्ति लोगो, मुद्धो मं मन्नए एस ॥३४॥
ता काउ उवेह च्चिय, इमंमि मूढंमि इण्हि मह उचिया । इय जा मच्छरपुन्नो, सो सूरी गमइ कइवि दिणे ॥३५॥
ता पाडलिपुरनयरा संघाएसेण तस्स पासंमि । पत्तो मुणिसंघाडो, मुणीहि अब्भुट्ठिओ सोवि ॥३६॥
अथ तस्य यतिपतेर्यतिजनस्य कृत्वा यथोचितं सर्वम् । मुनिश्रृंगाटक एवं, संघादेशं न्यवीविदत ॥३७॥
प्रज्ञावज्ञातगुरुर्विदुराख्यो व्यक्तलिङ्गिकस्तत्र । स्वैरं विजहार चिरं, षड्दर्शनविप्लुतिं कुर्वन् ॥३८॥

तथाहि—

काणादानमदान् प्रनष्टधिषणाधिक्यान् बहून् गौतमान् , शाक्यान् तर्कवचोविचारविमुखान् सांख्यानसंख्यानपि ।
कौलान् भ्रष्टबलान् निरस्तयशसो मीमांसकान् व्यंसकान्, कुर्वन् वारणवद्विशङ्कमचरत् सर्वत्र गर्वोद्धुरः ॥३९॥
संप्रति जैनमुनीन्द्रैः, सार्द्धं स्पर्द्धां चिकीर्षते दुष्टः । तद्दर्शनकृत्यमिदं कर्तुं तत्रैत लघु यूयं ॥४०॥
इय सोउं सो सूरी, जा चलिओ पाडलीपुराभिमुहं । पवयणपभावणत्थं, ता जाया अभिमुहा छीया ॥४१॥
वामा खेमा लाभंमि, दाहिणा पच्छिमा नियत्तेइ । छीया नूणमभिमुहा कयंपि कज्जं विणासेइ ॥४२॥
इय चिंतिऊण सूरी, विहारकरणाउ उवरओ सहसा । तो भणियं आगंतुयमुणिसंघाडेण वयणमिणं ॥४३॥
जइ तुम्हाण विहारो, सउणअभावाउ तत्थ न हु जाओ । ता बंधुदत्तसाहुं, लहु पेसह वायलद्धिल्लं ॥४४॥
तो सूरिणा बहुविहं, विचिंतिउं सो विसज्जिओ तत्थ । पत्तो थोवदिणेहिं, सुसउणपरिवुड्ढिउच्छाहो ॥४५॥
दिट्ठो तत्थ नरिंदो, कया पइन्ना इमा दुवेहिंपि । जो जेण नूण जिप्पइ, स तस्स सीसो हवेउ त्ति ॥४६॥
तो बंधुदत्तमुणिणा, सियवायविसुद्धबुद्धिविहवेण । बहुवयणवित्थरेणं, वायंमि पराजिओ विदुरो ॥४७॥
लद्धं च विजयपत्तं, विदुरो पव्वाविओ तया चेव । वियसियमुहकमलेणं, पसंसिओ सयलसंघेण ॥४८॥
विदुरविणेयसमेओ, पए पए बहुजणेण थुव्वंतो । तो बंधुदत्तसाहू, पत्तो नियसूरिपासंमि ॥४९॥
तेण पुण मच्छरवसा, न मणागंपि हु पसंसिओ एस । नय दिट्ठो ससिणेहं, आलविओ सहरिसं नेव ॥५०॥

हा ! जइ गुरुणोवि मए, न रंजिया मंदबुद्धिकलिएण । ता सेसाण गुणाणं समज्जणेणं हवउ मज्झ ॥५१॥
इय चिंताउलचित्तो, हिययंमि वहंतओ महाखेयं । तप्पभिइ बंधुदत्तो, जाओ गुणअज्जणे विमुहो ॥५२॥
अकयनियदोससुद्धी, भवदेवमुणीसरोवि मरिऊण । पयडबहुकिब्बिसेसुं, किब्बिसिएसुं सुरो जाओ ॥५३॥
तयणु दरिद्दियदियनंदणो य सो मूयओ समुप्पन्नो । कहकहवि लहिय बोहिं, काउ तवं सग्गमणुपत्तो ॥५४॥
इय सोउ कण्हपमुहा, लोया भवदेवसूरिणो चरियं । जाया पमुइयहियया, परगुणगहणिक्कतल्लिच्छा ॥५५॥
भुज्जो भुज्जो नेमिं, पणमिय पत्ता सएसु ठाणेसु । समणगणसंपरिवुडो, विहरइ अन्नत्थ सामीवि ॥५६॥

इति स्फुरद्दोषलतालवित्रं, निशम्य विष्णो रुचिरं चरित्रम् ।
दुष्कर्मनीरौघभिदानिदाघं सुभाधवो धत्त गुणानुरागम् ॥५७॥

॥ इति पुरुषोत्तमचरित्रम् ॥

श्रीवज्रस्वामिचरितं पुनः प्रायः सुप्रतीतत्वात् दिनकृत्यटीकायां सुप्रपञ्चितत्वाच्च नेह वितन्यत इति ।

गुणानुरागस्यैव लिङ्गान्तरमाह—

**पालइ संपत्तगुणं, गुणड्ढसंगे पमोयमुव्वहइ । उज्जमइ भावसारं, गुरुतरगुणरयणलाभत्थी ॥१२२॥**

पालयति–रक्षति वर्द्धयति च जननीव प्रियपुत्रम्, संप्राप्तं–सम्यक् कर्मक्षयोपशमोपलब्धं गुणं–ज्ञानदर्शनचारित्रादिरूपम्, तथा

गुणराढ्यानां सङ्गे–मीलके चिरप्रोषितस्निग्धबन्धुसंप्रयोग इव प्रमोदमानन्दमुत्प्राबल्येन वहति–प्राप्नोति।

तद्यथा—

असतां सङ्गपङ्केन, यन्मनो मलिनीकृतम्। तन्मेऽद्य निर्मलीभूतं, साधुसम्बन्धवारिणा ॥१॥
पूर्वपुण्यतरोरद्य, फलं प्राप्तं मयाऽनघम्। सङ्गेनासङ्गचित्तानां, साधूनां गुणधारिणाम् ॥२॥

तथा गुणानुरागादेवोद्यच्छति–प्रयतते भावसारं–सद्भावसुन्दरं यथा भवति ध्यानाध्ययनतपःप्रभृतिकृत्येष्विति गम्यते। किमित्यत आह–गुरुतराणि क्षायिकभावभावित्वाद् यानि गुणरत्नानि क्षायिकज्ञानदर्शनचारित्राणि तेषां यो लाभस्तदर्थी–तदभिलाषवान्। तथाहि–भवत्येवोद्यमवतामपूर्वकरणक्षपकश्रेणिक्रमेण केवलज्ञानादिसंप्राप्तिः सुप्रतीतमेतदिति।

गुणानुरागस्यैव प्रकारान्तरेण लक्षणमाह—

**सयणुत्ति व सीस त्ति व उवगारि त्ति व गणिव्वओ व त्ति। पडिबन्धस्स न हेऊ, नियमाएयस्स गुण हीणो ॥**

स्वकीयो जनः स्वजनः, इतिशब्दस्तद्भेदसूचकः, वाशब्दः समुच्चये, ह्रस्वत्वं प्राकृतशैल्या, शिष्यो विनेय इतिवाशब्दौ पूर्ववत्, उपकारी–भक्तपानदानादिना पूर्वमुपकृतवान्। इतिवाशब्दौ प्राग्वत्। 'गणिव्वओ व त्ति' एकगच्छवासी। इतिवाशब्दौ पूर्ववदेव। एतेषामेकैकोपि प्रायः प्रतिबन्धकारणं संभवति, एतस्य पुनर्गुणानुरागिणो नियमान्निश्चयेन न–नैव हेतुर्निमित्तमेकोऽपि भवत्येतेषाम्। किंविशिष्टः सन्नित्याह–गुणहीनो–निर्गुणः।

"सीसो सज्झिलओ वा, गणिव्वओ वा न सोग्गइं नेइ। जे तत्थ नाणदंसणचरणा ते सोग्गईमग्गो ॥" इति कृत्वा।

अथ चारित्रिणां तेषां स्वजनादीनां किं विधेयमित्याह—

**करुणावसेण नवरं, अणुसासइ तंपि सुद्धमग्गंमि । अच्चंताजोग्गं पुण, अरत्तदुट्ठो उवेहेइ ॥१२४॥**

करुणा–परदुःखनिवारणबुद्धिः । उक्तं च—

"परहितचिन्ता मैत्री, परदुःखनिवारिणी तथा करुणा । परसुखतुष्टिर्मुदिता, परदोषोपेक्षणमुपेक्षा" ॥

तद्वशेन–तद्रसिकतया, नवरं–केवलं रागदोषपरिहारेणानुशास्ति–शिक्षयति तमपि–स्वजनादिकम्, अपिशब्दात्तदितरमपि, क्वेत्याह–शुद्धमार्गे–यथावस्थितमोक्षाध्वविषये । तद्यथा—

"किं नारकतिर्यङ्नरविबुधगतिविचित्रयोनिभेदेषु । बत संसरन्न सततं, निर्विण्णो दुःखनिलयेषु ॥१॥

येन प्रमादमुद्धतमाश्रित्य महाधिहेतुमस्खलितम् । संत्यज्य धर्मवित्तं, रतस्त्वमार्येतराचरणे ? ॥२॥

यन्न प्रयान्ति जीवाः, स्वर्गं यच्च प्रयान्ति विनिपातम् । तत्र निमित्तमनार्यः, प्रमाद इति निश्चितमिदं मे" ॥३॥

किंच—

केवलं रिपुरनादिमानयं सर्वदैव सहचारितामितः । यः प्रमाद इति विश्रुतः परामस्य वित्त शठतामकुण्ठिताम् ॥४॥

यत् करोति विकथाः प्रथावतीर्यत्खलेषु विषयेषु दृप्यति । सुप्तमत्त इव यद्विचेष्टते, यन्न वेत्ति गुणदोषयोर्भिदाम् ॥५॥

क्रुध्यति स्वहितदेशनेऽपि यत् ,यच्च सीदति हितं विदन्नपि । लोक एष निखिलं दुरात्मनस्तत्प्रमादकुरिपोर्विजृम्भितम् ॥६॥ 

इत्यवेत्य परिपोष्य पौरुषं दुर्जयोपि रिपुरेष जीयताम् । यत् सुखाय न भवन्त्युपेक्षिता व्याधयश्च रिपवश्च जातुचित्" ॥७॥

इत्यादिविविधवाचोयुक्तिभिरुत्पादितसंवेगं तं शुद्धधर्मे प्रवर्तयति प्रज्ञापनीयश्चेदसौ स्यात्, अत्यन्तायोग्यं—बाढमप्रज्ञापनीयं पुनस्तमरक्तद्विष्टो—रागद्वेषरहित उपेक्षते—अवधीरयति "उपेक्षा निर्गुणेषु" इति वाक्यमनुसृत्येति गाथार्थः

गुणानुरागस्यैव फलमाह—

**उत्तमगुणाणुरायाा, कालाइदोसओ अपत्ताविं । गुणसंपया परत्थवि, न दुल्लहा होइ भव्वाणं ॥१२५॥**

उत्तमा—उत्कृष्टा गुणा—ज्ञानादयस्तेष्वनुरागः—प्रीतिप्रकर्षस्तस्माद्धेतोः कालो दुःषमादिरूपः, आदिशब्दात् संहननादिपरिग्रहः, त एव दोषा—दूषणानि विघ्नकारित्वात्, ततोऽप्राप्ता अपि, आस्तां तावत्प्राप्तेत्यपेरर्थः, गुणसंपत्—परिपूर्णधर्मसामग्री वर्त्तमानजन्मनीति गम्यते, परत्रेति भाविभवे, अपिः संभावने संभवति एतद्, नैव दुर्लभा—दुरापा भवति भव्यानां—मुक्तिगमनयोग्यानामिति ।

उक्तं गुणानुरागरूपं षष्ठं भावसाधोर्लिङ्गम्, संप्रति गुर्वाज्ञाराधनरूपं सप्तमं लिङ्गमाह—

**गुरुपयसेवानिरओ, गुरुआणाराहणंमि तल्लिच्छो। चरणभरधरणसत्तो, होइ जई नन्नहा नियमा ॥१२६॥**

अत्र कश्चिदाह—

पूर्वाचार्यैश्चारित्रिणो लिङ्गषट्कमेवोक्तम्, यदवाचि—

"मग्गाणुसारी[1] सड्ढो[2] पन्नवणिज्जो[3] कियावरो चेवं । गुणरागी सक्कारंभसंगओ[6] तहय चारित्ती" ॥

तत्कुत्रेदं सप्तमं गुर्वाज्ञाराधनरूपं भावसाधोर्लिङ्गं भणितम् ?

उच्यते—

चतुर्दशशतप्रकरणप्रासादसूत्रधारकल्पप्रभुश्रीहरिभद्रसूरीभिरुपदेशपदशास्त्रे भणितमेवेदमपि लिङ्गम् । तथा चैतत्सूत्रम्—

"एयं च अत्थि लक्खणमिमस्स नीसेसमेव धन्नस्स । तह गुरुआणासंपाडणं च गमगं इह लिंगं" ॥

इत्यलं विस्तरेण, प्रकृतं सूत्रं व्याख्यानयन्नाह—गुरवः षट्त्रिंशद्गुणयुक्ताः । तथाहि—

"देसकुलजाइरूवी, संघयणी धिइजुओ अणासंसी । अविकत्थणो अमाई, थिरपरिवाडी गहियवक्को ॥१॥

जियपरिसो जियनिद्दो, मज्झत्थो देसकालभावन्नू । आसन्नलद्धपइभो, नाणाविहदेसभासन्नू ॥२॥

पञ्चविहे आयारे, जुत्तो सुत्तत्थतदुभयविहिन्नू । आहरणहेउकारणनयनिउणो गाहणाकुसलो ॥३॥

ससमयपरसमयविऊ, गम्भीरो दित्तिमं सिवो सोमो । गुणसयकलिओ जुत्तो, पवयणसारं परिकहेइ" ॥४॥

तत्र आर्यदेशोद्भूतः सुखाववोधवचनो भवति ततो देशग्रहणम्[1], कुलं–पैतृकमिक्ष्वाक्वादि, तज्जातश्च यथोत्क्षिप्तभारवहने न श्राम्यति[2], जातिर्मातृकी, तत्संपन्नो हि विनयादिगुणवान् स्यात्[3] । "यत्राकृतिस्तत्र गुणा भवन्ति" इति रूपग्रहणम्[4], संहननधृतियुतो न व्याख्यानादिषु खेदमेति[5][6], अनाशंसी–श्रोतृभ्यो न वस्त्राद्याकाङ्क्षति[7], अविकत्थनो–हितमितभाषी[8], आमायी–विश्वास्यः[9], स्थिरपरिपाटिः–स्थिरपरिचितग्रन्थस्य सूत्रार्थगलनाभावात्[10], ग्राह्यवाक्यः–सर्वत्रास्खलिताज्ञः[11], जितपरिषद् राजादिसदस्यपि न क्षोभमुपयाति[12], जितनिद्रो निद्राप्रमादिनः शिष्यान् सुखेनैव बोधयति[13], मध्यस्थः—शिष्येषु समचित्तः[14], देशकालभावज्ञः–सुखेनैव गुणवद्देशादौ विहरति[15], आसन्नलब्धप्रतिभो द्राक् परवाद्युत्तरदानसमर्थः[16], नानाविधदेशभाषाज्ञः–नानादेशजान् शिष्यान् सुखेनैवावबोधयति[17],

ज्ञानाद्याचारपञ्चकयुक्तः श्रद्धेयवचनः स्यात्[24], सूत्रार्थतदुभयविधिज्ञः उत्सर्गापवादप्रपञ्चं यथावद् ज्ञापयति[25], आहरणं—दृष्टान्तः, हेतुरन्वयव्यतिरेकवान्, कारणं दृष्टान्तादिरहितमुपपत्तिमात्रम्, नया नैगमादयः, एषु निपुणः सुखेनैतान् प्रयुङ्क्ते[29], ग्राहणाकुशलः बह्वीभियुक्तिभिः शिष्यान् बोधयति[30], स्वसमयपरसमयज्ञः सुखेनैव तत्स्थापनाव्यूहौ विधत्ते[32], गम्भीरोऽलब्धमध्यः[33], दीप्तिमान्—पराधृष्यः[34], शिवहेतुत्वाच्छिवः, तदधिष्ठिते देशे मार्याद्युपशमनात्[35], सौम्यः सर्वजनमनोनयनरमणीयः[36], गुणशतकलितः प्रश्रयाद्यनेकगुणोपेतो युक्तोऽर्हत्प्रवचनसारं परिकथयितुं प्रवचनानुयोगयोग्यो भवतीत्यर्थः।

अथवा एवं षट्त्रिंशद् गुणाः—

अट्ठविहा गणिसंपय, चउग्गुणा नवरि हुंति बत्तीसं। विणओ य चउब्भेओ, छत्तीस गुणा इमे तस्स ॥१॥

गणो गच्छोऽस्यास्तीति गणी आचार्यस्तस्य संपत्—समृद्धिः, सा च अष्टविधा—

"आयार[1] सुय[2] सरीरे[3] वयणे[4] वायण[5] मई[6] पओगमई[7]। एएसु संपया खलु अट्ठमिया संगहपरिन्ना" ॥

आचार[1]श्रुत[2]शरीर[3]वचन[4]वाचना[5]मति[6]प्रयोगमति[7]संग्रहपरिज्ञा[8]भेदादष्टधा, नवरं चतुर्गुणाश्चतुर्भिर्गुणिता भवन्ति द्वात्रिंशत् सूरिगुणाः।

तत्राचारोऽनुष्ठानं स एव संपत्, सा चतुर्द्धा, तद्यथा—संयमध्रुवयोगयुक्तता—चरणे नित्यं समाध्युपयुक्ततेत्यर्थः, असंप्रग्रह आत्मनो जात्याद्युत्सेकरूपाग्रहवर्जनम्[2] अनियतवृत्तिरनियतविहारः[3], वृद्धशीलता—वपुर्मनसो निर्विकारता[4]।

एवं श्रुतसंपच्चतुर्द्धा—बहुश्रुतता—युगप्रधानागमतेत्यर्थः, परिचितसूत्रता—उत्क्रमक्रमवाचनादिभिः स्थिरसूत्रता[2], विचित्रसूत्रता—स्वसमयादिभेदात्[3], घोषविशुद्धिकरणता, उदात्तादिविज्ञानात्[4]।

शरीरसंपच्चतुर्द्धा—आरोहपरिणाहयुक्तता–उचितदैर्घ्यादिविस्तरतेत्यर्थः[1], अनवत्रप्यता–अलज्जनीयाङ्गता[2], परिपूर्णेन्द्रियता अनुपहतचक्षुरादिकरणता[3], स्थिरसंहननता–तपःप्रभृतिषु शक्तियुक्तता[4]।

वचनसंपच्चतुर्द्धा—आदेयवचनता[1], मधुरवचनता[2], अनिश्रितवचनता मध्यस्थवचनतेत्यर्थः[3], असंदिग्धवचनता[4]।

वाचनासम्पच्चतुर्द्धा—विदित्वोद्देशनं–परिणामकादिकं शिष्यं ज्ञात्वेत्यर्थः[1], विदित्वा समुद्देशनम्[2], परिनिर्वाप्य वाचना–पूर्वदत्तालापकान् शिष्यमधिगमय्य पुनः सूत्रदानम्[3], अर्थनिर्वापणा–अर्थस्य पूर्वापरसांगत्येन गमनिका[4]।

मतिसम्पच्चतुर्धा—अवग्रहे[1]हा[2]वाय[3]धारणा[4]भेदात्।

प्रयोगमतिसम्पच्चतुर्द्धा—इह प्रयोगो वादमुद्रा, तत्रात्मपरिज्ञानं वादादिसामर्थ्यविषये[1], पुरुषपरिज्ञानम्–किमयं वादी सांख्यो बौद्धो वेत्यादि[2], क्षेत्रपरिज्ञानं–किमिदं मायाबहुलमन्यथा वा, साधुभावितमभावितं वेति[3], वस्तुज्ञानं–किमिदं राजामात्यसभ्यादि भद्रमभद्रकं वा[4]।

संग्रहः–स्वीकरणम्, तत्र परिज्ञानमष्टमी संपत्, सा चतुर्द्धा, तथाहि–पीठफलकादिविषया[1], बालादियोग्यक्षेत्रविषया[2], यथासमयं स्वाध्यायादिविषया[3], यथोचितविनयादिविषया चेति[4]।

तथा विनयश्चतुर्भेदः—

"आयारे १ सुयविणये २, विक्खिवणे चेव होइ बोद्धवे ३। दोसस्स य निग्घाए ४ विणए चउहेस पडिवत्ती" ॥

तत्राचारविनयः–संयमतपोगणैकाकविहारविषयचतुर्विधसामाचारीस्वरूपः, तत्र पृथ्वीकायरक्षादिसप्तदशपदेषु स्वयंकरणान्यकारण-

सीदत्स्थिरीकरणयतमानोपबृंहणात्मिका संयमसामाचारी १, पाक्षिकादिषु चतुर्थादितपसि स्वपरयोर्व्यापारणरूपा तपःसामाचारी २, प्रत्युपेक्षणादिषु बालग्लानादिवैयावृत्त्यादिषु विषीदद्गणप्रवर्त्तनस्वयमुद्यमनस्वभावा गणसामाचारी ३, एकाकिविहारप्रतिमायाः स्वयमङ्गीकरणान्याङ्गीकारणलक्षणैकाकिविहारसामाचारी ४।

श्रुतविनयश्चतुर्द्धा—सूत्रग्राहणा, अर्थश्रावणा, हितं-निःशेषवाचनात्मकः। हितं योग्यतानुसारेण वाचयते, निःशेषमापरिसमाप्तेः।

विक्षेपणाविनयश्चतुर्द्धा—मिथ्यात्वविक्षेपणान्मिथ्यादृष्टेः स्वसमये स्थापनम् १, सम्यग्दृष्टेस्त्वारम्भविक्षेपणाच्चारित्राभ्यासनम् २, च्युतधर्मस्य धर्मे स्थापनम् ३, प्रतिपन्नचारित्रस्य परस्यात्मनो वाऽनेषणीयादिनिवारणेन हितार्थमभ्युत्थानमिति लक्षणः ४।

तथा दोषनिर्घातविनयोपि चतुर्भेदः—क्रुद्धस्य क्रोधापनयनम् १, दुष्टस्य विषयादिदोषवतो दोषापनयनम् २, काङ्क्षितस्य—परसमयादिकाङ्क्षावतः काङ्क्षाच्छेदः ३, स्वतश्चोक्तदोषविरहादात्मप्रणिधानमिति स्वरूपः ४।

एवमात्मानं परं च विनयतीति विनय इति दिग्मात्रमिदम्, विशेषतस्तु व्यवहारादवसेयम्। इमे मिलिताः षट्त्रिंशद् गुणास्तस्य गणिनो भवन्ति। तृतीया (षट्त्रिंशिका) त्वियम्—

"वयछक्काई अट्ठारसेव, आयारमाइ अट्ठेव। पायच्छित्तं दसहा, सूरिगुणा हुन्ति छत्तीसं" ॥१॥

व्रतषट्कं कायषट्कं च प्रतीतम्। अकल्पादिषट्कं त्वेवम्। अकल्पो द्विधा-शिक्षकस्थापनाकल्पोऽकल्पस्थापनाकल्पश्च। तत्राद्यः—

"अणहीया खलु जेणं, पिंडेसणसिज्जवत्थपाएसा। तेणाणियाणि जइणो, कप्पंति न पिंडमाईणि" ॥

तथा—

"उउबद्धम्मि न अणला, वासावासासु दोवि नो सेहा। दिक्खिज्जंती पायं, ठवणाकप्पो इमो होइ" ॥

द्वितीयोऽनेषणीयपिण्डशय्यावस्त्रपात्रगोचरोऽकल्पः १, गृहिभाजनं कांस्यकरोटिकादि २, पर्यंको मञ्चकादावुपवेशनम् ३, निषद्या भिक्षार्थं गृहे प्रविष्टस्य साधोस्तत्र निषदनम् ४। स्नानं द्विधा–अक्षिपक्ष्मप्रक्षालनमात्रमपि देशस्नानम्, सर्वाङ्गक्षालनं तु सर्वस्नानं ५, शोभा विभूषाकरणम् ६, एषां वर्जनमेवमष्टादश। एषां चाचार्यगुणत्वमेतदपराधेषु सम्यक्प्रायश्चित्तज्ञानात्।

आचारवत्त्वादयोऽष्टौ गुणाः पूर्ववत्। तथा प्रायश्चित्तं दशधा, तद्यथा—

"आलोयण १ पडिकमणे २, मीस ३ विवेगे ४ तहा विउस्सग्गे ५। तव ६ छेय ७ मूल ८ अणवठ्ठया य ९ पारञ्चिए १० चेव" ॥

निरतिचारस्यासन्नगृहानीतभिक्षादेः प्रकटनमालोचनार्हम् १, अनाभोगादिनाऽप्रमार्जितनिष्ठीवनादावसम्पन्नवधस्य मिथ्यादुष्कृतदानं प्रतिक्रमणार्हम् २, संभ्रमभयादौ सर्वव्रतातिचारे आलोचनाप्रतिक्रमणरूपमुभयार्हम् ३, उपयुक्तकृतयोगिगृहीतान्नादेः पश्चाज्ज्ञातस्याशुद्धस्य त्यागो विवेकार्हम् ४, गमनागमनविहारादिषु पञ्चविंशत्युच्छ्वासादिचिन्तनं व्युत्सर्गार्हम् ५, यस्मिन् प्रतिसेविते निर्विकृतिकादि षण्मासान्तं तपो दीयते तत्तपोऽर्हम् ६, एवं यत्र पञ्चकादिपर्यायोच्छेदनं तच्छेदार्हम् ७, यत्र पुनर्व्रतान्यारोप्यन्ते तन्मूलार्हम् ८, यत्र पुनरनाचीर्णतया व्रतेषु न स्थाप्यते तदनवस्थाप्यार्हम् ९, यत्र च तपोलिङ्गक्षेत्रकालानां पारमञ्चति तत् पाराञ्चितमिति १०। एते व्रतषट्कायादयश्च सर्वे मिलिताः षट्त्रिंशत् सूरिगुणा भवन्तीति। एवं च गुणसमन्विता गुरवस्तेषां पदानि–चरणास्तेषां सेवा सम्यगाराधनम्, न पुनरासन्नवर्त्तित्वमात्रम्, तस्यां निश्चयेन रतो निरतः, नहि निष्ठुरोक्तिभिर्निर्भर्त्सितोपि गुरुं जि [ग्रं० ९०००] हासति, केवलं गुरुषु बहुमानमेव विधत्ते, यथा–

"धन्यस्योपरि निपतत्यहितसमाचरणधर्मनिर्वापी । गुरुवदनमलयनिःसृतो, वचनरसश्चन्दनस्पर्शः" ॥

तथा—

"लज्जादयासंजमबंभचेरं, कल्लाणभागिस्स विसोहिठाणं । जे मे गुरू सययं अणुसासयंति, ते हं गुरू सययं पूययामि"॥ इत्यादि।

तथा गुर्वाज्ञाराधने–गुर्वादेशसंपादने तल्लिप्सुस्तमेवादेशं लब्धुमिच्छुर्गुरोरादेशं प्रतीक्षमाणः समीपवर्त्स्येव स्यात् । इत्थंभूतश्चरणभरधरणे–चारित्रभरोद्वहने शक्तः–समर्थो भवति यतिः–सुविहितः, नान्यथा–भणितविपरीतो नियमान्निश्चयेनेति ।

कथं पुनरेष निश्चयोऽवसीयत इत्याह—

**सव्वगुणमूलभूओ, भणिओ आयारपढमसुत्ते जं । गुरुकुलवासोऽवस्सं, वसिज्ज तो तत्थ चरणत्थी ॥१२७॥**

सर्वे गुणा अष्टादशशीलाङ्गसहस्ररूपाः, तदानयनोपायश्चैवम् ।

जोए[3] करणे[3] सन्ना[4], इंदिय[5] भोमाइं[10] समणधंम्मे य । सीलंगसहस्साण, अट्ठारगस्स निप्पत्ती ॥ स्थापना चेयम् ।

तेषां मूलभूतः–प्रथमकारणं भणित उक्तः–आचारः प्रथममङ्गम्, तस्य प्रथमसूत्रे–"सुयं मे आवसंतेणं भगवया एवमक्खायं" इति वचनरचनाप्रकारेण यद्यस्मात् गुरुकुलवासो गुरुपादपच्छायासेवनम् । अयमत्र भावार्थः–श्रीसुधर्मस्वामी जंबूस्वामिने कथयति स्म–"श्रुतं मयाऽवसता–भगवतः समीपे तिष्ठता वक्ष्यमाणमर्थपदमिति" । कः पुनरस्य कथनस्य भावार्थः–सर्वेण धर्मार्थिना गुरुसेवा विधेयेति यस्मादेवं तस्माद्वसेत्–तिष्ठेत् तत्र–गुरुकुले चरणार्थी–चारित्रकामी । तथा च गच्छे वसतो गुणः–

"गुरुपरिवारो गच्छो, तत्थ वसंताण निज्जरा विउला । विणयाउ तहा सारणमाईहिं न दोसपडिवत्ती ॥

जइवि हु निग्गयभावो, तहावि रक्खिज्जई स अन्नेहिं । वंसकडिल्ले छिन्नोवि, वेणुओ पावए न महिं" ॥ इति ।

नन्वागमे यतेराहारशुद्धिरेव मुख्यश्चारित्रशुद्धिहेतुरुद्घुष्यते, यदुक्तम्—

"पिंडं असोहयंतो, अचरित्ती इत्थ संसओ नत्थि । चारित्तंमि असंते, सव्वा दिक्खा निरत्थिया" ॥१॥

तथा—

"जिणसासणस्स मूलं, भिक्खायरिया जिणेहिं पन्नत्ता । इत्थ परितप्पमाणं, तं जाणसु मंदसुद्धीयं ॥२॥

पिंडविशुद्धिश्च बहूनां मध्ये वसतां दुष्करैव प्रतिभासते, इत्येकाकिनापि भूत्वा सैव विधेया, किं ज्ञानादिलाभेन कार्यम्? मूलभूतं चारित्रमेव पालनीयम्, मूले सत्येव लाभचिन्ता जयायसीति। मैवं वोचः। यतो हन्त गुरुपारतन्त्र्यवर्जितत्वात् द्वितीय-साध्वपेक्षाभावाल्लोभस्यातिदुर्जयतरत्वात् क्षणे क्षणे परिवर्त्तमानपरिणामेनैकाकिना पिण्डविशुद्धिरेव न पालयितुं शक्यते। तथा चोक्तम्—

"एगाणियस्स दोसा, इत्थी साणे तहेव पडिणीए, भिक्खविसोहिमहव्वय, तम्हा सबिइज्जए गमणं" ॥

तथा "पिह्लिज्जेसणमिक्को"—इत्यादि । ततस्तद्भावे कथं मूलभूतं चारित्रमेव पालनीयमित्याद्युक्तम्? अथ कश्चिद्गाढदार्ढ्याशयः शुद्धोञ्छादिनापि निर्वाहयेदात्मानं सोपि—

"सव्वजिणप्पडिकुट्ठं, अणवत्था थेरकप्पभेओ य। एगो य सुयाउत्तो, विहणइ तवसंजमं अइरा" ॥

इति वचनात् त्रिभुवनभर्तुराज्ञाविराधकत्वान्न सुन्दरतामास्कन्दति । तथा चाह सूत्रकारः—

**एयस्स परिच्चाया, सुद्धुंच्छाइवि न सुंदरं भणियं । कंमाइवि परिसुद्धं, गुरुआणावत्तिणो बिंति ॥१२८॥**

एतस्य—गुरुकुलवासस्य परित्यागात्—सर्वतो मोचनेन शुद्धोञ्छादि—शुद्धभैक्षप्रमुखम्, आदिशब्दात् शुद्धोपाश्रयवस्त्रपात्रादिपरिग्रहः, सुन्दरं—शोभनं भणितं—निगदितमागमज्ञैरित्युपस्कारः। तथाच तदुक्तिः—

"सुद्धुंच्छाइसु जत्तो, गुरुकुलचागाइणेह विन्नेओ। सबरस(स्स) सरक्खपिच्छत्थघायपायाछिवणतुल्लो" ॥

**अस्या व्याख्या—**

शुद्धोञ्छं—निर्दोषभैक्षम्, आदिशब्दात्कलहममत्वपरिहारे च यत्न—उद्यमो गुरुकुलत्यागेन, आदिशब्दात्सूत्रार्थहान्या ग्लानादित्यागेन चेह—जिनमते विज्ञेयो बोद्धव्यः। कथंभूत इत्याह—शबरराजस्य सरजस्कस्य पिच्छार्थं घाते पादास्पर्शनतुल्यश्चरणासंघट्टनादेशकल्प इति।

**संविधानकसंप्रदायः पुनरयम्—**

क्वचित्संनिवेशे शबराभिधानः सरजस्कभक्तो राजा बभूव। तस्यैकदा दर्शनार्थमुपरिधार्यमाणमयूरातपत्रच्छत्रो गुरुराजगाम। तं च कृतसन्मानोपविष्टं राजप्रियतमा तदातपत्रं चञ्चच्चाकचिक्यायमानानेकचन्द्रकराजिराजितमवलोक्य कुतूहलातिरेकतस्तत् प्रार्थयितुमारेभे। तत्र च देशे मयूराभावाद् दुर्लभानि मयूरपिच्छानीत्यसावदित्सन्नुत्थाय स्वाश्रयमगमत्। ततो राज्ञी कृताभोजननिश्चया तदानयनाय राजानं प्रोत्साहयांचकार। राज्ञापि यदा पुनः पुनः प्रार्थितोपि गुरुस्तदातपत्राणि न ददाति तदा दुर्वारप्रेमग्रहव्यामोहितेन हठादेव गृहीत्वाऽऽनयत तानीत्यादिष्टाः पदातयः प्रत्यूचुः—नासौ जीवन्नर्पयति प्रहारैश्चोपतिष्ठते। ततो राजोवाच—दूरस्था एव तं बाणैरचेष्टं कृत्वा तानि गृह्णीत, समाददानाश्च मा कथमपि गुरोः पादेन स्पर्शनं कुध्वं, यतो गुरोरवज्ञा महते पातकाय संपद्यत इति। यादृशोऽस्य शबरराजस्य गुरोर्विनाशं कारयतः पादस्पर्शं च वारयतो विवेकस्तादृशो गुरुकुलत्यागिनः शुद्धोञ्छादिलालसस्य साधोरपीति भावः। व्यति-

रेकमाह–इह कर्मशब्देनाधाकर्मोच्यते, आदिशब्दादौद्देशिकादिपरिग्रहः, एतद्दोषदुष्टमप्याहारादि परिशुद्धं–निर्दोषम्, आस्तां शुद्धोञ्छादि परिशुद्धमित्यपेरर्थः, गुर्वाज्ञावर्त्तिन आराध्यादेशविधायिनो ब्रुवते–प्रतिपादयन्त्यागमतत्त्वविदः। इयमत्र भावना–उत्सर्गपदे बहुतरकर्मबन्धनिबन्धनत्वादल्पायुष्कताकारणत्वाच्चाधाकर्म महादोषदुष्टमेव। तथा चाह प्रज्ञप्तौ भगवान् सुधर्मस्वामी–"आहाकंमं तं भुंजमाणे समणे निग्गंथे किं बंधइ किं पकरेइ किं चिणइ किं उवचिणइ? गोयमा! आहाकंमं तं भुंजमाणे समणे निग्गंथे आउयवज्जाओ सत्त कम्मपगडीओ सिढिलबंधणबद्धाओ धणियबंधणबद्धाओ करेइ, हस्सकालठिईयाओ दीवकालठिईयाओ करेइ, मंदाणुभावाओ तिव्वाणुभावाओ करेइ, अप्पप्पएसग्गाओ बहुप्पएसग्गाओ करेइ, आउयं च णं कंमं सिय बंधइ, सिय नो बंधइ, असायावेयणिज्जं च णं कम्मं भुज्जो भुज्जो उवचिणाइ, अणाईयं अणवदग्गं दीहमद्धं चाउरंतसंसारकंतारं अणुपरियट्टइ। से केणट्ठेणं भंते! एवं वुच्चइ–'आहाकम्मं णं भुंजमाणे समणे निग्गंथे जाव अणुपरियट्टइ'? गोयमा! आहाकम्मं णं भुंजमाणे समणे निग्गंथे आयाए धम्मं अइक्कमइ, 'आयाइ'त्ति आत्मना धर्मं–श्रुतधर्मं चारित्रधर्मं चेति, आयाए धंमं अइक्कममाणे पुढविकायं नावकंखइ, आउकायं नावकंखइ, तेउकायं नावकंखइ, वाउकायं नावकंखइ, वणस्सइकायं नावकंखइ, तसकायं नावकंखइ, जेसिंपि य णं जीवाणं! सरीरयाइं आहारमाहारेइ तेवि जीवे नावकंखइ, से एएणट्ठेणं गोयमा! एवं वुच्चइ–आहाकंमं भुंजमाणे जाव अणुपरियट्टइ"।

तथा–

"कहं णं भन्ते! जीवा अप्पाउयत्ताए कम्मं पकरन्ति? गोयमा! पाणे अइवाइत्ता भवइ, मुसं वइत्ता भवइ, तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाहित्ता भवइ, एवं खलु जीवा अप्पाउयत्ताए कम्मं पकरिंति" त्ति।

द्वितीयपदे पुनर्गाढग्लानादिकार्यासंस्तरणादिरूपे गच्छमध्यव्यवस्थितस्य गुर्वाज्ञावर्तिनोऽशठभावस्य साधोः पञ्चकपरिहाणिक्रमेण सर्वथाम्ना प्रयतमानस्यातुरदृष्टान्तेनाधाकर्माद्यपि निर्दोषम् ।

तथा ह्यागमः—

"संथरणंमि असुद्धं, दुण्हवि गिण्हंतदिंतयाण हियं । आउरदिट्ठंतेणं, तं चेव हियं असंथरणे" ॥

तथा—

जा जयमाणस्स भवे, विराहणा सुत्तविहिसमग्गस्स । सा होइ निज्जरफला, अज्झप्पविसोहिजुत्तस्स" ॥ त्ति ।

गुर्वाज्ञाकारिणो विशेषतः प्रशंसामाह—

**ता धन्नो गुरुआणं, न मुयइ नाणाइगुणमणिनिहाणं । सुपसन्नमणो सययं, कयन्नुयं मणसि भावंतो ॥१२९॥**

यस्माद् गुर्वाज्ञा गरीयसे गुणाय तस्माद्धेतोर्धन्यो गुर्वाज्ञां न मुञ्चति सुष्ठु-अतिशयेन प्रसन्नमनो-निर्मलमानसो निष्ठुरमपि शिक्षितो न कुप्यति, न कलुषयति चान्तःकरणम्, न च वहति प्रद्वेषं स्मरन् कुन्तलदेवीज्ञातम् । केवलम्—

"जं मे बुद्धा णुसासंति, सीएण फरुसेण वा । मम लाभुत्ति पेहाए, पयओ तं पडिस्सुणे" ॥

कथम् ? सततमनवरतं कृतज्ञताम्-उपकाराविस्मृतिरूपां मनसि-हृदये भावयन् व्यवस्थापयन् । तद्यथा—

"टोलु व्व दुलदुलंतो, अहयं विन्नाणनाणनिलएण । देवु व्व वंदणिज्जो, कओ म्हि गुरुसुत्तहारेण" ॥

इत्थंभूत एव धन्यो भवति, धर्मधनार्हत्वादिति ।

पूर्वसूचितं कुन्तलदेवीज्ञातं पुनरिदम्—

अवणिपुरमत्थि अवणीवरमहिलाभालफलयतिलयं व । तत्थ निवो जियसत्तू, पडुपयडपयावजियसत्तू ॥१॥
तस्सासि पिया कुंतलदेवीनामा सहावकूरमणा । अन्नाउ वि देवीओ, सुमईओ संति बहुयाओ ॥२॥
कारंति ताउ उत्तुंगचंगसिंगाइं कणयकलसाइं । जिणनाहचेइयाइं, नियएणं दविणजाएण ॥३॥
अह मच्छरभरभरिया, कुंतलदेवीवि सेसएहिंतो । सविसेसं चेइहरं, हरगिरिधवलं करावेइ ॥४॥
तत्थच्छेरयभूयं, पूयं कारेइ गीयनट्टाई । वायावइ आउज्जे, सज्जो सज्जियमहाचुज्जे ॥५॥
अन्नेसु पयट्टंति, पूयं आउज्जयाण घणघोसं । सुणिउं कुणइ पओसं, दूमिज्जइ तक्कहाए वि ॥६॥
सेससवित्तीणं पुण, अकूरहिययाण जिणमयरयाण । परमत्थचिंतिगाणं, न होइ थेवोवि हु पओसो ॥७॥
सुमहंतजलंतपओसजलणजालालिदड्ढधम्मवणा । कुंतलदेवी कइया, रोगायंकेहिं परिभूया ॥८॥
तो से निवेण घित्तुं, आभरणाईणि नियभंडारे । खित्ताइं तओ धणियं, सा पडिया अट्टझाणंमि ॥९॥
मरिऊण ऊणपुन्ना, कूरा सा कुक्कुरी तहिं जाया । नियजिणभवणदुवारे, पुव्वब्भासेण चिट्ठेइ ॥१०॥
कइयावि तत्थ पत्तो, केवलनाणी नमेवि अह पुट्ठो । अंतेउरीहिं भयवं ! कत्थ गया कुंतला मरिउं ? ॥११॥
पभणइ गुरूवि तीसे, पओसकरणाइवइयरं सव्वं । जा संजाया सुणिया, धुणियामलदुलहसम्मत्ता ॥१२॥
इय निसुणिऊण ताओ, गरुयं वेरग्गमुव्वहंतीओ । परिसाइ उट्ठियाए, गंतुं जिणभवणदारंमि ॥१३॥

तत्र कुन्तल-
देवीज्ञातम् ।

पिच्छंति तयं सरमं, परमं करुणारसं पवन्नाओ । बलिपूयलियापमुहं, खिवंति तीए पुरो ताओ ॥१४॥
पभणंति महाभागे! धम्मपराएवि जं तया तुमए । नय चत्तं कूरत्तं, तेण इमा दुग्गई पत्ता ॥१५॥
ता संपयंपि एयं, वणं व अक्कूरभावजलणेण । दहिऊण कुणसु अप्पं, समभावजलेण संसिचं ॥१६॥
हे सरमे! दुहविरमे, जिणधम्मे माणसं निवेसेसु । चयसु सयावि पओसं, वहेसु हिययंमि संतोसं ॥१७॥
इच्चाइ ताण संभममसमं पिच्छिय गिराउ तह सुणिउं । सुणिया सा संभंता, पुणो पुणो चिंतइ किमेयं ? ॥१८॥
बहुयं विचिंतयंती, जाइं सुमरित्तु फुरियवेरग्गा । भुज्जो भुज्जो निंदइ, पुव्वकडं दुक्कडं सव्वं ॥१९॥
सिद्धसमक्खमणसणं, पडिवज्जिय पूरिउं नियमाउं । जाओ वेमाणिसुरो, लहिही परमं पयं कमसो ॥२०॥
एवं कुन्तलदेव्याः, प्रद्वेषजुषो निशम्य कटुकफलम् । भव्या भवभयभीताः, प्रसन्नमनसो भवत सततम् ॥२१॥

॥ इति कुन्तलदेवीज्ञातम् ॥

आह-किं योऽपि सोऽपि गुरुर्गुणसंपत्तये सेवनीय आहोश्विद् कश्चिद्विशिष्ट एवेति प्रश्ने प्रतिवचनमाह—

गुणवं च इमो सुत्ते, जहत्थगुरुसद्दभायणं इट्ठो । गुणसंपयादरिद्दो, जहुत्तफलदायगो न मओ ॥१३०॥

चशब्दस्यावधारणार्थत्वाद् गुणवानेव-गुणगणालंकृत एवायमिति गुरुः सूत्रे-सिद्धान्ते यथार्थः-सान्वयो गुरुशब्दस्तस्य भाजनमाधार इष्टोऽभिप्रेतः, तथाहि गुरुशब्दस्य-

"धम्मन्नू धम्मकत्ता य सया धम्मपरायणो। सत्ताणं धम्मसत्थस्स, देसओ भन्नए गुरू" ॥

इत्यन्वयः। स च श्रुतधर्मोपदेशकस्य चारित्रधर्मविधायकस्य संविग्नगीतार्थगुरोरेव युज्यते।

तस्य च गुणाः प्राधान्येन—

वयछक्कं ६ कायछक्कं१२ अकप्पो१३ गिहिभायणं१४। पलियङ्क१५ निसिज्जाणं१६, सिणाणं१७ सोभवज्जणं१८ ॥

इत्यष्टादश, एभिर्विना गुरुत्वाभाव एव, तन्तुभिर्विना पटाभाववत्, तथा चोक्तं श्री शय्यंभवसूरिपादैः—

"दस अट्ठ य ठाणाइं, जाइं बालो व रज्जई। तत्थ अन्नयरे ठाणे, णिग्गंथत्ताउ भस्सई" ॥ इति।

शेषास्तु—

"पडिरूवो तेयस्सी, जुगपहाणागमो महुरवक्को। गम्भीरो धीमन्तो, उवएसपरो य आयरिओ ॥१॥

अपरिस्साविं सोमो, संगहसीलो अभिग्गहमई य। अविकत्थणो अचवलो, पसन्तहियओ गुरू होइ" ॥२॥

इत्यादयः, "देसकुलजाइरूवी" इत्यादयः, अन्येऽपि "आयारसुयसरीरे"—इत्यादयो विशेषगुणास्ते कादाचित्काः, पटस्य रक्तत्वादिवत्। तत्रेह प्रधानगुणैर्युक्तो गुणवानभिप्रेतः, कार्यसाधकत्वात्। सत्सु तेषु शेषगुणसंप्रयोगोपि वरीयानेवेति।

विपर्यये पुनः किं स्यादित्याह—गुणसंपदा—सद्गुणविभूषाकरणभूतया दरिद्रो—दुर्गतो यथोक्तं गुरुसम्प्रयोगे फलं तस्य दायकः—सम्पादयिता न मतो—नैव सम्मतो जिनप्रवचनवेदिनाम्, अतो न निर्गुणो गुरुः सेवनीय इति।



ननु साम्प्रतं कालानुभावादेव दुर्लभा सर्वगुणसम्पद्, यतः कोपि कुतोपि केनापि गुणेन हीनोप्यन्येनाधिक इति तारतम्यभेदे-

नानेकधा गुरव उपलभ्यन्ते, ततस्तेषु कं गुरुमाश्रयामहे, कं वा नेति दोलायमानमानसानामस्माकं किमुचितमिति शिष्येण सप्रणयं पृष्टो गुरुराह—

**मूलगुणसम्पउत्तो, न दोसलवजोगओ इमो हेओ । महुरोवक्कमओ पुण, पवत्तियव्वो जहुत्तंमि ॥१२१॥**

मूलगुणाः–पञ्च महाव्रतानि व्रतषट्ककायषट्कादयो वा, तैः सम्यक्–सद्बोधप्रधानं प्रकर्षेण–उद्यमातिशयेन युक्तोऽन्वितो मूलगुणसंप्रयुक्तो गुरुरिति प्रकृतत्वात्सम्बध्यते न दोषाणाम्–आशुकोपित्व–वचनापाटव–मन्दता–मनाक्प्रमादिताप्रभृतीनां लवा–लेशा दोषलवास्तद्योगात्–तत्सम्बन्धादयं गुरुर्हेयः परित्याज्यः, तथा चागमः—

"जेयावि मन्दि त्ति गुरुं विइत्ता, डहरे इमे अप्पसुयत्ति नच्चा । हीलन्ति मिच्छं पडिवज्जमाणा, कुणंति आसायण ते गुरूणं ॥
पगईइ मन्दावि हवन्ति एगे, डहरावि य जे सुयबुद्धोववेया । आयारमन्ता गुणसुट्ठियप्पा, जे हीलिया सिहिरिव भास कुज्जा ॥
जेयावि नागं डहरन्ति नच्चा, आसायए से अहियाय होइ । एवायरियंपि हु हीलयन्तो, नियच्छई जाइपहं खु मन्दे ॥
गुरुगुणरहिओ य इहं, दट्ठव्वो मूलगुणविउत्तो जो । नहु गुणमित्तविहूण त्ति, चण्डरुद्दो उदाहरणं" ॥

इत्यागमवचनान्यनुसृत्य मूलगुणशुद्धो गुरुर्न मोक्तव्यः ।

कदाचित् किंचित्प्रमादवांस्तु मधुरोपक्रमत इति तृतीयार्थे पञ्चमी, ततो मधुरोपक्रमेण–सुखदोपायेन प्रियवचनाञ्जलिप्रणामपूर्वकम् 'अनुपकृतपरहितरतैर्भवद्भिः सुष्ठु वयं मोचिता गृहवासपाशात्, तदिदानीमुत्तरोत्तरमार्गप्रवर्त्तनेन निस्तारयतास्माद् भीमभवकान्ताराद्' इत्यादिप्रोत्साहनेन पुनर्भूयोपि प्रवर्त्तयितव्यो यथोक्तमार्गानुसारिण्यनुष्ठाने इति ।

किमित्येवमुपदिश्यते इत्याह—

**पत्तो सुसीससद्दो, एव कुणंतेण पंथगेणावि । गाढप्पमाइणोवि हु, सेलगसूरिस्स सीसेण ॥१३२॥**

प्राप्तो–लब्धः सुशिष्य इति शब्दो विशेषणम्, एवं गुरोर्भूयोपि चारित्रे प्रवृत्तिं कारयता पन्थकेन–पन्थकनाम्ना सचिवपुङ्गवसाधुना, अपिशब्दादन्यैरपि तथाविधैः, यतोऽभाणि—

"सीइज्ज कयावि गुरू, तंपि सुसीसा सुनिउणमहुरेहिं । मग्गे ठवन्ति पुणरवि, जह सेलगपंथगो नायं ।

तमेव विशिनष्टि—गाढप्रमादिनोपि–अतिशयशैथिल्यवतोपि शैलकसूरेः शिष्येणेति व्यक्तमेवेति गाथाक्षरार्थः । भावार्थः कथानकादवसेयः ।

तच्चेदम्—

कविकुलकलाविकलियं, सेलगपुरमत्थि सेलसिहरं व । तत्थ प्पयावसियकित्तिमेलओ सेलओ राया ॥१॥
सद्धम्मकम्मवज्जियछउमा पउमावई पिया तस्स । सन्नीइनागवल्लीइ, मंडवो मडुगो पुत्तो ॥२॥
चउसुद्धबुद्धिसंसिद्धिपंथगा पंथगाइणो आसि । रज्जभरधरणसज्जा, सुमन्तिणो पञ्चसयसंखा ॥३॥
थावच्चासुयगणहरसमीवपडिवन्नसुद्धगिहिधम्मो । सेलगराया रज्जं, तिवग्गसारं चिरं कुणइ ॥४॥
अन्नदिणे थावच्चासुयपहुपयवत्तिसुयगुरुसमीवे । पञ्चहि मन्तिसएहिं, पंथगपमुहेहि परियरिओ ॥५॥
मडुगपुत्ते रज्जं, ठविऊणं गिण्हए वयं राया । इक्कारस अंगाइं, अहिज्जिओ वज्जियावज्जो ॥६॥

तत्र पन्थक साधुकथानकम् ।

पंथगपमुहाण तओ, पञ्चमुणिसयाण नायगो ठविओ । सुयमुणिवरेण सेलगरायरिसी जिणसमयविहिणा ॥७॥
सुयसूरी उ महप्पा, समए आहारवज्जणं काउं । सिरिविमलसिहरिसिहरे, सहस्ससहिओ सिवं पत्तो ॥८॥
अह सेलगरायरिसी, अणुचियभत्ताइभोगदोसेण । दाहजराईतविओ, समागओ सेलगपुरम्मि ॥९॥
उज्जाणंमि पसत्थे, सुभूमिभागंमि तं समोसरियं । सोऊण पहिट्ठमणो, विणिग्गओ मड्डुओ राया ॥१०॥
कयवन्दणाइकिच्चो, सरीरवत्तं वियाणिउं गुरुणो । विन्नवइ एह भन्ते ! मम गेहे जाणसालासु ॥११॥
भत्तोसहाइएहिं, अहापवत्तेहिं तत्थ तुम्हाणं । कारेमि जेण किरियं, धम्मसरीरस्स रक्खट्ठा ॥१२॥

तथा चोक्तम्—

"शरीरं धर्मसंयुक्तं, रक्षणीयं प्रयत्नतः । श्रवेच्छरीरतो धर्मः, पर्वतात्सलिलं यथा ॥१३॥
पडिवन्नमिणं गुरुणा, पारद्धा तत्थ उत्तमा किरिया । निद्धमहुराइएहिं, आहारेहिं सुविज्जेहिं ॥१४॥
विज्जाण कुसलयाए, पत्थोसहपाणगाइधुवलाभा । थेवदियहेहिं एसो, जाओ निरुओ य बलवं च ॥१५॥
नवरं सिणिद्धपेसलआहाराईसु मुच्छिओ घणियं । सुहसीलयं पवन्नो, निच्छइ गामन्तरविहारं ॥१६॥
बहुसोवि भणिज्जन्तो, विरमइ नो जाव सो पमायाओ । ताहे पन्थगवज्जा, मुणिणो मन्तन्ति एगत्थ ॥१७॥
कम्माइं नूण घणचिक्कणाइं कुडिलाइं वज्जसाराइं । नाणड्ढयंपि पुरिसं, पंथाओ उप्पहं निंति ॥१८॥
नाऊण सुयबलेणं, करयलमुत्ताहलं व भुवणयलं । अहह निवडन्ति केवि हु, ओपिच्छह कम्मबलियत्तं ॥१९॥

मुत्तूण रायरिद्धिं, मुक्खत्थी ताव एस पव्वइओ । संपइ अइप्पमाया, विम्हरियपओयणो जाओ ॥२०॥
काले न देइ सुत्तं, अत्थं न कहेइ पुच्छमाणाणं । आवस्सगाइ तत्तिं, मुत्तुं बहु मन्नए निद्दं ॥२१॥
सारणवारणपडिचोयणाइ न मणंपि देइ गच्छस्स । नय सारणाइरहिए, गच्छे वासो खणंपि खमो ॥२२॥

तथा चागमः—

जहिं नत्थि सारणा वारणा य पडिचोयणा य गच्छंमि । सो उ अगच्छो गच्छो, संजमकामीहिं मुत्तव्वो ॥२३॥
उवगारी य दढमिमो अम्हाणं धम्मचरणहेउत्ता । मुत्तुं घित्तुं च इमं, जुत्त त्ति फुडं न याणामो ॥२४॥
अहवा किं अम्हाणं, कारणरहिएण नीयवासेण । गुरुणो वेयावच्चे, पंथगसाहुं निउंजित्ता ॥२५॥
एयं चिय पुच्छित्ता, विहरामो उज्जया वयं सव्वे । कालहरणंपि कीरइ, जो वेयइ एस अप्पाणं ॥२६॥
सामत्थिऊण एवं, पंथगसाहुं ठवित्तु गुरुपासे । ते सव्वेवि हु मुणिणो, अन्नत्थ सुहं पविहरिंसु ॥२७॥
पंथगमुणीवि गुरुणो, वेयावच्चं जहोचियं कुणइ । असवत्तजोगजुत्तो, सया अणूणं च नियकिरियं ॥२८॥
कत्तियचाउम्मासे, सूरी भुत्तूण निद्धमहुराइं । परिहरियसयलकिच्चो, सुत्तो नीसट्ठसव्वंगो ॥२९॥
आवस्सगं कुणंतो, पंथगसाहूवि खामणनिमित्तं । सीसेण तस्स पाए, आघट्टइ विणयनयनिउणो ॥३०॥
तो कुविओ रायरिसी, जंपइ को एस अज्ज निल्लज्जो । पाए आघट्टंतो निद्दाविग्घे मह पयट्टो ? ॥३१॥
रुट्ठं दट्ठुं सूरिं, महुरगिरं पंथगो इय भणेइ । चाउम्मासियखामणकए मए दूमिया तुब्भे ॥३२॥

तत्र पन्थक-साधुकथानकम्

ता एगं अवराहं, खमह न काहामि एरिसं बीयं । हुंति खमासीलच्चिय उत्तमपुरिसा जओ लोए ॥३३॥
इय पंथगमुणिवयणं, आयन्नंतस्स तस्स सूरिस्स । सूरुग्गमे तमं पिव, अन्नाणं दूरमोसरियं ॥३४॥
बहुसो निंदिय अप्पं, सविसेसं जायसंजमुज्जोओ । खामेइ पंथगमुणिं, पुणो पुणो सुद्धपरिणामो ॥३५॥
बीयदिणे मडुगनिवमापुच्छिय दोवि सेलगपुराओ । निक्खंता पारद्धा, उग्गविहारेण विहरेउं ॥३६॥
अवगयतव्वुत्तंता, संपत्ता सेसमंतिमुणिणोवि । विहरिय चिरं सुविहिणा, आरूढा पुंडरीयगिरिं ॥३७॥
दोमासकयाणसणो, सेलेसिं काउ सेलगमहेसी । पंचसयसमणसहिओ, लोयग्गठियं पयं पत्तो ॥३८॥

एवं पन्थकसाधुवृत्तममलं श्रुत्वा चरित्रोज्ज्वलं, सज्ज्ञानादिगुणान्वितं गुरुकुलं सेवध्वमुच्चैस्तथा ।
भो भो साधुजना! गुरोरपि यथा सत्संयमे सीदतो, निस्ताराय कदाचन प्रभवत स्फूर्जद्गुणश्रेणयः ॥३९॥

॥ इति पन्थकसाधुकथानकम् ॥

एवं कुर्वतः साधोर्गुणमाह ।

**एवं गुरुबहुमाणो, कयन्नुया सयलगच्छगुणवुड्ढी । अणवत्थापरिहारो, हुंति गुणा एवमाईया ॥१३३॥**

एवं-मूलगुणसमन्वितं गुरुमशुश्रूवता सन्मार्गोद्यमं च कारयता यतिना गुरुबहुमानो-मानसप्रीत्यतिशयः कृतो भवति, तथा कृतज्ञता चाराधिता भवति । प्रधानश्चार्यं पुरुषस्य गुणो लोकेऽपि गीयते । तथाहि—

"स कलाकलापकुशलः, स पण्डितः सकलशास्त्रवेदी सः। निःशेषगुणगरिष्ठा, कृतज्ञता यं समाश्रयते" ॥

लोकोत्तरेप्येकविंशतिगुणमध्ये पतित एवेति। तथा सकलगच्छस्य गुणानां वृद्धिराधिक्यं कृतं भवति, तथाहि—"सम्यगाज्ञावर्तिनो गच्छस्य गुरुर्ज्ञानादिगुणान् वर्द्धयत्येव। यदि पुनस्ते शिष्याः—

"वाइया संगहीया य, भत्तपाणेहिं पोसिया। जायपक्खा जहा हंसा, पक्कमंति दिसो दिसिं" ॥

ततस्तान् खलुङ्कप्रायानवबुध्य न केवलं न शिक्षयति गुरुस्तत्परित्यागं च विधत्ते, कालिकाचार्यवदिति। तथा अनवस्था—मर्यादाहानिस्तस्याः परिहारः कृतो भवति। अयमभिप्रायः—य एकं गुरुं मूलगुणमहाप्रासादधरणस्तंभसंनिभमप्यल्पदोषदुष्टत्वेन मुञ्चति तस्मै अन्योऽपि न रोचते, कालानुभावादेव सूक्ष्मदोषाणां प्रायः परिहर्तुमशक्यत्वात्, ततश्चात्यरोचकतया—

"इक्कस्स कओ धम्मो, सच्छंदगईमईपयारस्स। किंवा करेइ इक्को, परिहरउ कहमकज्जं वा ॥१॥
कत्तो सुत्तत्थागमपडिपुच्छण चोयणा व इक्कस्स। विणओ वेयावच्चं, आराहणया व मरणंते ॥२॥
पिल्लिज्जेसणमिक्को, पइन्नपमयाजणाउ निच्चभयं। काउमणोवि अकज्जं, न तरइ काऊण बहुमज्झे ॥३॥
उच्चारपासवणवंतपित्तमुच्छाइमोहिओ इक्को। सद्दवभाणविहत्थो, निक्खिवइ व कुणइ उड्डाहं ॥४॥
एगदिवसंमि बहुया, सुहा य असुहा य जीवपरिणामा। इक्को असुहपरिणओ, चइज्ज आलंबणं लद्धुं" ॥५॥

इत्यादिना निषिद्धमप्येकाकित्वमालम्बते, तं च स्वेच्छाचारसुखितमालोक्यान्योपि तदेवाङ्गीकरोति, एवंप्रकाराऽनवस्था परिहृता भवति गुरुसेवकेनेति। भवन्ति—जायन्ते गुणा एवमादयोऽन्येपि गुरुग्लानबालवृद्धादीनां विनयवैयावृत्त्यकरणादयः सूत्रार्थागमस्मरणा-

दयोऽपि भूयांस इति ।

एतद्विपर्यये पुनः किं स्यादित्याह—

**इहरा वुत्तगुणाणं, विवज्जओ तहय अत्तउक्करिसो । अप्पच्चओ जणाणं, बोहिविघायाइणो दोसा ॥१३४॥**

इतरथा—महाव्रतमहाभारोद्धारधौरेयकगुरुत्यागेनेत्यर्थः उक्तगुणानां—गुरुबहुमानादीनां विपर्ययोऽभावोऽबहुमानाकृतज्ञतासकलगच्छगुणावृद्ध्यनवस्थादिदोषसद्भावः स्यादित्यर्थः । तथात्मोत्कर्षश्चात्मनि सौष्ठवाभिमानश्चानर्थपरंपराकारणं गुरुकुलत्यागिनः स्यात् । तथाऽप्रत्ययोऽविश्वासश्च जनानां—लोकानां साधुविषये स्याद्, यदुत परस्परविभिन्नानामन्योन्यानुष्ठानदूषकाणामेतेषां न ज्ञायते कोऽपि सत्यवाद्यलीकवादी वेति । ततश्च को दोष इति चेदुच्यते—बोधिविघातः—प्रेत्यजिनधर्मावाप्त्यभावः तेषां व्यलीकभाजां तन्निमित्तभूतस्य यतेरपि । आदिशब्दाद्भावपातश्च सम्यग्दर्शनग्रहणाभिमुखानां चारित्रग्रहणाभिमुखानां च स्यादेते दोषा—दूषणानि गुरुत्यागकारिणां भवन्तीति । किंच—यदि स्वल्पेपि प्रमादजनिते दोषलवे गुरवः परिहरणीयास्ततः सर्वेषामपि वर्जनीयत्वमायातम्, यतः प्रवचने निर्ग्रन्थाः पञ्चविधाः प्ररूपिताः, तथाहि—

गंथो मिच्छत्ताई धणाइओ अंतरो य बज्झो य । दुविहाउ तओ जे निग्गय त्ति ते हुंति निग्गंथा ॥१॥

मिच्छत्तं[1] वेयतियं[4], हासाई छक्कयं च नायव्वं । कोहाईण चउक्कं[14], चउदस अब्भिंतरा गंथा ॥२॥

धणं[1] धन्नं[2] खित्तं[3] कुवियं[4], वत्थुं[5] दुपयं[6] कणयं[7] रुप्पं[8] चउचरणं[9] । नव बाहिरया गंथा, एवं ते हुंति पुण पंच ॥३॥

होइ पुलाओ[1] बउसो[2], तहा कुसीलो[3] नियंठ[4] सिणाओ[5] । तत्थ पुलाओ दुविहो, लद्धिपुलाओ तहा सेवे ॥४॥

अन्यत्राप्युक्तम्—

"धन्नमसारं भन्नइ, पुलायसद्देण जस्स तेण समं । चरणं सो हु पुलाओ, लद्धीसेवाहिं सो य दुहा ॥५॥

तत्र—

लद्धिपुलाओ संघाइकज्जओ चक्किसिन्नमवि चूरे । सो हरिसमअहियसिरी व होइ इयरो उ पंचविहो ॥६॥
दंसणनाणपुलाओ, संकाकालाइएहि तमसारं । मूलुत्तरगुणसेवं, चरणपुलाओ पुण करेइ ॥७॥
लिंगपुलाओ निक्कारणं तु जो गिण्हए य परलिंगं । किंचि पमाया मणसा, अकप्पगहणे अहासुहुमो ॥८॥
उवगरणसरीरेसुं, बउसो दुविहो दुहावि पंचविहो । आभोग[1]मणाभोगे[2], संवुड[3]मस्संवुडे[4] सुहुमे[5] ॥९॥
आसेवणा कसाए, दुहा कुसीलो दुहावि पंचविहो । नाणे दंसणचरणे, तवे य अहसुहुमए चेव ॥१०॥
इह नाणाइकुसीलो, उवजीवं होइ नाणमाईणि । अहसुहुमो पुण तुस्सं, एस तवस्सित्ति संसाए ॥११॥
उवसामगो य खवगो, दुहा नियंठो दुहावि पंचविहो । पढमसमओ अपढमो[2] चरमा[3][4]चरमो अहासुहुमो[5] ॥१२॥
पाविज्जइ अट्ठसयं १०८ खवगाणुवसामगाण चउपन्ना ५४ । उक्कोसओ जहन्नेणिक्को व दुगं व तिगमहवा ॥१३॥
सुहझाणजलविसुद्धो, कम्ममलाविक्खया सिणाउ त्ति । दुविहो य सो सजोगी, तहा अजोगी विणिद्दिट्ठो ॥१४॥
मूलुत्तरगुणविसया, पडिसेवा सेवए कुसीलो य । उत्तरगुणेसु बउसो, सेसा पडिसेवणारहिया" ॥१५॥ इति

एषु च नियमेनाप्रमादिनो निर्ग्रन्थाः स्नातकाश्च, किंतु ते कदाचिदेव श्रेणिमस्तकारोहणे सयोग्ययोगिगुणस्थानकयुगले च संभ-

वन्तीति न तीर्थप्रवाहहेतवः। पुलाकोऽपि कदाचिदेव लब्धिसद्भावे संभवति। एते च त्रयोपि संप्रति व्यवच्छिन्नाः, ततो बकुशकुशीला एव निरन्तरतीर्थप्रवाहहेतवः। तथाचोक्तम्—

निग्गंथसिणायाणं, पुलागसहियाणं तिण्ह वुच्छेओ। समणा बउसकुसीला, जा तित्थं ताव होहिंति" ॥

तेषां चावश्यंभाविनः प्रमादजनिता दोषलवाः, यदि तैः साधुर्वर्जनीयस्ततः सर्वेषामपि परिहरणीयता समायातेत्येतदेव चेतस्याधाय सूत्रकारः प्राह—

**बकुसकुसीला तित्थं, दोसलवा तेसु नियमसंभाविणो। जइ तेहि वज्जणिज्जो अवज्जणिज्जो तओ नत्थि॥१३५॥**

बकुशकुशीला व्यावर्णितस्वरूपाः 'तित्थं' ति भामा सत्यभामेति न्यायात् सर्वतीर्थकृतां तीर्थसंतानकारिणः संभवन्ति, अत एव दोषलवाः—सूक्ष्मदोषास्तेषु—बकुशकुशीलेषु नियमसंभविनः, यतस्तेषां द्वे गुणस्थानके प्रमत्ताप्रमत्ताख्ये अन्तर्मुहूर्त्तकालावस्थायिनी, तत्र यदा प्रमत्तगुणस्थानके वर्त्तते तदा प्रमादसद्भावादवश्यंभाविनः सूक्ष्मा दोषलवाः साधोः, परं यावत् सप्तमप्रायश्चित्तापराधमापनीपद्यते तावत् स चारित्रवानेव, ततः परमचारित्रः स्यात्। तथा चोक्तम्—

"जस्स हु जा तवदाणं, ता वयमेगंपि नो अइक्कमइ। एगं अइक्कमंतो, अइक्कमे पंच मूलेणं' ॥ इति।

तदेवं बकुशकुशीलेषु नियमभाविनो दोषलवाः, यदि तैर्वर्जनीयो यतिः स्यादवर्जनीयस्ततो नास्त्येव, तदभावे तीर्थस्याप्यभावप्रसंग इति।

अस्योपदेशस्य फलमाह—

**इय भावियपरमत्था, मज्झत्था नियगुरुं न मुंचन्ति । सव्वगुणसंपओगं, अप्पाणंमि वि अप्पिच्छंता ॥१३६॥**

इति-पूर्वोक्तप्रकारेण भावितो-मनसि परिणामितः परमार्थो यथावस्थितपक्षो यैस्ते भावितपरमार्था-मध्यस्था अपक्षपातिनो निजगुरुं-धर्माचार्यं मूलगुणमुक्तामाणिक्यरत्नाकरं न मुञ्चन्ति-नैव व्युत्सृजन्ति सर्वगुणसंप्रयोगं-समग्रगुणसामग्रीमात्मन्यप्यपश्यन्तोऽनवलोकयन्त इति ।

अन्यच्च गुरुत्यागकारी निश्चितं गुरोरवज्ञां विधत्ते, ततश्चानर्थमागमस्मारणेन दर्शयन्नाह-

**एयं अवमन्नंतो, वुत्तो सुत्तंमि पावसमणु त्ति । महमोहबन्धगो विय, खिंसन्तो अप्पडितप्पन्तो ॥१३७॥**

एतं-प्रस्तुतगुरुमवमन्यमानो-हीलयन् साधुरिति गम्यते भणित उक्तः सूत्रे-सिद्धान्ते श्रीमदुत्तराध्ययन इत्यर्थः पापश्रमणः कुत्सितयतिरितिरुपप्रदर्शने ।

तच्चेदम् सूत्रं—

"आयरियउवज्झाएहि, सुयं विणयं च गाहिए । ते चेव खिंसइ बालो, पावसमणु त्ति वुच्चइ ॥१॥
आयरियउवज्झायाणं, सम्मं नो पडितप्पइ । अपडिपूयए थद्धे, पावसमणु त्ति वुच्चइ" ॥२॥ 

तथा महामोहबन्धकः-प्रकृष्टमिथ्यात्वोपार्जकश्च, अपि(च)शब्दः सूत्रान्तरं सूचयति-किं कुर्वन् ? 'खिंसंतो' त्ति गुरोर्निन्दां कुर्वन्, 'अपडितप्पन्तु'त्ति तेषां वैयावृत्त्यादावादरमकुर्वन्निति । सूत्रान्तरं चावश्यके त्रिंशत्सु मोहनीयस्थानेष्वेवं पठ्यते—

"आयरियउवज्झाए, खिंसइ मन्दबुद्धिए। तेसिमेव य नाणीणं, सम्मं नो पडितप्पइ" ॥

क्रियापदं च पर्यन्ते "महामोहं पकुव्वइ" त्ति भणितमिति।

आह—गुरोः सामर्थ्याभावे यदि शिष्योऽधिकतरं यतनातपःश्रुताध्ययनादि करोति तत्किं युक्तमाहोश्विद् गुरोर्लाघवहेतुत्वान्न-युक्तमित्यत्रोच्यते—गुर्वनुज्ञया युक्तमेव, गुरोर्गौरवहेतुत्वाद्, भवति च गुणाधिके विनेये गुरोर्गौरवम्, श्रीवज्रस्वामिनि सिंहगिरिगुरोरिव।

तथाहि—

पुरा सिंहगिरेः सूरेर्विनेयो विनयास्पदम्। अज्ञानगुरुभूमीभृद्वज्राभो वज्र इत्यभूत् ॥१॥
अबालधीः स बालोपि, संयत्युपाश्रयाश्रयी। एकादशाङ्गीमध्येष्ट, पदानुसृतिलब्धियुक् ॥२॥
अष्टाब्दो गच्छमध्यस्थो, यद्यत् पूर्वगताद्यपि। पापठ्यमानमश्रौषीत्, तत्तज्जग्राह लीलया ॥३॥
पठेति स्थविराः प्राहुर्यदि वज्रं तदा च सः। उद्गृणन्नस्फुटं किंचित्, शुश्राव पठतो परान् ॥४॥
परेद्यवि दिवामध्ये, भिक्षार्थं भिक्षवो ययुः। बहिर्भूमौ गुणग्रामगुरवो गुरवोऽप्यगुः ॥५॥
तस्थौ तु वज्र एकाकी, वसतौ सोऽथ वेष्टिकाः। विन्यस्य साधुमण्डल्यां, स्वयं मध्ये निषद्य च ॥६॥
एकादशानामङ्गानामपि पूर्वगतस्य च। वाचनां दातुमारेभे, मेघगम्भीरया गिरा ॥७॥
व्याघुट्य सूरयोऽप्यागुः, श्रुत्वा गहगहस्वरम्। दध्युरित्यात्तभिक्षाकाः, किमीयुर्मंक्षु भिक्षवः ? ॥८॥
विमर्शं च वितन्वानाः, क्षणादज्ञासिषन् यथा। अये ! वज्रमुनेरेष, वाचनां ददतो ध्वनिः ॥९॥

पुरा भवे किमेतेनाध्यायि गर्भस्थितेन वा । एवं व्यचिन्तयन्मौलिं, धुन्वाना विस्मयान्मुहुः ॥१०॥
अस्यास्मच्छ्रवणाच्छङ्का माभूदिति विचिन्त्य ते । अपसृत्य शनैरुच्चैश्चक्रुर्नैषेधिकीं ततः ॥११॥
तामाकर्ण्य सुनन्दासूर्झगित्युत्थाय विष्टरात् । कृतहस्तोऽमुचत् सर्वाः, स्वस्वस्थानेषु वेष्टिकाः ॥१२॥
समेत्य च गुरोर्दण्डमाददेंऽह्री ममार्ज च । प्रासुकेनाथ नीरेण, स्वयं प्राक्षालयत् पदौ ॥१३॥
एवं च दध्युराचार्या, विद्यावृद्धोऽर्भकोऽप्यसौ । अजानद्भ्योऽन्यसाधुभ्यो, रक्ष्योऽवज्ञास्पदीभवन् ॥१४॥
एवं विमृश्य यामिन्यां, शिष्येभ्योऽकथयन्निति । गन्ता स्मः श्वोऽमुकं ग्रामं, द्वित्राहं तत्र नः स्थितिः ॥१५॥
अथोचुर्मुनयो योगप्रपन्ना वाचनप्रदः । को नो भावीत्यथो सूरिर्वज्र इत्यादिशत् पुनः ॥१६॥
ऋजवस्ते विनीताश्च, तत्तथैव प्रपेदिरे । न सन्तो जातु लङ्घन्ते, गुर्वाज्ञां भद्रदन्तिवत् ॥१७॥
प्रातः कृत्वाऽनुयोगस्य, सामग्रीं ते गते गुरौ । वज्रर्षिगुरुवद्भक्त्या, निषद्यायां न्यषेदयन् ॥१८॥
ततो वज्रमुनिर्ज्ञानकन्दकन्दलनाम्बुदः । आनुपूर्व्या महर्षीणां, तेषामालापकान् ददौ ॥१९॥
ये मन्दमेधसस्तेष्वप्यभूद्वज्रो ह्यमोघवाक् । तद्वीक्ष्य नव्यमाश्चर्यं, गच्छः सर्वो विसिष्मिये ॥२०॥
आलापान्मुनयः पूर्वं, पठितान् निस्तुषानपि । संवादहेतवेऽपृच्छन्, सोपि व्याख्यात्तथैव तान् ॥२१॥
ये यावत् सूरितोऽनेकवाचनाभिरधीयिरे । पेठुर्वज्राच्छ्रुतं तावदेकवाचनयाऽपि ते ॥२२॥
अथोचूः साधवो हृष्टा, विलम्बेत गुरुर्यदि । वज्रान्तिके तदाऽऽश्वेष, श्रुतस्कन्धः समाप्यते ॥२३॥

धन्याः स्मः कृतकृत्याः स्मः, पुण्यान्युज्जागराणि नः । यदेष वाचनाचार्यो, वज्रोऽस्माभिरलभ्यत ॥२४॥
श्रीमन्तो गुरवोऽस्माकमेते धन्यतमा भुवि । शिष्योऽयं विजयी येषां, सर्वश्रुतनिवासभूः ॥२५॥
विनेयेनामुना दत्तहस्तालम्बा शनैः शनैः । श्रीमद्गुरोः प्रवृद्धापि, कीर्त्तिर्भ्राम्यतु विष्टपे ॥२६॥
अथेयद्भिर्दिनैर्वज्रो, भावी ज्ञातगुणः खलु । मुनीनामपि मत्वैयुर्मुदितास्तत्र सूरयः ॥२७॥
मुनयस्तानवन्दन्त, भक्तिभाजोऽथ सूरिभिः । पृष्टाः स्वाध्यायनिर्वाहं, शशंसुस्ते यथास्थितम् ॥२८॥
नत्वा भूयोपि ते शिष्या, गुरुमेवं व्यजिज्ञपन् । भगवन्! वाचनाचार्यो, वज्र एवास्तु नः पुनः ॥२९॥
गुरुर्बभाषे सर्वेषामेव भावी गुरुः क्रमात्। किन्तु मान्योऽधुनाप्युच्चैर्गुणवृद्धोऽर्भकोऽपि हि ॥३०॥
अत एव वयं ग्रामेऽगमामायं च वोऽर्पितः । सूरिर्यथाहि जानीथ, यूयमस्येदृशान् गुणान् ॥३१॥
नत्वस्य वाचनाचार्यपदवी युज्यतेऽधुना । कर्णश्रुत्याददेऽनेन, श्रुतं यन्न गुरोर्मुखात् ॥३२॥
ततश्च श्रुतसारज्ञः श्रुतमर्थसमन्वितम् । अध्यापयद् गुरुर्वज्रं, विधायोत्सारकल्पकम् ॥३३॥
साक्षीकृतगुरुर्वज्रमुनिर्गुर्वर्प्पितं श्रुतम् । मातृकापदवत्सर्वं, स जग्राह कुशाग्रधीः ॥३४॥
तथाऽभूच्छ्रुतविद्वज्रो, यथा सिंहगिरेरपि । चिरसंदेहसंदोहरजःपवनतां ययौ ॥३५॥
क्रमादासादिताचार्यवैभवो भवनाशनः । कुमतध्वान्तविध्वंसहंसः सल्लब्धिसेवधिः ॥३६॥
दशपूर्वश्रुताधारः, श्रीमान् वज्रमुनीश्वरः । भृशं प्रभावयामास, सुचिरं जिनशासनम् ॥३७॥

॥ इति श्रीवज्रस्वामिकथा ॥

तदेवं गुणाधिके विनेये स्यादेव गुरोर्गौरवम्, किन्तु तेन शिष्येण गुणाधिकेनापि हीन इति कृत्वा न गुरुरवमान्य इत्येतदेवाह—

**सविसेसंपि जयन्तो, तेसिमवन्नं विवज्जए सम्मं । तो दंसणसोहीओ, सुद्धं चरणं लहइ साहू ॥१३८॥**

सविशेषमपि—शोभनतरमपि, आस्तां समं हीनं वेत्यपेरर्थः, यतमानस्तदावरणकर्मक्षयोपशमात् सूत्रार्थाध्ययनतपश्चरणप्रभृतिसदनुष्ठाने प्रयत्नवान् तेषां—गुरूणामवज्ञामभ्युत्थानाद्यकरणरूपां वर्जयति—परिहरति सम्यक् शुद्धपरिणामो भावसाधुरिति प्रकृतम्, ततश्च दर्शनशुद्धेर्हेतोः शुद्धमकलङ्कं चरणं—चारित्रं लभते—प्राप्नोति साधुर्भावमुनिरिति ।

अयमत्राशयः—सम्यक्त्वं ज्ञानचरणयोः कारणम्, यत एवमागमः—

"नादंसणस्स नाणं, नाणेण विणा ण हुंति चरणगुणा । अगुणस्स नत्थि मुक्खो, नत्थि अमुक्खस्स निव्वाणं" ॥ इति ।

तच्च गुरुबहुमानिन एव भवत्यतो दुष्करकारकोऽपि तस्मिन्नवज्ञां न विदध्यात्, तदाज्ञाकारी च भूयाद् । यत उक्तम्—

"छट्ठट्ठमदसमदुवालसेहिं, मासद्धमासखमणेहिं । अकरंतो गुरुवयणं, अणंतसंसारिओ भणिओ" ॥ इत्यादि ।

अथ साधुलिङ्गनिगमनपूर्वकं तत्फलमभिधित्सुराह—

**इय सत्तलक्खणधरो, होइ चरित्ती तओ य नियमेण । कल्लाणपरंपरलाभजोगओ लहइ सिवसुक्खं ॥**

इतिरुपप्रदर्शने पूर्वोपदर्शितप्रकारेण सकला मार्गानुसारिणी क्रिया[1], श्रद्धा प्रवरा धर्मे[2], प्रज्ञापनीयत्वमृजुभावात्[3], क्रियास्वप्रमादः[4],

आरम्भः शक्यानुष्ठाने, गरीयान् गुणानुरागः, गुर्वाज्ञाराधनं परममिति सप्तसंख्यलक्षणधरो भवति चारित्री–भावसाधुः। 'तउ' त्ति सकः च शब्दोऽवधारणे, स एव नान्यः, कल्याणपरम्परा–सुदेवत्वसुमनुजत्वादिरूपा, तस्या लाभः–प्राप्तिस्तद्योगात्–तत्संबन्धाल्लभतेऽवाप्नोति शिवसौख्यं–सिद्धिशर्मेति।

उक्तं श्रावकसाधुसंबन्धभेदाद् द्विधा धर्मरत्नम्, इदानीं कः कीदृगिदं कर्त्तुं शक्नोतीत्येतदाह—

**दुविहंपि धम्मरयणं, तरइ नरो घित्तुमविगलं सो उ। जस्सेगवीसगुणरयणसंपया सुत्थिया अत्थि॥**

द्विविधमपि–द्विप्रकारमपि न पुनरेकतरमेवेत्यपिशब्दार्थः, धर्मरत्नं–पूर्वोक्तशब्दार्थं 'तरइ' त्ति शक्नोति, "शकेश्चयतरतीरपाराः" इति वचनात् 'नर' इति जातिनिर्देशान्नरो नरजातीयो जन्तुर्न पुनः पुमानेवेति, गृहीतुमुपादातुमविकलं–संपूर्णं स एव, तुशब्दस्यावधारणार्थत्वात्। यः कथंभूत इत्याह–यस्य श्रीप्रभमहाराजस्येवैकविंशतिगुणरत्नसंपत् "अक्खुद्दो रूववं पगइसोमो" इत्यादि शास्त्रपद्धतिप्रतिपादितगुणमाणिक्यविभूतिः सुस्थिता–कुबोधाद्यदूषितत्वान्निरुपद्रवाऽस्ति–विद्यते इति।

ननु पूर्वमुक्तमेवैकविंशतिगुणसमृद्धो योग्यो धर्मरत्नस्येति, तत्किं पुनरिदमुच्यते? सत्यम्, पूर्वं योग्यतामात्रमुक्तम्, यथा बालत्वेपि वर्त्तमानो राजपुत्रो राज्यार्ह उच्यते, संप्रति करणशक्तिरप्यस्याभिधीयते, यथा प्रौढीभूतो राजपुत्रः कर्त्तुं शक्नोत्येतावद्वयो राज्यमिति।

**श्रीप्रभमहाराजकथा चेयम्—**

सौधोज्ज्वलप्रभाभिर्निरन्तरप्रसृतधूपधूम्याभिः। जितसुरसरिदर्कसुतासङ्गास्ति पुरी विशालेति ॥१॥

सुरलोकावधिविदलद्विचकिलकलिकामलं यशो यस्य । प्रबलबलशत्रुसंहतिकुलक्षयावधि सदा शौर्यम् ॥२॥
त्यागस्तर्कुकजनवाञ्छितावधिः सागरावधिर्वसुधा । श्रीजिनपतिपदकमलद्वयप्रणामावधिर्भक्तिः ॥३॥
शेषः पुनर्गुणगणो, निरवधिरवधीरितान्यदोषभरः । स श्रीचन्द्रनरेन्द्रस्तां नगरीं पालयामास ॥४॥
क्षितिपतिहृदयकुशेशयशया सदाचरणरागपरिकलिता । शुद्धोभयपक्षाऽजनि, हंसी हंसीव तस्य जनी ॥५॥
तनयौ तयोरभूतां, परिभूताखिलविपक्षसंदोहौ । ज्येष्ठः श्रीप्रभसंज्ञस्तथा कनिष्ठः प्रभाचन्द्रः ॥६॥
तत्र ज्येष्ठो गांभीर्यसागरो, रूपविजितरतिकान्तः[2] । सौम्याकृतिः प्रकृत्या[3], लोकप्रियगुणमणिकरण्डः[4] ॥७॥
अक्रूरचित्तपरिणतिनिर्जरजम्बालिनीहिमानीभृत्[5] । शिवसुखघातकपातकभीरुत्वसरोजदिननाथः[6] ॥८॥
शठतालतालवित्रं[7], दाक्षिण्यहिरण्यमेरुगिरिसदृशः । संततमकार्यलज्जास्फुरदलिनीकमलिनीतुल्यः[9] ॥९॥
जीवदयाकैरविणीशशभृत्[10] माध्यस्थ्यहस्तिविन्ध्याद्रिः[11] । गुणरागजनवतंसः[12], साधुकथाकथनपथपान्थः[13] ॥१०॥
जिनधर्मदक्षसत्पक्षकक्षसेवनपयोधरप्रतिमः[14] । स्फूर्जदुरुदीर्घदर्शित्वतारकातारकामागः[15] ॥११॥
जिनपरिवृढगदितागमविशेषविज्ञत्वकेलिधामसमः[16] । सद्बुद्धिवृद्धजनसेवनैकसरसीवरमरालः[17] ॥१२॥
विनयनयबद्धचेताः[18], कृतज्ञताकूलिनीधुनीनाथः[19] । परहितकरणप्रवणः[20], सुलब्धलक्ष्यश्च कृत्येषु[21] ॥१३॥
तत्रापरेद्युरागात्, केवलकलितो गुरुर्भुवनभानुः । तं नन्तुमगान्नृपतिः, सुतसामन्तादिपरिकलितः ॥१४॥
कृत्वा प्रदक्षिणात्रयमानम्य गुरुं गरिष्ठया भक्त्या । उचितस्थाने न्यषदद्यतिपतिरथ देशनां चक्रे ॥१५॥

इह भवगहनेऽनन्ते, भ्राम्यन् जीवः सहन्नसातभरम् । जातिकुलप्रभृतियुतं, कथमपि लभते मनुजजन्म ॥१६॥
तदवाप्य भव्यलोका !, जिनधर्मं कुरुत सकलदुःखहरम् । स पुनर्द्वेधा प्रोक्तो, यतिगृहिधर्मप्रभेदेन ॥१७॥
तत्राद्ये पञ्च यमाः, प्रत्येकं पञ्च भावनाः पाल्याः । हिंसा[१]लीक[२]स्तेया[३]ब्रह्म[४]परिग्रहविरति[५]रूपाः ॥१८॥
समितिभिरीर्या[१]दानै[२]रेषणा[३]भिरनिशं तथा । मनोगुप्त्या[४] दृष्ट्वान्नादिग्रहणेन[५] भावयेत् प्रथमयममलम् ॥१९॥
हास्यभयलोभकोप[४]प्रत्याख्यानैर्निरन्तरं मतिमान् । आलोच्य[५] भाषणेनापि, भावयेत् सूनृतं च यमम् ॥२०॥
[१]याचनमवग्रहस्यालोच्यावग्रहविमार्गणं च भृशम्[२] । सततं समनुज्ञापितभक्तान्नाभ्यवहृतेः करणम्[३] ॥२१॥
साधर्मिकतो याचनमवग्रहस्योच्चकै[४]स्तथाऽस्यैव । मर्यादाकरण[५]मिमा, अस्तेये भावनाः पञ्च ॥२२॥
नारीपण्डकपशुमन्निवासकुड्यान्तरासनोज्झनतः । स्त्रीरम्याङ्गनिरीक्षणनिजाङ्गसंस्कारपरिहारात्[२] ॥२३॥
स्निग्धात्यशनत्यागात्[३], सरागयोषित्कथाविवर्जनतः[४] । पूर्वरतास्मरणेन[५], ब्रह्म सदा भावयेद्धीमान् ॥२४॥
स्पर्शे[१] रसे च गन्धे[३], शब्दे[४] रूपे[५] शुभाशुभे सततम् । रागद्वेषत्यागो हि, भावनाः पञ्चमयमे स्युः ॥२५॥
एवं व्रतानि पञ्चापि, पञ्चभिः पञ्चभिः सुवास्य भृशम् । सद्भावनाभिरगमन्नसुमन्तः शिवपदमनन्ताः ॥२६॥
गृहमेधिनां तु धर्म्मं, निशम्य सम्यक् सुसाधुगुरुपार्श्वे । ज्ञात्वा तथा गृहीत्वा, व्रतानि परिपालनीयानि ॥२७॥
आयतनसेवनाद्यं, शीलं परिशीलनीयमनवरतम्[२] । सद्भिः समर्जनीयः, स्वाध्यायप्रभृतिविभवभरैः[३] ॥२८॥
व्यवहारशुद्धिरनिशं, भव्यैरव्याजभावनैः कार्या[४] । गुरवश्चरणविहङ्गमतरवः शुश्रूषणीयाश्च[५] ॥२९॥

भाव्यं प्रवचनकौशलसुपेशलैर्गलितसकलपापमलैः । स्त्रीणां वश्योऽवश्यं नात्मा कार्यः कदाचिदपि ॥३०॥
सुज्ञानशृंखलाभिर्हृषीककपयः समन्ततो रोध्या[2] । गृद्धिर्न चार्थसार्थे, क्लेशायासकरे कार्या[3] ॥३१॥
निर्वेदः संसारे, दुःखागारे सदा विधातव्यः[4] । विषयाः कुनृपाधिष्ठितविषया इव दूरतस्त्याज्याः[5] ॥३२॥
तीव्रारम्भा दम्भा इव निर्दम्भैः कदापि नहि सेव्या[6] । सकलक्लेशनिवासे, न गेहवासे रतिः कार्या[7] ॥३३॥
धार्यं निरतीचारं, सुदर्शनं स्थगितदुर्गतिद्वारम्[8] । मोहनृपविजयभेरौ, न लोकहेरौ मनो धेयम्[9] ॥३४॥
शुद्धागमविशदविधिः, समस्तकल्याणशेवधिः सेव्यः[10] । दानादिकश्चतुर्द्धा, धर्मः शिवशर्मकृत् कार्यः[11] ॥३५॥
न्याय्ये पथि प्रवृत्तैर्विमुग्धहसितेऽवधीरणाऽऽधेया[12] । हेयौ रागद्वेषौ, भवभाविषु निखिलभावेषु[13] ॥३६॥
धर्माधर्मविचारश्चिन्त्यो माध्यस्थ्यसुस्थचेतोभिः[14] । स्वजनधनादिषु निबिडः प्रतिबन्धो नो विधातव्यः[15] ॥३७॥
भोगोपभोगतृष्णाकृष्णाहिविनिग्रहे [16]प्रयतितव्यम् । सततं यतिधर्मधुरोद्धरणोद्धुरकन्धरैर्भाव्यम्[17] ॥३८॥
एवं श्रमणोपासकधर्मं विधिना विधाय विमलमनाः । सुचरित्रमाप्य लभते, भवाष्टकस्यान्तरपवर्गम् ॥३९॥
इत्याकर्ण्य श्रीचन्द्रनरपतिर्भुवनभानुगुरुमूले । श्रीप्रभसुतादिसहितो, जगृहे गृहमेधिनां धर्मम् ॥४०॥
अथ नत्वा गुरुचरणौ, निजधाम जगाम वसुमतीनाथः । विजहार हारनिर्मलगुणोच्चयः सूरिरन्यत्र ॥४१॥
अपरेद्युः श्रीचन्द्रक्षितीशितुः सविनयं तनूजाभ्याम् । संवाह्यमानचरणद्वयस्य सुकुमारकरकमलैः ॥४२॥
मौलिमणिरुचिररोचीरचितसदःसदनभूरिहरिचापैः । भक्त्या परःसहस्रैरवनिधवैः सेव्यमानस्य ॥४३॥

राज्यभरभवनधरणस्तम्भैः सद्बुद्धिभिर्विगतदम्भैः । शतशः सचिववरिष्ठैरलंकृतासन्नदेशस्य ॥४४॥

बहुसमसमरसंपल्लम्पटभटकोटिभिः परिवृतस्य । करकलितकनकदण्डो, विज्ञापयामास वेत्रीति ॥४५॥ (चतुर्भिः कलापकम्)

देव ! दिदृक्षुर्वो रङ्गमल्लनामा नटाग्रणीरुत्कः । संक्षेपनिबद्धसनत्कुमारनाट्यप्रबन्धोऽस्ति ॥४६॥

लघु मुञ्चेत्युक्ते सति, महीभुजा वेत्रिणा स आनायि । कृत्वा त्रिपातकं करमित्याशिषमथ नृपस्यादात् ॥४७॥

तद्यथा—

षट्खण्डामवनिं निधीन्नव चतुःषष्टिं सहस्राणि च, स्त्रीणां क्षोणिभुजां तदर्द्धमपरं द्विःसप्त रत्नानि च ।

यस्त्यक्त्वा तृणवद्धवार्त्तिविधुरो जैनं व्रतं शिश्रिये, राजर्षिः स सनत्कुमार इह ते भूपाल ! भूयाच्छ्रिये ॥४८॥

अथ नाटकावलोकनकौतुकरसविवशमानसं सकलम् । निजतनयप्रभृतिजनं, नृपतिर्विस्पष्टमैक्षिष्ट ॥४९॥

तस्यानुवृत्तिवशतः सविलासामुज्ज्वलां ततो दृष्टिम् । तदभिनयकृते स कृती नटनेतरि पातयांचक्रे ॥५०॥

बुद्ध्वाऽथो नृपहृदयं, हृदयङ्गमया गिराऽगृणात् सोपि । भो भो पार्षद्यजनाः ! श्रीचन्द्रनरेश्वरप्रमुखाः ! ॥५१॥

क्षणमेकमेकतानीभूय शृणुत तुर्यचक्रिणश्चरितम् । इति जल्पन्नट उच्चैस्तदभिनयं कर्त्तुमारेभे ॥५२॥

तथाहि—

श्रीहस्तिनापुरपतेः, सनत्कुमारस्य नृपतितिलकस्य । षट्खण्डभरतभर्त्तुः प्राज्यं साम्राज्यमनुभवतः ॥५३॥

अप्रतिमरूपलक्ष्मीविलोकनोत्पन्नविस्मयोत्कर्षः । मध्येसभं निलिम्पान् सुरपतिरिति निगदति स्म मुदा ॥५४॥

भो भो अमराः ! पश्यत सनत्कुमारस्य सार्वभौमस्य । पूर्वार्जितशुभनिर्माणकर्मनिर्मितलसन्मूर्तेः ॥५५॥
सा कापि रूपलेखावरेण्यलावण्यकान्तिपरिकलिता । सुरसद्मजन्मिनामपि, या प्रायो नैव संभवति ॥५६॥
अश्रद्दधताविति सुरपतेर्वचो विजयवैजयन्ताख्यौ । क्षिप्रं वसुंधरायां, द्वावमृतभुजाववातरताम् ॥५७॥
अत्रान्तरे च सर्वेपि, विस्मयस्मेरलोचना लोकाः । किमितो भवितेत्यवहितचित्ता आकर्णयामासुः ॥५८॥
तौ तदनु विप्ररूपेण, भूपरूपावलोकनसतृष्णौ । द्वारसमीपेऽस्थातां प्रासादद्वारि भूमिभुजः ॥५९॥
आसीत् सनत्कुमारो, मुक्तालंकारसारनेपथ्यः । प्रारब्धमज्जनोऽभ्यङ्गसंगमङ्गे वहन्नुच्चैः ॥६०॥
दौवारिकेण तौ विप्रपुङ्गवौ द्वारसंस्थितौ कथितौ । प्राविविशत्तदाप्येष, चक्रवर्त्ती स नयवर्त्ती ॥६१॥
अप्रतिरूपं रूपं, तौ दृष्ट्वा तस्य राजराजस्य । मौलिं विधूनयन्तौ, दध्यतुरिति विस्मितौ मनसि ॥६२॥
एतस्य भालपट्टोऽयमस्तशस्ताष्टमीरजनिजानिः । नीलोत्पलजयिपत्रे नेत्रे कर्णान्तविश्रान्ते ॥६३॥
दन्तच्छदयुगमभिभूतपक्वबिम्बीफलच्छविविकाशम् । जितशुक्तिः श्रुतयुगली कण्ठोऽयं पाञ्चजन्यजयी ॥६४॥
स्तम्बेरमराजकराकारतिरस्कारकारिणौ बाहू । वक्षःस्थलममराचलपृथुलशिलाश्रीविलुण्टाकम् ॥६५॥
कटरे करचरणतलं तर्जितकंकेल्लिपल्लवप्रचयम् । किमपरममुष्य सर्वाङ्गश्रीर्नहि गोचरो वाचाम् ॥६६॥
कोप्यस्याहो ! लावण्यसरित्पूरो निरर्गलो येन । जानीमो नाभ्यङ्गं, भविभामिव चारुचन्द्रिकया ॥६७॥
वर्णयति स्म यथेन्द्रस्तथेदमाभाति समधिकं चापि । न कदाचनापि मिथ्या वदन्ति वाचं महात्मनः ॥६८॥

किमिहागतौ भवन्ताविति पृष्टौ चक्रिणाऽथ तौ जगदुः। अप्रतिमं तव रूपं त्रिजगत्यां गीयते भूप ! ॥६९॥
दूरादपि तच्छ्रुत्वा, तरङ्गितामुद्रकौतुकसमुद्रौ। अवलोकयितुमिहावामायाव नरेन्द्रशार्दूल ! ॥७०॥
व्यावर्ण्यमानमतुलं, तव रूपं शुश्रुवे यथा लोके। नरवर ! ततोऽपि सविशेषमेतदालोक्यतेऽस्माभिः ॥७१॥
श्रुत्वेति विप्रवचनं, स्मितविच्छुरिताधरो नृपः प्रोचे। कान्तिरियं किल कियती परितोऽप्यङ्गे कृताभ्यङ्गे ॥७२॥
क्षणमात्रमितो भूत्वा, भो भो द्विजसत्तमौ ! प्रतीक्षेथाम्। मज्जनकक्षण एषोऽस्माभिर्निर्वर्त्यते यावत् ॥७३॥
रचितविचित्राकल्पं, विभूषितं भूरिभूषणगणेन। रूपं मम पश्येतं, सरत्नमिव काञ्चनं भूयः ॥७४॥
तदनुस्नातविलिप्तोऽलंकृतिनेपथ्यभूषितो भूपः। अध्यासामास सदःसदनं गगनं गगनमणिवत् ॥७५॥
समनुज्ञातौ भूयोऽपि, भूपरूपं द्विजौ प्रपश्यन्तौ। दवदग्धकीचकाविव विच्छायौ झगिति तौ जातौ ॥७६॥
अहह ! किमेतदिति सर्वेपि सभ्याः साकूतं परस्परमुदीक्षामासुः।
अनलंकृतेऽपि पूर्वं मयि दृष्टे हर्षितौ युवां विप्रौ। समलंकृतेऽपि संप्रति दृश्येथे किमिति सविषादौ ? ॥७७॥
इति चक्रभृता पृष्टौ, भूदेवौ तौ जजल्पतुर्भूप !। अधुना तावकदेहे संक्रान्ता व्याधयः सप्त ॥७८॥
तद्वशविनश्यदतुलाङ्गरूपलावण्यवर्णकान्तिगुणः। त्वं वर्तस इत्यावां, प्रतिपन्नौ शोकसंभारम् ॥७९॥
कथमेतद्विज्ञायत इत्येवं प्रश्नितौ भरतपतिना। तौ शिष्टयथास्थितसर्वपूर्वसुरराजवृत्तान्तौ ॥८०॥
प्रकटितनिजस्वरूपौ, गीर्वाणौ प्रतिगतौ यथास्थानम्। वैराग्योपगतमतिश्चक्रधरोऽचिन्तयदथैवम् ॥८१॥

भवनजनयुवतिचतुरङ्गसंग्रहो यस्य कारणात् क्रियते । तद्दारुदारुणघुणैरिव रोगैर्लुप्यते गात्रम् ॥८२॥
येन विमोहितमतयो, हितमहितं चिन्तयन्ति नहि जीवाः । तद्यौवनमिह वनमिव जरादवानलशिखा दहति ॥८३॥
अवलिप्तो येन जनः, कृत्याकृत्यं न वेत्ति तद्रूपम् । मङ्क्षु विनस्यति धातुक्षोभे हिमपात इव कमलम् ॥८४॥
अद्यश्वीनविनाशिन एतस्य शरीरकस्य तदिदानीम् । गृह्णाम्यविनश्वरफलमिति नृपतिश्चेतसि विभाव्य ॥८५॥
प्राज्यं साम्राज्यमिदं, विहाय लोका ! अहो निरीक्षध्वम् । आदत्ते जिनदीक्षां तारतरीमिव भवाम्भोधौ ॥८६॥
सागसमिव दशमद्वाररोधिनं चिकुरनिकरमसितरुचिम् । पश्यत पश्यत पुरतः, समूलमुन्मूलयत्येषः ॥८७॥
पुरतोऽवलोकयध्वं, मणिरत्नोत्कटकिरीटहारादिः । आभरणसमूहोऽयं, निर्माल्यमिवामुनाऽत्याजि ॥८८॥
निध्यातनाथमुक्तं, क्रन्दत्यन्तःपुरं स्फुरद्दुःखम् । खरतरसमीरलहरीप्रकम्पितं खगकुलमिवाग्रे ॥८९॥
हा नाथ ! नाथ ! किं वयमेकपदेऽप्यशरणास्त्वया त्यक्ताः । एवं विलपन्ति जना हृतसर्वस्वा इवेक्षध्वम् ॥९०॥
इति तेन भरतभर्त्तुर्निष्क्रमणव्यतिकरस्तथाऽदर्शि । श्रीचन्द्रनृपोऽपि यथा तत्कालं जातवैराग्यः ॥९१॥
स्मृतपूर्वभवश्रुतशुद्धसंयमः पञ्चमुष्टिकृतलोचः । सुरदत्तसाधुवेषो, विनिर्ययौ राजमन्दिरतः ॥९२॥
नटविलसितमिदमखिलं, निर्नाथान्नाथ ! मास्म नस्त्याक्षीः । एवं रुदत्यपि जने विहृतः स ऋषिर्यथाऽभिमतम् ॥९३॥
अथ पितृवियोगविह्वलचित्तमनिच्छन्तमश्रुपूर्णाक्षम् । श्रीप्रभमुच्चै राज्ये कौमारे च प्रभाचन्द्रम् ॥९४॥
विनिवेश्य विनयनम्रैः सामन्तैः सचिवपुङ्गवैश्चोक्तम् । अस्तोकशोकशङ्कूद्धरणप्रवणैरिदं वचनैः ॥९५॥



तत्र श्रीप्रभ-
महाराज-
कथा

मा देव ! कृथाः स्वपितुः, शोकमशोच्यो ह्यसौ महाभागः । खलमहिलेव विमुक्ता येन समग्राऽपि राज्यश्रीः ॥९६॥
को नाम प्रारभते, दुष्करमेवंविधं श्रमणधर्म्मम् । प्रायो वैराग्यमतिः, क्षणमेकं मतिमतामपि यत् ॥९७॥
शोच्यास्तएव ये कालधर्मतामुपगता अकृतसुकृताः । यैरुद्यतमिति धर्मे, ते भुवने पश्चिमाः पुरुषाः ॥९८॥
निशमयति को न समयं ? कः सर्वं नेक्षते क्षणविनाशि ? । प्रतिसमयभावि मरणं, शरीरिणां को न भावयति ? ॥९९॥
को वा हृदि नहि धत्ते, गुरूपदेशं सदा सुखनिवेशम् ? । कस्य न वा प्रियमक्षयमनन्तमसदृशममृतसौख्यम् ? ॥१००॥
किंतु चलचित्तभावात्, तदनुष्ठाने भृशं गतोत्साहाः । गिरिगुरुका अपि पुरुषा अवसर्पन्तो विलोक्यन्ते ॥१०१॥
देवेन पुनस्तत्किमपि, साहसं व्यवसितं महामतिना । यदसमसाहसिकानामपि चेतः खलु चमत्कुरुते ॥१०२॥
एषोऽपि देव ! परमोपकारिभावेन नाटकविधाता । सद्धर्मसूरिरिव, वो विशेषतश्चार्चितुं युक्तः ॥१०३॥
एवं निशम्य राजा, रङ्गाचार्यं प्रपूज्य विससर्ज । किंचिदुपशान्तशोको, नीतिलतासजलजलवाहः ॥१०४॥
नीहारहारधवलान्, नव्यविहारान् विधापयन् बहुशः । गुरुगौरवेण कुर्वन् , साधर्मिकलोकवात्सल्यम् ॥१०५॥
मुग्धजनं सद्धर्मे, स्थिरयन् जिनशासनोन्नतीस्तन्वन् । सामायिकपौषधमुख्यधर्मनिरतोऽजनि प्रायः ॥१०६॥
अथ सततं धर्मोद्यतमजिगीषुं श्रीप्रभं नृपं ज्ञात्वा । अरिदमनक्षितिपस्तद्देशमुपद्रोतुमारभत ॥१०७॥
ज्ञात्वेदं चरमुखतः, स भाणितः श्रीप्रभेण दूतेन । किं ननु कतिपयसीमग्रामकुटीरकविलुण्टनतः ॥१०८॥
पूर्वजविहितप्रणयप्राग्भारमसारमारचय्य भृशम् । आदृत्य दुर्जनत्वं, विप्रियमेवं मम विधत्से ? ॥१०९॥

यतः—

"ते धन्याः सत्पुरुषा येषां स्नेहो ह्यभिन्नमुखरागः। वृद्धिं गच्छन्ननुदिनमृणमिव पुत्रेषु संचरति" ॥११०॥

तस्मादितोऽपराधाद्व्याप्युपरम मयाऽऽग एतत्ते। क्षान्तं नह्यग्रेगूभर्वाम्यहं स्नेहतरुभेदे ॥१११॥

श्रुत्वेत्यरिदमननृपस्तं दूतं प्रतिहसन्निति जजल्प। भो भो! त्वया निजप्रभुरेवं वाच्यो मदीयगिरा ॥११२॥

यथा—

तव पार्थिव! धर्मार्थं सविस्तरारब्धकुशलकृत्यस्य। पृथ्व्या परिपन्थनया, कृतमनयाऽनर्थकारिण्या ॥११३॥

अथ वाञ्छस्येनामपि, तद् दूरं मुञ्च धर्मकर्मेदम्। एकत्र कथं संभवति, खलतिसीमन्तसंघटनम्? ॥११४॥

अथ लोकरञ्जनामात्रमेष आरभ्यत त्वया धर्म्मः। तद्भव निश्चिन्तमना, न हन्मि तव देशमहमधुना ॥११५॥

पूर्वप्रणयप्रकटनमवनीशानां परं जिगीषूणाम्। दूषणमेव गरिष्ठं, गाढमसामर्थ्यमथवाऽपि ॥११६॥



श्रुत्वेति दूतमुखतः, श्रीप्रभराजः प्रदीप्तकोपाग्निः। किङ्करगणेन सहसा, रणभेरीं ताडयामास ॥११७॥

तच्छब्दाकर्णनझगितिमिलितचतुरङ्गसैन्यपरिकलितः। शत्रुं प्रति प्रतस्थे स्वदेशसीमन्यगात् क्रमशः ॥११८॥

अरिदमननृपोऽप्यस्याशु संमुखं समजनिष्ट रणरसिकः। अलसा न युधे शूरा, विप्रा इव भोजनायेह ॥११९॥

अथ सैन्ययोर्द्वयोरपि, सुभटानां तत्र चित्रशस्त्रभृताम्। संफोटोऽजनि गगने, सविद्युतामिव पयोदानाम् ॥१२०॥

अत्यद्भुतभटवादैरथमालवभूभुजः सुभटसंघैः। परबलमभज्यत द्रुतमुद्यानमिव द्विपैर्मत्तैः ॥१२१॥

अथ रथमध्यारूढो, भग्नं संधीरयन्ननीकं स्वम् । उदतिष्ठतारिदमनः, समरायास्फालयंश्चापम् ॥१२२॥
युगपद्विमुक्तशितविशिखसंचयैः सोऽप्यधत्त रिपुसैन्यम् । तटपर्वतमिव जलधिः, प्रसरद्वेलासलिलपूरैः ॥१२३॥
क्षणमात्रादरिदमनः, परसैन्यमदैन्यभुजबलोऽभाङ्क्षीत् । कुटकोटिं लकुट इव, प्रभञ्जनो वृक्षलक्षमिव ॥१२४॥
निजसैनिकभङ्गेन, क्रुद्धः श्रीप्रभनृपो विपक्षबलम् । उत्तस्थे संहर्तुं, कीनाशस्यानुजन्मेव ॥१२५॥
नैव मनागपि सेहे मालवपतिरापतन् परानीकैः । भुजगैरिव विनतायाः, सूनुर्हरिणैरिव व्याघ्रः ॥१२६॥
विद्रुतसैन्यं पुरतः, स्थितमरिदमनं नृपं रणायाथ । आह्वास्त मालवेशो, बलानुजन्मेव भूरिबलः ॥१२७॥
तदनु विचित्रैः शस्त्रैरस्त्रैरपि तौ नृपावयुध्येताम् । वन्येभाविव दशनैरन्योन्यवधाभिलाषमती ॥१२८॥
युद्ध्वा चिरमरिदमनं, गुरुशक्तिर्मालवाधिपश्चक्रे । गतवीर्यं गतशस्त्रं, भुजगं निर्विषमिव नरेन्द्रः ॥१२९॥
अरिदमननृपः श्रीप्रभनृपेण कलभो महागजेनेव । परिभूतः पश्चान्मुखमवेक्षमाणः पलायिष्ट ॥१३०॥
अथ तस्य श्रियमखिलां, रथकट्याश्वीयहास्तिकप्रमुखाम् । जगृहे श्रीप्रभराजस्तस्य श्रीर्विक्रमो यस्य ॥१३१॥
आपूर्ण इवाम्बुधरो, निवृत्य रणसागरादवन्तीशः । कृतसकललोकतोषो, निजनगरीमाजगाम ततः ॥१३२॥
तत्र त्रिवर्गसारं, राज्यश्रियमनुभवन्नसौ नृपतिः । भूयांसमनेहांसं, स्वःसुरपतिवदतिचक्राम ॥१३३॥
तत्र प्रभासगुरवः समवसृता, अन्यदा सुमुनिसहिताः । बन्धुपरिवारयुक्तस्तान्नन्तुं निर्ययौ राजा ॥१३४॥
सम्यक् विनम्य मुनिपतिमिलातलाश्लिष्टमस्तको नृपतिः । निषसाद यथास्थानक्रमथ गुरुरिति देशनां विदधे ॥१३५॥

इह हि भवसमुद्रे संसरन् भूरिकालं, कथमपि मनुजत्वं प्राप्नुयात् कोऽपि जीवः ।
तदपि कथमपीह प्राप्य सद्धर्मकर्मक्षमतनुबलमायुर्दीर्घकालाल्लभेत ॥१३६॥
इदमपि समवाप्य प्रौढमिथ्यात्वलुप्तस्फुटविशदविवेकः पापतापातिरेकः ।
पुनरपि च भवेऽस्मिन्नन्तशोऽनन्तदुःखव्यतिकरविधुरोऽयं संभ्रमी बंभ्रमीति ॥१३७॥
इति भवजलराशौ मज्जनोन्मज्जनानि, प्रविदधदिह दैवादाप्य भूयोऽपि नृत्वम् ।
दृढगुणगणबद्धां जैनदीक्षां तरीवच्छ्रयत भविकलोकाः क्लेशविच्छेददक्षाम् ॥१३८॥

किंच—

अत्युत्कटभटकोटीरथहरिकरिनिकरबलभरसमृद्धाः । यैर्जीयन्ते रिपवः, परःशता जगति ते पुरुषाः ॥१३९॥
येन पुनः स्वात्माऽसावनल्पकुविकल्पकल्पनाकलितः । जीयेत तेन विजितं, त्रिजगदिदं परमशूरोऽसौ ॥१४०॥

तथाचार्षम्—

"जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे । एगं जिणिज्ज अप्पाणं, एस से परमो जओ ॥१४१॥
एगे जिए जिया पंच, पंच जिए जिया दस । दसहाउ जिणित्ताणं, सव्वसत्तू जिणिज्ज तो ॥१४२॥
इत्याकर्ण्य श्रीप्रभ, आनम्य गुरूनुवाच वः पार्श्वे । प्रव्रज्यामादास्ये, राज्यं न्यस्य प्रभाचन्द्रे ॥१४३॥
देवानुप्रिय ! मा स्म व्यधाः प्रमादमिति सूरिणा गदिते । राजा सपरिवारो निजधाम जगाम मुदितमनाः ॥१४४॥

अथ सकलराजलोकप्रत्यक्षं भ्रातरं प्रभाचन्द्रम् । संस्थाप्य राज्यभारे, प्रददाविति नरपतिः शिक्षाम् ॥१४५॥
वत्सान्तरङ्गशत्रून्, सदा जयेरविजये यतस्तेषाम् । विजिता अप्यजिताः, खलु बलवन्तः शत्रवो बाह्याः ॥१४६॥
परिपालयेः प्रजास्त्वं, मालिक इव सुमनसः प्रयत्नेन । सर्वत्राप्यौचित्यं, हृदये दध्या जिनेन्द्रमिव ॥१४७॥
इतरेतराविघातेन, वत्स ! धर्मार्थकामपुरुषार्थान् । प्रतिलेखनादिचेष्टाः, सुसाधुरिव साधयेः सततम् ॥१४८॥
सिचयमिवानलदूषितमुज्झेर्निजमपि नयेन परिहीणम् । दुर्दममिन्द्रियवर्गं, दमयेस्तुरगादिनिवहमिव ॥१४९॥
परिवर्जयेः कुसङ्गं द्विदलान्ने घोलभोजनमिवोच्चैः । सेवेथा आर्यजनं, घनं यथा चातकसमूहः ॥१५०॥
बन्धो ! बन्धुरभक्त्या, बन्धुमिव श्राद्धलोकमश्चेथाः । रक्षेर्नयेन वसुधां, सुधां यथा भोगिनां भर्त्ता ॥१५१॥
आधारस्त्वमसि भुवो, नाधारस्तव समस्ति कश्चिदपि । आत्मानमात्मनैव हि, तत्सततं धारयेर्वत्स ! ॥१५२॥
इत्युक्त्वा तूष्णीकीभूते श्रीप्रभनृपे प्रभाचन्द्रः । एवमिति प्रतिपेदे, सर्वं भक्त्या नमद्ग्रीवः ॥१५३॥
अथ सुस्नातविलिप्तो, रत्नालङ्कारभूषितशरीरः । सदशांशुकसिचयधरो, ददर्थिभ्यो महादानम् ॥१५४॥
कृतसकलसंघपूजो, भ्रातृविधापितसहस्रनरवाह्याम् । शिबिकामध्यासामास पुष्पकं यक्षराज इव ॥१५५॥
चतुरङ्गचमूयुक्तेन, बन्धुभूपेन विनयनम्रेण । अनुगम्यमान उच्चैर्मागधकृतजयजयारावः ॥१५६॥
पुर्या मध्यंमध्येन, निर्ययौ नरपतिर्महाभूत्या । गुरुपदपावितमुद्यानमाप्य शिबिकात उदतारीत् ॥१५७॥
अथ भूषणसंभारं, विश्वं विश्वम्भरापतिर्झगिति । उदतारयदङ्गाद् भुजदण्डादिव वसुमतीभारम् ॥१५८॥

सिद्धान्तगदितविधिना, गुरुणाऽथ श्रीप्रभः परिव्राज्य । परमां मुदं दधत्या, भारत्या समनुदिष्ट इति ॥१५९॥
कमठेन्दुदर्शनमिव, प्राप्य दुरापां जिनाधिपतिदीक्षाम् । शयनासनादिचेष्टा, सकलापि हि यतनया कार्या ॥१६०॥

यतः—

यतना सुधर्मजननी, यतना धर्मस्य पालिनी नित्यम् । तद्वृद्धिकरी यतना, सर्वत्र सुखावहा यतना ॥१६१॥
एकामेव हि यतनां, संसेव्य विलीनकर्ममलपटलाः । प्रापुरनन्ताः सत्त्वाः, शिवमक्षयमव्ययं स्थानम् ॥१६२॥
एवं शिक्षां दत्त्वा, प्रभासगुरवो विजह्रुरन्यत्र । शारदिकवारिदा इव, तिष्ठन्त्येकत्र नहि मुनयः ॥१६३॥
श्रीप्रभराजर्षिरपि, प्रतिसमयविशुद्ध्यदमलपरिणामः । यूथपतिनेव कलभः, सततं विजहार सह गुरुणा ॥१६४॥
जिनपरिवृढगदितागमसूत्रार्थसुधां पिबन्नमर्त्य इव । पञ्चमहाव्रतभारं, दधदवनीभारमिव शेषः ॥१६५॥
पञ्च निशाताः समितीर्हस्तशरानिव धनुर्धरो बिभ्रत् । तिस्रो गुप्तीः शक्तीर्नरपतिरिव धारयन् शुद्धाः ॥१६६॥
मार्गानुसारिणीमिह, कुर्वन् सकलां क्रियां सुपान्थ इव । श्रद्धां प्रवरां धर्मे, तन्वन् मकरन्द इव भृङ्गः ॥१६७॥
प्रज्ञापनीयभावेन, संयुतो भद्रवारण इवोच्चैः । साधक इव विद्यासु, प्रमादमुक्तः क्रियासु सदा ॥१६८॥
आद्रियमाणः शक्यानुष्ठाने योग्यमन्द इव वैद्यः । हृष्यन् गुणाढ्यसङ्गे सरउत्सङ्गे मराल इव ॥१६९॥
आराधयन् गुरुजनं, परमात्मानं यथा परमयोगी । सुचिरं निरतिचारं, चरणं परिपालयामास ॥१७०॥
अथ वर्गत्रयपालनपरायणस्य प्रभेन्दुराजस्य । तनयावुभावभूतां, हरिषेणः पद्मसंज्ञश्च ॥१७१॥

तौ सकलकलापूर्णौ, पूर्णेन्दू इव समस्तजनसुखदौ । अपराविव भुजदण्डौ, रेजाते तस्य भूपस्य ॥१७२॥
अपरेद्युरवनिजानेरजनिष्टारोचिकत्वमन्नादौ । मरुनिपतितहंस इव, प्रतिदिनमक्षीयत ततोऽसौ ॥१७३॥
आहूता वरवैद्याः, क्रिया विचित्राश्च तैः समारब्धाः । न च जज्ञे कोऽपि गुणो, व्यचिन्तयत्तत इति नरेन्द्रः ॥१७४॥
द्रव्यौषधैः किमेभिर्ज्येष्ठं पुत्रं निवेश्य राज्यभरे । कौमारे च कनिष्ठं श्रयामि धर्मौषधमिदानीम् ॥१७५॥
अत्रान्तरे च सहसा, संजातप्रबलशूलरोगेण । अपि वैद्यैः क्रियामाणोपचार आपन्मृतिं पद्मः ॥१७६॥
अथ तनयमरणमाकर्ण्य, नृपतिरस्तोकशोकसंतप्तः । दम्भोलिनिहतगिरिरिव, मूर्च्छाविवशः पपात भुवि ॥१७७॥
पवनाद्युपचारवशादवाप्य चैतन्यमिति नृपो व्यलपत् । हा पुत्र ! क्वासि गतः, प्रतिवचनं किं न मम दत्से ? ॥१७८॥
उदियाय पूर्णचन्द्रो, हाऽग्रस्यत मंक्षु सैंहिकेयेन । अहह ! फलेग्रहिरभवत्, तरुरुदमूल्यत महाकरिणा ॥१७९॥
पोतः प्राप पयोनिधिपारं तटशिखरिणा हहाऽभञ्जि ! । दृष्टो निधिर्विशालो हा ! हा ! हाऽह्रियत हतविधिना ! ॥१८०॥
उदनमदम्भोवाहो, नभस्वताऽक्षिप्यत क्षणेनाहो ! । राज्योचितोऽजनि हहा ! तनयः समहारि दैवेन ! ॥१८१॥
एवं प्रलपन् सचिवैर्व्यबोधि कथमपि नृपोऽकरोत् सूनोः । मृतकृत्यमल्पशोकः, कालेनैवं मनसि दध्यौ ॥१८२॥
ये दण्डसात् सुमेरुं, पृथिवीं वा छत्रसात् क्षमाः कर्तुम् । तेपि स्वमन्यमवितुं नालं, किं हन्त पुनरितरे ! ॥१८३॥
पीयूषपोषपुष्टः, पविभीषणपाणिरमरकोटिवृतः । सुरपतिरपि सुरलोकाच्च्यवते पक्वं फलमिव द्रोः ॥१८४॥
षष्टिं पुत्रसहस्रान्, सगरश्चक्र्यपि न रक्षितुमधीशः । ज्वलनप्रभाद्यमादिव, ततोऽपि किं त्वं बलिष्ठतरः ? ॥ १८५॥

कृत्वा पातकमपि यान्, पश्येदुत्पश्यतामपि हि तेषाम् । रङ्क इव यमेन भवं, गतशरणो नीयते कृष्ट्वा ॥१८६॥
नीतस्ततश्च नरके, सहते खलु वेदनाः परमघोराः । जन्मान्तरानुधावीनि देहिनामहह ! कर्माणि १८७॥
जननी मे जनको मे,भ्राता मे सुतकलत्रवर्गो मे । मिथ्यैव बुद्धिरेषा, न देहमपि वस्तुतः स्वीयम् ॥१८८॥
पुत्रादीनामेषां, भिन्नस्थानात्समेयुषां स्थाने । एकत्र निवासः खलु, विहगानामिव तरौ सायम् ॥१८९॥
गच्छन्ति ततोपि पुनः पृथक् पृथक् स्थानकेषु देहभृतः । एकत्र निशि सुषुप्ता, निशावसाने यथा पान्थाः ॥१९०॥
अरघट्टघटीन्यायादथैहिरेयाहिरां क्रियां सततम् । इह कुर्वतां तनुभृतां, को हन्त स्वः परः को वा ? ॥१९१॥
एवं यावत् संवेगसंगतश्चिन्तयत्यवनिनाथः । तावत् तत्रोद्याने, कुमारनन्दी गुरुः प्राप ॥१९२॥
गुर्वागमनं ज्ञात्वा, गत्वा तत्र प्रणम्य मुनिनाथम् । उचितस्थाने निषसाद, देशनामथ गुरुर्विदधे ॥१९३॥
दिग्भ्यः सर्वाभ्योऽपि, स्वतोऽन्यतश्चापतद्विपन्निवहाः । यमदन्तयन्त्रसंस्थाः, कष्टं जीवन्ति तनुभाजः ॥१९४॥
जीवातुभिरगदगणैरायुर्वेदेन सप्रभेदेन । मृत्युञ्जयादिभिर्वरमन्त्रैर्नहि रक्ष्यते मृत्योः ॥१९५॥
अहह खलमार्यमधनं, महाधनं मन्दमेधसं प्राज्ञम् । कवलयति सततमशरणमविशेषेणैव समवर्ती ॥१९६॥
तापापहमजरामरपदप्रदं श्रमणधर्मममृतसमम् । मुक्त्वा तदत्र भुवने, क्वचिदपि नान्यच्छरणमस्ति ॥१९७॥
इत्याकर्ण्य नरेशो, विनम्य यतिपतिपदौ जगादेति । यतिधर्मेच्छोरनिशं पालितगृहमेधिधर्मस्य ॥१९८॥
पूर्वभवार्जितगुरुतररोगभरप्रसरविधुरदेहस्य । दीक्षां गृहीतुमनलंभूष्णोरुचितं किमधुना मे ? ॥१९९॥

अल्पायुष्कत्वमथो जानन्नृपतेर्गुरुर्बभाणैवम् । स्वातीचारान् विकटय, यमांश्च पुनरुच्चर नरेश ! ॥२००॥
क्षमयस्व प्राणिगणं,व्युत्सृज सर्वाणि पातकपदानि । जिनसिद्धसाधुधर्मं, सम्यक् शरणं प्रपद्यस्व ॥२०१॥
गर्हस्व दुष्कृतभरं, कुरुष्व सुकृतानुमोदनं भूप ! । शुभभावनां च भावय, मुदितोऽनशनं प्रपद्यस्व ॥२०२॥
पञ्चनमस्कारं स्मर, विमुञ्च ममतां च राज्यराष्ट्रादौ । इति गुरुगिरो निशम्य, प्रमुदितचित्तो महीभर्त्ता ॥२०३॥
निजतनये हरिषेणे, हर्षेण निवेश्य वसुमतीभारम् । संघं च क्षमयित्वा, विधाप्य पूजां जिनगृहेषु ॥२०४॥
सुगुरोः समक्षमनशनमुररीचक्रे समाहितमनस्कः । स्वाध्यायध्यानपरो, वासरसप्तकमतीयाय ॥२०५॥
विदलच्चरणावारककर्मचयोऽत्रान्तरे प्रभाचन्द्रः । विहिताञ्जलिर्गुरुं प्रति विज्ञपयामासिवानेवम् ॥२०६॥
दीक्षा जगृहे न मया, प्रभोऽल्पसत्त्वेन पूर्वमधुना किम् । सा समुचिता गृहीतुं नवेति गुरुराह भो भूप ! ॥२०७॥
एकाहमपि प्राणी, प्रव्रज्यां पालयेदनन्यमनाः । यदि नहि गच्छेन्मोक्षं, स भवेद्वैमानिकोऽवश्यम् ॥२०८॥
तत् संस्तारकदीक्षामधुनापि, विधेहि धेहि समभावम् । श्रुत्वैवं मुदितमनाः, संस्तारकयत्यभून्नृपतिः ॥२०९॥
अनिशं श्रुतिपत्रपुटेन पिबन् समयामृतं विगततृष्णः । अवगाढो हंस इव, स्फूर्जन्निरवधिसमाधिह्रदे ॥२१०॥
पक्षं विहितानशनः, पञ्चनमस्कृतिमनुस्मरन् मनसि । मृत्वा स वैजयन्ते, महर्द्धिरमरः समुत्पेदे ॥२११॥
ग्रामपुरकर्बटादिषु, सार्द्धं विहरन् प्रभासमुनिपतिना । श्रीप्रभमुनिररिदमनक्षितिपतिजनपदमथायासीत् ॥२१२॥
तत्र च निशम्य लोकात् प्रभेन्दुराजस्य मरणवृत्तान्तम् । वैराग्योपगतमना एवं स महामना दध्यौ ॥२१३॥

धन्यः कृतकृत्योऽयं, कृतार्थजन्मा नृपः प्रभाचन्द्रः । पण्डितमरणं लब्धं, भवकोटिसुदुर्लभं येन ॥२१४॥
सुरगिरिधीरेणापि च, मर्त्तव्यं फेरुभीरुणापि तथा । उभयोर्नियते मरणे, धीरतया तद्वरं मरणम् ॥२१५॥
तद् द्वेधाकृतसंलेखनस्य, चिरविहितविमलचरणस्य । अभ्युद्यतमरणं खलु, विधातुमुचितं ममाप्यधुना ॥२१६॥
एवं विभाव्य स मुनिर्गुरूननुज्ञाप्य पापरिपुमुक्तः । प्रतिसमयशुध्यदध्यवसायो देहेऽपि च निरीहः ॥२१७॥
समशत्रुमित्रभावो, निर्जन्तुशिलातलं समनुसृत्य । विदधे विधिना सुमना अनशनमथ पादपोपगमम् ॥२१८॥
अत्रान्तरे चरमुखादरिदमननृपो निशम्य तद्वृत्तम् । आगम्य तत्र हृष्टस्तस्य मुनेरिति नुतिं चक्रे ॥२१९॥
जय जय मुनीश! विकसितशतदलदलपटलविमलकीर्त्तिभर !। निःशेषसत्त्वसंहतिरक्षादक्षाशय ! सुधीर ! ॥२२०॥
शुचिसत्यवचनरचनाप्रपञ्चपीयूषशमितभवदाह !। दशनविशोधनमात्रेपि, परधने निःस्पृहमनस्क ! ॥२२१॥
जितभुवनमदनमदकलकुम्भस्थलदलनकेसरिवरीष्ठ !। पदलग्नधूलिलीलापरिमुक्तप्राज्यसाम्राज्य ! ॥२२२॥
मैत्रीप्रमोदकरुणामाध्यस्थ्यमहार्णवावगाढाय । अतिदुष्करतरतपसे, नमोनमस्ते महाभाग ! ॥२२३॥
इति तेन नूयमानोऽपि, सर्वथोत्कर्षवर्जितः स मुनिः । तत्कालं त्रुटितायुः, परमध्यानं समधिरूढः ॥२२४॥
मुक्त्वा तनूमवक्रयकुटीपरीत्यागहेलयाऽत्रैव । सर्वार्थवरविमाने, त्रिदशवरिष्ठः समजनिष्ट ॥२२५॥
हर्षप्रकर्षकलितैरथ तस्य कलेवरस्य संनिहितैः । विबुधैर्विदधे महिमा, गन्धोदककुसुमवर्षेण ॥२२६॥
देवः स तत्र हस्तोच्छ्रयो निशाकरकरप्रतिमरोचिः । त्रियुतत्रिंशज्जलधिस्थितिरहमिन्द्रो विगतमानः ॥२२७॥

सुखशय्यामधिशयितो, निष्प्रतिकर्मा सदा विमललेश्यः । मुक्तस्थानान्तरगतिरकृतोत्तरवैक्रियविकारः ॥२२८॥
आयुःसागरसंख्यैः, पक्षैः कुर्वन् सुगन्धिनिःश्वसितम् । वर्षसहस्रैस्तावद्भिरेष आहारयन् मनसा ॥२२९॥
भिन्नां च लोकनालीं, विलोकयन्नवधिसंपदा मुदितः । निर्वृतिसुखदेशीयं सुखमनुभूय प्रवरतेजाः ॥२३०॥
स्वस्वस्थानाच्च्युत्वा श्रीप्रभजीवः प्रभेन्दुजीवश्च । अपरविदेहे मुक्तिं, लप्स्येते शुद्धचरणेन ॥२३१॥
एवं संयुत एकविंशतिगुणैः स श्रीप्रभः क्ष्मापतिः, साधुश्रावकधर्मभारधरणे धौरेयकोऽजायत ।
तद् भो भव्यजनाः! सनातनसुखस्थानाप्तिबद्धादरा, एतान् मूलगुणानुपार्जितुमहो यत्नं विधत्तान्वहम् ॥२३२॥

इति श्रीप्रभमहाराजकथा ।

एवं च स्थिते विशेषतः पूर्वाचार्याणां श्लाघामाह—

**ता सुट्ठु इमं भणियं, पुव्वायरिएहि परहियरएहिं । इगवीसगुणोवेओ, जोग्गो सइ धंमरयणस्स ॥१४१॥**

यत एभिर्गुणैर्युक्तो धर्मं कर्तुं शक्नोति, ततः सुष्ठु शोभनमिदं भणितमुक्तं पूर्वाचार्यैः—पूर्वकालसंभवसूरिभिः परहितरतैरन्यजनोपकारकरणलालसैः, किं तदित्याह—एकविंशतिगुणैरुपेतो—युक्तो योग्य उचितः 'सइ' त्ति सदा धर्मरत्नस्य—पूर्वव्यावर्णितस्वरूपस्येति ।

अथ प्रकृतशास्त्रार्थमनुवदन्नुपसंहारगाथायुगलमाह—

धम्मरयणत्थियाणं, देसचरित्तीण तह चरित्तीणं। लिंगाइं जाइं समए, भणियाइं मुणियतत्तेहिं ॥१४२॥
तेसि इमो भावत्थो, नियमइविहवाणुसारओ भणिओ। सपराणुग्गहहेउं, समासओ संतिसूरीहिं ॥१४३॥

धर्मरत्नोचितानामुक्तस्वरूपाणां देशचारित्रिणां—श्रमणोपासकानां तथा चारित्रिणां—साधूनां लिङ्गानि—चिह्नानि यानि समये-सिद्धान्ते भणितान्यभिहितानि मुणितत्त्वैरवबुद्धसिद्धान्ततत्त्वैरिति प्रथमगाथार्थः। तेषामयमुक्तस्वरूपो भावार्थस्तात्पर्यं निजमतिविभवानुसारतः—स्वबुद्धिसंपदनुरूपं भणितः—सिद्धान्तमहाम्भोधेः पारस्य लब्धुमशक्यत्वाद्यावदवबुद्धं तावद्भणितमिति भावः। किमर्थं पुनरियान् प्रयासः कृत इत्याह—स्वपरयोरनुग्रह—उपकारः स एव हेतुः कारणं यस्य भणनस्य तत् स्वपरानुग्रहहेतु क्रियाविशेषणमेतत्। स्वपरानुग्रहोऽप्यागमादेव भविष्यतीति चेद्, तत्रागमे कोऽप्यर्थः क्वापि भणितस्तमल्पायुषोऽल्पमेधसश्चैदंयुगीना नावगन्तुमीशा इति समासतोऽल्पग्रन्थेन भणितः। कैरित्याह—शान्तिसूरिभिर्जिनप्रवचनावदातमतिभिः परोपकारैकरसिकमानसैश्चन्द्रकुलविमलनभस्तलनिशीथिनीनाथैरिति द्वितीयगाथार्थः।

अथ शिष्याणामर्थित्वोत्पादनायोक्तशास्त्रार्थपरिज्ञानस्य फलमुपदर्शयन्नाह—

जो परिभावइ एयं, सम्मं सिद्धन्तगब्भजुत्तीहिं। सो मुत्तिमग्गलग्गो, कुग्गहगत्तेसु नहु पडइ ॥१४४॥

यः—कश्चिल्लघुकर्मा परिभावयति—सम्यगालोचयत्येतं—पूर्वोक्तं धर्मलिङ्गभावार्थं सम्यग्—मध्यस्थभावेन सिद्धान्तगर्भाभिरागमसाराभिर्युक्तिभिरुपपत्तिभिः, स प्राणी मुक्तिमार्गे—निर्वाणनगराध्वनि लग्नो—गन्तुं प्रवृत्तः कुग्रहा—दुःषमाभाविनो मतिमोहविशेषास्त- 

एव गर्त्ता अवटा—गतिविघातहेतुत्वादनर्थजनकत्वाच्च तेषु नैव पतति, हुशब्दस्यावधारणार्थत्वाद्, अत एव सुखेन सन्मार्गेण गच्छतीति।

उक्तं प्रकरणार्थपरिभावनस्यानन्तरं फलम्, अधुना परंपरफलमाह—

**इय धम्मरयणपगरणमणुदियहं जे मणंमि भावन्ति। ते गलियकलिलपंका, निव्वाणसुहाइं पावन्ति ॥१४५॥**

इत्यनन्तरोक्तं धर्मरत्नमुक्तशब्दार्थं तत्प्रतिपादकं प्रकरणं शास्त्रविशेषो धर्मरत्नप्रकरणमनुदिवसं—प्रतिदिनमुपलक्षणत्वात् प्रतिप्रहरमित्याद्यपि द्रष्टव्यम्, ये केचिदासन्नमुक्तिगमना मनसि—हृदये भावयन्ति—विवेकसारं चिन्तयन्ति, ते शुभशुभतराध्यवसायभाजो गलितोऽपेतः कलिलपङ्कः—पातकमलोत्करो येभ्यस्ते गलितकलिलपङ्का 'निव्वाणसुहाइं' ति निर्वाणं—सिद्धिस्तत आधारे आधेयोपचारादिह निर्वाणशब्देन निर्वाणगता जीवा उच्यन्ते सिद्धा इत्यर्थः। ते च गतिस्थानावगाहनाभिरेवं सूत्रे चिन्त्यन्ते। तत्र गतिः—

"लाउय एरंडफले, अग्गी धूमे य इसुधणुविमुक्के। गइ पुव्वपओगेणं, एवं सिद्धाण वि गईओ ॥१॥

अलोए पडिहया सिद्धा, लोयग्गे य पइट्ठिया। इहं बोंदिं चइत्ता णं, तत्थ गन्तूण सिज्झइ" ॥२।

स्थानम् तु—

ईसीपब्भाराए, सीयाए जोयणंमि लोगन्तो। बारसहिं जोयणेहिं, सिद्धी सव्वट्ठसिद्धाओ ॥३॥

निम्मलदगरयवन्ना, तुसारगोक्खीरहारसरिवन्ना। उत्ताणयछत्तयसंठिया य भणिया जिणवरेहिं ॥४॥

एगा जोयणकोडी लक्खा बायाल तीस य सहस्सा। दोय सय अउणवन्ना सिद्धिसिलाए इमा परिही ॥५॥

बहुमज्झदेसभाए, अट्ठेव य जोयणाइं बाहल्लं। चरिमन्तेसु य तणुई अंगुलसंखिज्जइभागमिति ॥६॥

अवगाहना पुनः शरीराभावात्सिद्धजीवप्रदेशावगाढाकाशप्रदेशरूपेह गृह्यते ।

तत्र—

ईसीपब्भाराए, उवरिं खलु जोयणस्स जो कोसो । कोसस्स य छब्भाए, सिद्धाणोगाहणा भणिया ॥१॥
तिन्नि सया तित्तीसा, धणुतिभागो य होइ उक्कोसा । चत्तारि य रयणीओ, रयणि तिभागूणिया मज्झा ॥२॥
ओगाहणा जहन्ना, समहियअट्ठंगुला य इगरयणी । सेलेसिसंठियतणुत्तिभागहीणा तदाकारा ॥३॥ इति ।

ततो निर्वाणगतानि सौख्यानि—सिद्धशर्माणि प्राप्नुवन्ति-लभन्ते ।

तानि पुनरेवमागमे व्यावर्ण्यन्ते—

नवि अत्थि माणुसाणं, तं सुक्खं नवि य सव्वदेवाणं । जं सिद्धाणं सुक्खं अव्वाबाहं उवगयाणं ॥१॥
जह नाम कोइ मिच्छो, नगरगुणे बहुविहे वियाणंतो । न चएइ परिकहेउं, उवमाइ तहिं असंतीए ॥२॥

म्लेच्छज्ञातं त्वेवम्—

कोइ नरिंदो नियपट्टणाउ विवरीयसिक्खतुरएण । अडवीए पक्खित्तो, खुहापिवासाहिं परिभूओ ॥१॥
पायवतलंमि पडिओ, केणावि पुलिंदएण करुणाए । विहिओ पउणसरीरो, वरसलिलप्फलप्पयाणेणं ॥२॥
मिलियंमि य नियसिन्ने, नेइ कयन्नुत्ति तं निवो नयरे । ठावइ वरपासाए, परिहावइ पवरचीराइं ॥३॥
वरभोयणपमुहेहिं, दिव्वाहारेहिं पीणइ पुलिंदं । अह सो कयाइ सुमरइ, नियजंमभुवं पुलिंदनरो ॥४॥

मुणिऊण इमं रन्ना, विसज्जिओ सो गओ नियं अडविं । मिलिओ सयणाण इमेहि, पुच्छिओ कत्थ पत्तो सि ? ॥५॥
सो कहइ नरवरेणं, नयरे नीओ म्हि, ते पयंपंति । केरिसयं तं नयरं, सो जंपइ पल्लितुल्लंति ॥६॥
ते बिंति कत्थ वसिओ, सो भासइ मणिमयंमि पासाए । ते बिंति केरिसो सो, सो साहइ उडयसारिच्छो ॥७॥
ते बिंति किं परिहियं, तुमए सो भणइ पट्टवत्थाइं । ते बिंति केरिसाइं ? सो संसइ वक्कलसमाइं ॥८॥
ते बिंति किं च भुत्तं ?, वज्जरइ स मोयगा भणंति इमे । ते केरिसा ? पुलिंदो, बुल्लइ ते पक्कबिल्लसमा ॥९॥
इय अडविपसिद्धेहिं, दिट्ठंतेहिं अदिट्ठनयराण । जह सो सयणाण पुरो नयरसरूवं परूवेइ ॥१०॥
तह केवलीहिं सुमुणियसिद्धिसुहेहिंपि अणुवमत्तेण । तं वुत्तुमसक्कं, तहवि किंचि उवमाइ साहेमि ॥११॥
सयलाहिवाहिरहिओ, महुराहारेहिं पीणियसरीरो । तरुणो कलासु कुसलो, वियड्ढमित्तेहिं परियरिओ ॥१२॥
सुणमाणो संपीणियकन्नं किंनरकयं सरसगेयं । पिच्छंतो बहुविहहावभावरम्मं रमणिनट्टं ॥१३॥
कुसुममयनाहिघणसारचंदणामोयमोइयग्घाणो । कप्पूरपूरपरिगयपगिट्ठतंबोलसुरहिमुहो ॥१४॥
पट्टंसुयपच्छाइयमहल्लपल्लंकहंसतूलिगओ । पेसलपसन्नसंनिहियकामिणीविहियचडुकम्मो ॥१५॥
इय अणुकूले विसए, सेवंतो जं सुहं इमो लहइ । तं इक्कसिद्धसुक्खस्स, होइ नाणंतभागेवि ॥१६॥

तथा चार्षम्—

"जह सव्व कामगुणियं,पुरिसो भुत्तूण भोयणं कोइ । तण्हाछुहाविमुक्को, अच्छिज्ज जहा अमियतित्तो ॥१७॥

इय सव्वकालतित्ता, अउलं निव्वाणमुवगया सिद्धा । सासयमव्वाबाहं, चिट्ठंति सुही सुहं पत्ता" ॥१८॥ इत्यादि ।

इदमुक्तं भवति–सम्यक् सिद्धान्तार्थपरिभावनपरायणानां तदुक्तानुष्ठानकरणप्रवृत्तानां प्रतिक्षणप्रवर्द्धमानोत्तरोत्तरशुभाध्यवसायनीरपूरप्रक्षालितसकलघनघातिकर्मकालुष्याणामविकलसकलकेवलबलावलोकितलोकालोकानां जघन्यतोऽन्तर्मुहूर्त्तमुत्कृष्टतो देशोनपूर्वकोटिं यावत् कृतवसुमतीतलपावित्र्याणां शैलेशीकरणवशक्षपितनिःशेषभवोपग्राहिकर्म्मप्रकृतिसंहतीनां भव्यसत्त्वानां संभाव्यत एव क्षेत्रकालसंहननादिसमग्रोदग्रसामग्रीवशात् पारम्पर्येण निर्वाणसुखप्राप्तिरिति ।

## इति श्रीधर्मरत्नवृत्तिः समाप्ता ।

विष्णोरिव यस्य विभोः, पदत्रयी व्यानशे जगन्निखिलम् । सद्धर्मरत्नजलधिः, स श्रीवीरो जिनो जयतात् ॥१॥

कुन्दोज्ज्वलकीर्त्तिभरैः, सुरभीकृतसकलविष्टपाभोगः । शतमखशतविनतपदः, श्रीगौतमगणधरः पातु ॥२॥

तदनुसुधर्मस्वामिजंबूप्रभवादयो मुनिवरिष्ठाः । श्रुतजलनिधिपारीणा, भूयांसः श्रेयसे सन्तु ॥३॥

क्रमशश्चैत्रावालकगच्छे कविराजराजिनभसीव । श्रीभुवनचन्द्रसूरिर्गुरुरुदियाय प्रवरतेजाः ॥४॥

तस्य विनेयः प्रशमैकमन्दिरं देवभद्रगणिपूज्यः । शुचिसमयकनकनिकषो बभूव भुवि विदितभूरिगुणः ॥५॥

तत्पादपद्मभृङ्गा निस्संगाश्चङ्गतुङ्गसंवेगाः । संजनितशुद्धबोधा जगति जगच्चन्द्रसूरिवराः ॥६॥

तेषामुभौ विनेयौ, श्रीमान् देवेन्द्रसूरिरित्याद्यः । श्रीविजयचन्द्रसूरिर्द्वितीयकोऽद्वैतकीर्त्तिभरः ॥७॥

स्वान्ययोरुपकाराय, श्रीमद्देवेन्द्रसूरिणा । धर्मरत्नस्य टीकेयं, सुखबोधा विनिर्ममे ॥८॥

प्रथमां प्रतिमप्रतिमं बिभ्राणो गुरुजनेषु भक्तिभरम् । विद्वान् विद्यानन्दः सानन्दमना लिलेखास्याः ॥ ९ ॥
श्रीहेमकलशवाचकपण्डितवरधर्मकीर्तिमुख्यबुधैः । स्वपरसमयैककुशलैस्तदैव संशोधिता चेयम् ॥ १० ॥
यद्गदितमल्पमतिना सिद्धान्तविरुद्धमिह किमपि शास्त्रे । विद्वद्भिस्तत्त्वज्ञैः प्रसादमाधाय तच्छोध्यम् ॥ ११ ॥
बह्वर्थमल्पशब्दं विवरणमिति रचयता मया कुशलम् । यदवापि धर्मरत्नप्राप्तिर्जगतोऽपि तेनास्तु ॥ १२ ॥

इति प्रशस्तिः ॥ श्रीरस्तु । शुभं भवतु ॥

संवत् १६५३ वर्षे आश्विनशुक्ले त्रयोदशीभृगुवासरे महीशानपुरे जीर्णपद्रे मुनिवच्छाख्येन लिखितमिति शुभं भवतु लेखकवाचकयोः ॥ छः ॥ छः ॥ ग्रन्थाग्रं सर्वसंख्यया १०१२० । श्रीः ॥ छः ॥ छः ॥

# टिप्पनम् ।

(प. १५२-२ श्लो. २३) करगरंति=जल्पन्ति ।

(प. १५३-१ श्लो. ३०) मुग्गडपविट्ठं=मुद्गरप्रविष्टं व्यन्तरविशेषग्रस्तमित्यर्थः ।

(प. १५३-१ श्लो. ३३) "गजमेतार्यमहामुनिस्कन्दकशिष्यादिसाधुचरितानि" । अत्र गजशब्देन गजसुकुमाल उच्यते, पदैकदेशे पदसमुदायोपचारात् ।

(प. १५३-१ श्लो. ३४) पसखमा-पसा अखमा, प्राकृतत्वात् स्वरस्य स्वरे परे लुकि पसखमा-एष क्रोध इत्यर्थः ।

(प. १५३-१ श्लो. ३८) पोयाइयन्तए=पोतायमानः प्रवहण इवेत्यर्थः ।

(प. १५३-२ श्लो. ४१) धराविय=धारयित्वा-ग्राहयित्वेर्थः ।

(प. १५४-१ श्लो. १) 'सुहवास'त्ति । सुखवासा शुभवासा च, मोदयुक्ता गन्धगुटिका इव मथुरापुर्यस्ति । मथुरापुरी 'सुखवासा' सुखः—सुखकारको वासो यस्या सा, मोदयुता-हर्षयुता च। गन्धगुटिकापक्षे शुभवासा-सुवासिता मोदयुता-गन्धयुता च ।

(प. १५४ श्लो. ४) जन्ते पउरे पउरे निएवि=यातः प्रचुरान् पौरान् दृष्ट्वेत्यर्थः ।

(प. १५७-१ श्लो. ५) ओलग्गिउं लग्गो=अवलगितुं-सेवितुं लग्नः । (श्लो. ९) 'अभयकुमारमल्लिणो=अभयकुमारमाश्रित इत्यर्थः। (श्लो. ११) ओहामियरिउसेणो'० ओहामिया-अभिभूता रिपुसेना येन सः (ब. व्री.)

(प. १५७-२ श्लो. १८) असिखेडयहत्थो=असिखेटकौ हस्ते यस्य सः (ब. व्री.) खेटकः-ढाल इति भाषायाम् ।



॥३१५॥

(प. १५८-१ श्लो. १) नेसत्थिआवणुव्व बहुसस्सा। वणिगापण इव बहुशस्या-बहुधान्या, बहुभिः प्रशस्या च।

(१६२-२ श्लो. ७०) सागारियसंदिट्ठ० सागारिकः—उपाश्रयस्वामी, संदिष्टः-स्वामिनियुक्तः, प्रत्येकमेको वाऽनेके वा भवन्ति, ततश्च चतुर्भङ्गी भवति। ते च शय्यातरा एको वा अनेके वा वर्जनीयाः। अनेकेषु शय्यातरेषु एकं स्थापयेत्।

(प. १६२-२ श्लो. ७४) लिङ्गस्थस्यापि-लिङ्गमात्रधारिणोऽपि शय्यातरो वर्ज्यः। स साधुः शय्यातरपिण्डं परिहरतु वा भुङ्क्तां वा। साधुगुणैर्युक्तस्य वा अयुक्तस्य शय्यातरो वर्ज्यः। तत्र रसापणो-मद्यापणो दृष्टान्तः। महाराष्ट्राख्ये देशे सर्वेष्वपि मद्यहट्टेषु मद्यं भवतु वा मा वा, तत्परिज्ञापनार्थं ध्वजो बध्यते, तं च दृष्ट्वा सर्वेऽपि परिहरन्ति, एवमसावपि साधुगुणैर्युक्तो वा भवतु अयुक्तो वा तथाप्यस्य रजोहरणध्वजो दृश्यते इति कृत्वा तस्य शय्यातरः परिह्रियते इति।

(प. १६३-१ श्लो. ८८) तुप्पियस्स=घृतादिस्नेहलिप्तस्य।

(प. १६८-२ श्लो. ६) तवणिनिमित्तं-अन्नादिभक्ष्यद्रव्यनिमित्तमित्यर्थः।

(प. १७०-१ श्लो. ३) मुणिचित्तं व सकरुणं० करुणा-दया नवमल्लिका च, तया सहितम्। सअज्जुणं-अर्जुनः—मध्यमपाण्डवः, वृक्षविशेषश्च तेन समन्वितम्। (श्लो. ४) उव्वूढखमाभारं० उद्व्यूढक्षमाभारं=क्षमा-अक्रोधः पृथिवी च, तस्या भारः क्षमाभारः, उद्व्यूढः-धृतः क्षमाभारो येन सः तम्। निव्व्यूढा दया येन सः तम्, निव्व्यूढं दकं-जलं येन तम्। प्ररूढः-संजातः गुरुवंशो यस्य, प्ररूढाः संजाता गुरवो वंशा यस्मिन् शैले तम्। (श्लो. ११) दोसपडिहत्थं-दोषपूर्णमित्यर्थः।

(प. १७०- श्लो. १५) दुःखरिंछोली=दुःखश्रेणिः।

(प. १७१-२ श्लो. १) सुपुरुषशरीरे इव सुकरे-सुष्ठु करः-राजग्राह्यो भागः हस्तश्च यस्मिन्, 'वरवच्छे' वराः वृक्षाः, वरं वक्षश्च यस्मिन्, एवं भूते श्रीपुरे समुद्र इव नदीनः-नदीनाम् इनः-स्वामी समुद्रदत्तः श्रेष्ठी न दीनः समृद्ध इत्यर्थः।

(प. १७२-२ श्लो. २७) तेणुत्तं० तेनोक्तं मम गुरुकं-महत् कुड्डं-आश्चर्यम्।

(प. १७५-२ श्लो. २) सुनओ० वसणं-व्यसनं-कष्टं तेन विरहितः नरवरः, वसनं-वस्त्रं तेन विरहितः शशिशेखरः-शिवः, जडासंग-वज्जिओ-जटासंगवर्जितः शिवो न भवति, किन्तु जडासंगः-मूर्खजनसंपर्कः, तेन विरहितो नरवरो भवति।

(प. १८०-२ श्लो. १) अच्छरसोहजुयाए० हरिसभया इव यमुनानद्या उपगूढा मथुरा पुर्यस्ति। हरिः-कपिः, इन्द्रश्च, कथंभूतया हरिसभया यमुनानद्या च? अच्छरसोहजुयाए=स्वच्छजलौघयुतया, अप्सरःशोभायुतया च। अणिमिसकलियाइ-अनिमिषाः-मत्स्याः देवाश्च, तैः कलिता, तथा।

(प. १९०-१ श्लो. २१) कत्थवि० कुत्रापि कोऽपि पउत्थो-प्रोषितो देशान्तरं गत इत्यर्थः।

(प. १९२-२ श्लो. १८) सव्वमजाया कहं मुत्ता=सर्वमर्यादा कथं मुक्ता?

(प. १९५-१ श्लो. ७३) जगजगडणपवणाइं। जगडणं-पोडनम्, जगत्पीडनप्रवणानि।

(प. १९५-२ पङ्क्तिः १३) राजा रोक्ष्यति. रुज्धातोः स्यति प्रत्यये रूपं भङ्क्ष्यतीत्यर्थः।

(प. १९६-२ श्लो. १) लंपागलोगपरिमुक्का-लुण्टाकलोकपरिमुक्ता।

(प. १९८-१ श्लो. ४८) चरियाउ=चरिका-परिव्राजिकेत्यर्थः। (श्लो. ५०) मुहपडियपिंपो=मुखपतिता पिंपा (पिप्पलफलं) यस्य सः।

(प. १९९-१ श्लो. १) पाउसकालंमि व० बहुशस्ये-बहुधान्ये बहुभिः प्रशस्ये च। (श्लो. १४) जलहत्थइ-क्षिपति।

(प. १९९-२ श्लो. १६) करहय० करभककण्ठः-उष्ट्रकण्ठः, तद्वत् कडारेण-पिङ्गलवर्णयुक्तेन। विसमविस० विषमविषप्रसरेण चिंचइए-मण्डितान् वृश्चिकान् मुञ्चति। (श्लो. १८) सहियउवसग्ग० सोढ उपसर्गपट्टः—उपसर्गप्रवाहो येन सः।

(प. २०१-१ श्लो. २१) तुम्हवि एसु च्चिय पहुत्ति-युष्माकमपि एष एव पन्थाः।



(प. २०२-१ श्लो. ४५) आलवणरमणपमुहंपि=संभाषणक्रीडादिकमपीत्यर्थः। (श्लो. ४६) जिणपालिओ० बेसो-द्वेष्यः।

॥३१६॥

(प. २०३-२ श्लो. १) जलहिजल० जलधिजलमेव स्नेहस्तेन पूर्णे, सुमेरुरेव दण्डो यस्य सः तस्मिन्, सुज्योतिःकान्तियुक्ते

जम्बुद्वीपे दीपे इव। ( श्लो. ८ ) उम्मुक० उन्मुक्ता पक्का-दृप्ता इक्का येन सः। ( श्लो. १० ) उप्पिच्छसत्थनाहं=उप्पिच्छो-त्रस्तः सार्थनाथः यस्मिन् तत्। (श्लो. ११) गलहत्थिओ-पराभूतः।

(प २०७-१ श्लो. १) संसारकत्तवारं=कत्तवारं-मिथ्याभूतमपारमार्थिकमित्यर्थः। ( श्लो. १) विद्दुमसिरिपरिकलियं-विशिष्टा द्रुमा विद्रुमाः प्रवाला वा तेषां श्रीस्तया परिकलितम्। बहुसमृद्धाः पोता डिम्भाः प्रवहणानि च तैरलंकृतम्।

(प. २०९ श्लो. ७६) जइ आगमेसिभद्दा० आगमिष्यद् भद्रं येषां ते आगमिष्यद्भद्राः-भविष्यत्कल्याणाः हरिकुलप्रभु-श्रेणिकाद्याः।

(प. २२२-२ श्लो. १)गयवज्जियंपि=गदवर्जितमपि-रोगवर्जितमपि सगयं-सगजं केनापि अहयंपि-अहतमपि सर्वदा सुहयं-सुखदं काञ्चनपुरमस्ति।

(प. २१९-२ श्लो. २) साय सयं गोसद्धं० सायं-दैवसिके उच्छ्वासशतम्, गोसे-प्रातःकाले अर्ध पञ्चाशदित्यर्थः।

(प. २२९-१ श्लो. ३१) सुंकवालेहिं-शुल्कपालैः। ( श्लो. ३२) उस्सुंकुति-उच्छुल्काः शुल्करहिताः, ( श्लो. ३४) लच्छिपडिहत्थं-लक्ष्मीपूर्णम्।

(प. २३३-२ श्लो. १) श्रीपरिकालिता० रामो-बलरामः, आरामः-उद्यानः, गदो-रोगः गदा-आयुधविशेषः।

(प. २३४-२ श्लो. ४०) जीवो नास्ति, समक्षादर्शनतः—प्रत्यक्षादर्शनात्, खरविषाणमिव इति हेतुसद्भावे साध्यसद्भावादन्वय-व्याप्तिः, यत्तु न-यन्न नास्ति पुनस्तत्तथा-न समक्षादर्शनम्, यथाभूतचतुष्टयमिति साध्याभावे हेत्वभावाद् व्यतिरेकव्याप्तिः।

(प. २३९-२ श्लो. ४१) रणसवडंमुह-रणाभिमुखेत्यर्थः।

(प. २४१-२ श्लो. ३०) सायरपल्लमाणमणहे-सागरोपमपल्योपमप्रमाणं अनघान् भोगान् भुक्त्वा।

(प. २४३-१ श्लो. ७९) दूरं पत्तो० चुज्जं-आश्चर्यम्।

(प. २४३-२ श्लो. ८५) हा कह जाणंतु० 'वसारसा' वशा-हस्तिनी, तस्या रसात्।

( प. २४४-२ श्लो. १ ) अत्थिर० नगरायमहीव सुकनका सुपथा सुप्रभा वा एवंभूता नगरा नाम नगरी।

( प. २४९-२ श्लो. १२ ) तस्स य० दसवलभत्ता-बुद्धभक्ताः। ( श्लो. १९ ) मा झरसु-मा स्मरेत्यर्थः।

( प. २५१ श्लो. ३ ) नाहियवाई-नास्तिकवादी।

( प. २५१-२ श्लो. ६६ ) अप्पाहिय-शिक्षयित्वेत्यर्थः।

( प. २५९-१ श्लो. ५९ ) आदन्नो-व्याकुलः।

( प. २७६-१ श्लो. ४ ) वुत्थो-उषितः।

( प. २७९-१ श्लो. ५ ) तइलोय० त्रिलोकलोकानां चमढणं-आक्रमणं, तेन विढत्तो-उपार्जितो जयो येन स मदनमल्लः, तस्य बलं तस्य दमनः।

( प. २८१-२ श्लो. १३ ) बलिमड्डाए-बलात्कारेण।



॥३१७॥

# शुद्धिपत्रकम्

| पत्रं पृष्ठं च | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १५१—२ | १ | रूचिम् | रुचिम् |
| ,, | ,, | मित्यथः | मित्यर्थः |
| ,, | २ | पूवार्द्धनाह | पूर्वार्द्धमाह |
| ,, | १३ | चित्त | चित्ते |
| १५२ | १ | जोगस्स | जोग्गस्स |
| १५३—२ | १३ | ०त्तराद्धमाह | ०त्तरार्द्धमाह |
| १५४—२ | १० | गयर्कित | गयवित्तं |
| १५७—१ | ११ | विणय | विणयं |
| १५९—१ | ११ | रुव्या | रुच्या |
| १६१—१ | १२ | निवृत्ता | निर्वृत्ता |
| १६२—२ | ९ | वइज्ज | वइज्ज |
| ,, ,, | १० | रसायणो | रसापणो |
| १६५—२ | १ | कहति | कहंति |
| १६६—१ | ६ | गव्छति | गच्छति |
| १९९—२ | ६ | ०मिच्छतो | ०मिच्छत्तो |
| २००—२ | ९ | बारं | वारं |
| २०१—१ | १० | देविप | देवीए |
| २०५—२ | १० | सया | तया |
| २०९—२ | १२ | आगमे सिभद्दाह० | आगमेसिभद्दा ह० |
| २१३—२ | १२ | ०कोकीजी० | ०केकिजी० |
| २२१—२ | १२ | सटङ्कः | संटङ्कः |
| २२३—२ | ५ | ०विक्मगुणो | विक्कमगुणो |
| २३६—२ | ६ | कोऽपि | केऽपि |
| २४४—२ | ९ | तगरा | नगरा |
| २४६—२ | ६ | ०रागरचनम् | ०रागवचनम् |
| २४८—१ | ९ | स्थितिपरावर्तः | तिथिपरावर्तः |

| पत्रं पृष्ठं च | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २६३—२ | ९ | वित्तीर्णं | वितीर्णं |
| २६६—१ | ३ | शिवभद्र० | शिवचन्द्र० |
| २६९—२ | ४ | पडि धो | पडिबंधो |
| २७८—२ | ७ | ०यात्सहेत | योत्सहेत |
| २८८—१ | १ | गुणराढ्यानां | गुणैराढ्यानां |
| २८९—२ | ११ | खेदमति | खेदमेति |
| ,, ,, | १२ | क्षौभ० | क्षोभ० |
| २९०—१ | २ | बह्वीभियु० | बह्वीभिर्यु० |
| २९१—१ | १० | षट्र्त्रिशिका | षट्त्रिंशिका |
| ३००—२ | २ | पक्षोगुयै० | पक्षो यै० |
| ३०३—२ | १० | ०तारकामागः | ०तारकामार्गः |
| ३०४—२ | २ | रोध्या | रोध्याः |
| ३०६—२ | ३ | विनस्यति | विनश्यति |
| ३०७—२ | १२ | युधे | युधे (युधि) |
| ३१२—२ | ४ | मुणितत्त्वै० | मुणिततत्त्वै० |




॥३१८॥